
Narayan
Parmeshwar tantra (Chapter 1-23)
पारमेश्वर तंत्र (अध्याय 1-23)
Sanskrit
Handwritten on paper
N. A.
folio: 124
12.5"x 5.2"
Complete

॥ अथपारमेश्वरतंत्रप्रारंभोजयति ॥ श्रीगौरीशंवंदे ॥ रामंवंदे ॥



श्रीगणेशायनमः॥ श्रीसांबसदाशिवायनमः॥ अथ पारमेश्वरतंत्रोक्तलिख्यंते॥ वसंततिलकवृत्तं

॥ वंदेगिरींद्रतनयाद्दिरदाननाग्निभूनंदिभृंगिरिटिसेवितपादपाद्मं॥ पंचाननंफणिशशिभृत
रक्षुचर्मभूषंमहेशमनिशंशिरसागिरीशं॥ १॥ पाशांकुशेष्टदविषाणकराग्रबीजंपुरोज्वलंतरुण-
सूरजटाप्रकाशं॥ कोटीरकोटिशशिरेखमुमाननूजंवंदेगणेंद्रमनिशंवरदानदक्षं॥ २॥ कैलासशिखरे
रम्येसिध्धगंधर्वसेविते॥ सर्वकल्याणनिलयेपुण्यशंकरमंदिरे॥ ३॥ एकदारहसिप्रेम्णापार्वतीपरमेश्व
रं॥ सर्वलोकोपकारायनमस्कृत्यैवमब्रवीत्॥ ४॥ पार्वत्युवाच॥ देवदेवमहादेवचंद्रशेखरधूर्जटे॥ मतभेद
स्वरूपंमेवदतत्वेनसर्वज्ञः॥ ५॥ मतानिकतिभेदानिलक्षणंतस्यतस्यकिं॥ आचारश्चकथंतत्रप्रायश्चि
त्तंफलंत्वपि॥ ६॥ ईश्वरउवाच॥ शृणुदेविप्रवक्ष्यामिमतानांलक्षणादिकं॥ यज्ञात्वानिवृत्तंयांतिशि
वःसंजायतेस्वयं॥ ७॥ आदौतुसौगतमतंतच्चपंचविधंप्रिये॥ बौध्दसौगतचार्वाकजैनार्हतविभाग

तः॥८॥ तेषामिदं महामुख्यं मतं साधारणं प्रिये॥ तारेतु तारतारे स्वाहेति शून्यार्थको मनुः॥९॥ अथ वैदि
कं मैत्रानि मतं यद्द्वेदसंमतं॥ मंत्रसु ब्रह्मगायत्री सर्वसाधारणः प्रिये॥१०॥ ततोधिकं सौरमतं गाय॰
त्री सौरलक्षणा॥ तत्र पंचविधं देवी पंचभेदं निशामय॥११॥ वैकर्त्तनं यथादित्यं पौष्णं मार्त्तंड संज्ञि
तं॥ सौरं सर्वोत्तमं तत्र यतु सूर्याधिदैवतं॥१२॥ ततोधिकं महादेवि मतं वै स्सवसुत्तमं॥ तद्वेदमपि व
क्ष्यामि तत्र पंचविधं मतं॥१३॥ गोपालं नारसिंहश्च रामकृष्णात्मकं परं॥ नारायणमिती शानि गाय
त्री वैष्णवी तथा॥१४॥ अथ वक्ष्ये गिरिसुते मतं ममम हत्तरं॥ शैवं सप्तविधं पुण्यं वीरशैवा
दिभेदतः॥१५॥ वीरशैवं तथा नादि शैवमादिपदं ततः॥ अनुशैवं महाशैवं योगशैवं तु षष्ठमं॥
१६॥ सप्तमं ज्ञानशैवाख्यं तत्र सर्वोत्तमोत्तमं॥ वीरशैवामिती शानि तद्द्गानि तराणि तु॥१७॥
गाणपत्यं वैरभद्रं भैरवं शारभाभिधां॥ नंदिकेशं च कौमारं पैशाचमिति सप्तधा॥१८॥ अष्टकोटिम

ह्यभेदं गाणपत्यं मतं प्रिये ॥ सप्तधा वीरभद्राख्यं भैरवं चाष्टधोदितं ॥१९॥ शारभं पंचविधं नांदिकेशं चत्रि
विधोदितं ॥ कौमारमिति पैशाचं मतं तु त्रिविधं प्रिये ॥२०॥ सौगतादीनि यावंति वैष्णवांत मतानि तु ॥ य
च्च शैवं मम मतं सर्वेषामुत्तमोत्तमं ॥२१॥ तत्र तु षड्विधं प्रोक्तं षड्दर्शनविभेदतः ॥ वीरशैवं वैष्णवं च शा
क्तं सौरं विनायकं ॥२२॥ कापालमिति विज्ञेयं दर्शनानि षडेव हि ॥ तत्तत्तंत्रोक्तमार्गेण तत्तत्कर्म समाच
रेत् ॥२३॥ शैवं पाशुपतं सोमं लाकुलं च चतुर्विधं ॥ शैवभेदमिति ज्ञेयं संकरं न समाचरेत् ॥२४॥ अ-
नादिशैवः प्रथमः आदिशैवो द्वितीयकः ॥ तृतीये तु महाशैवश्चतुर्थो ह्यनुशैवकः ॥२५॥ पंचमो वांतर
शैवो योगशैवस्तु षष्ठकः ॥ सप्तमो वीरशैवाख्यस्तत्तत्कर्म समारभेत् ॥२६॥ तत्तदागमकर्माणि तत्तद्दे
वं न मिश्रयेत् ॥ गोपालं पंचरात्रं च नारसिंह च वैष्णवं ॥२७॥ नारायणं पंचविधं संकरं न समाचरेत् ॥
नित्यानित्या शाबराख्या शाक्तिश्चेति चतुर्विधा ॥२८॥ शाक्तभेदमिति ज्ञेयं संकरं न समाचरेत् ॥ ब्र-

॥पार॰तं॰॥ स्वेंद्रसावनः सूर्यइतिसौरश्चतुर्विधा॥२९॥ तस्मिन्तस्मिन्यथाप्रोक्तं ततदेवंनमिश्रयेत्॥ अर्हश्चार्वा ॥अध्या॥
॥२॥ कबौधश्चजिनश्चेतिचतुर्विधा॥३०॥ वैनायकमितिज्ञेयंसंकरंनसमाचरेत्॥ निरीश्वरंसेश्वरंचकपालं ॥३॥
भैरवंतथा॥३१॥ चतुर्विधंतुकापालंसंकरंनसमाचरेत्॥ अत्राहोवीरशैवाख्यं तंत्राणामुत्तमोत्तमं॥३२
तत्रतंत्रोमहादेविशैवोवाप्यंचाक्षरोमतं॥तदुध्दारंप्रवक्ष्यामिश्रृणुशैलकुमारिके॥३३॥ जविपूर्वमहस्सूर्वस्म
रपूर्वसमन्वितः॥पार्श्वमक्षिसमायुक्तं वरुणस्थंसमंप्रिये॥३४॥ वन्हिपूर्वंततोदेविमंत्रःसाक्षान्मदात्मकः मनुः
॥सर्वेषामपिशैवानांसर्वसाधारणोमनुः॥३५॥ देव्युवाच॥ उक्तानेतानिदेवेशसर्वाणिचसमानिवा॥ता
रतम्येनवातत्रकिंमतंसर्वशेखर॥३६॥ नोक्तंशाक्तमतंदेवह्युत्तमंवाधमंसमं॥ तदद्यकथयस्वामिन्य
तुसर्वोत्तमोत्तमं॥३७॥ ईश्वरउवाच॥ सर्वाणिचमहादेविमतानिचमहांत्यपि॥ प्राप्यमेकंफलंतेषांवि
शेषस्तत्रवक्ष्यते॥३८॥ वित्तायांसमहायलसाध्यान्यन्यानिपार्वति॥ महाफलंशुभकरंशैवमेवनसं ॥२॥

त्रयः॥३९॥ तत्र वक्ष्येशिवे वीरशैवं सर्वोत्तमोत्तमं॥नान्यस्य तद्भवेद्योगं शास्त्रेष्वेवं मतं॥४०॥ वीरशैवम
तं सद्यो भोगमोक्षैकसाधनं॥सर्वोत्तमं मम मतं यतः सर्वोत्तमोस्म्यहं॥४१॥ न वीरशैवसदृशं मतमस्ति जग
त्त्रये॥सर्वभोगप्रदं पुण्यं शिवसायुज्यदायकं॥४२॥ यथा मत्सदृशो नास्ति पुरुषाणां त्वया समा॥स्त्रीणां तथा
वीरशैवसदृशं नास्ति वै मतं॥४३॥ अपि पापशतं कृत्वा ज्ञानतो ज्ञानतोपि वा॥वीरशैवमतं प्राप्य शिव एव
न संशयः॥४४॥ न तस्यास्ति भयं पापान्नाधिक्यं पुण्यकर्मणः॥स्वयं हि पुण्यपापानां निर्नेता च नियाम
कः॥४५॥ ये वीरशैवे देवेशि दीक्षिता शिवयोगिनः॥तान् दृष्ट्वैव पलायंते दूरतो यमकिंकराः॥
४६॥ सभस्म रुद्राक्षतनुं सलिंगं शिवयोगिनं॥दृष्ट्वा सद्यो विमुच्यंते पापिनोपि न संशयः॥४७॥
यस्य भस्म ललाटेस्ति कंठे लिंगं महात्मकं॥रुद्राक्षधारणं देहे सोहं देवि न संशयः॥४८॥ य इच्छेन्मम सा
रूप्यं सोर्चयेच्छिवयोगिनं॥य इच्छेद्रौरवं घोरं स निंदेच्छिवयोगिनं॥४९॥ नित्यं संपूजयेद्वीरशैवं दीक्षितं

शिवयोगिनं॥ यस्यकंठगतोहंवैसतस्मादुत्तमः प्रिये॥५०॥ यादृशी भावना कार्यामयित्वयिशिवे तथा॥ तथै
व कार्या वैवीरशैवहीक्षितउत्तमे॥५१॥ तस्यपूजाममशिवेतन्निंदा चममैवहि॥ यद्यस्तिमयिसद्भक्ति
रर्चयेच्छिवयोगिनं॥५२॥ निमिषंनिमिषार्धंवा यत्रास्युःशिवयोगिनः॥ तत्रैवैलोसपरंविध्धि तत्र
काशीशिवोप्यहं॥५३॥ ममयोधारयेल्लिंगं यथोक्तंगुरुणाशिवे॥ चांडालस्पृष्टदोषोपि स्मरतो नः
श्यनिक्षणात्॥५४॥ नतस्य जातिभेदोस्ति नशुच्यशुचिकल्पना॥ निःस्पृष्टिर्नापिवा शुध्धिः सर्वंशिव
मयंततः॥५५॥ भुक्तावशिष्टंपात्रंयतदुच्छिष्टधियाशिवे॥ क्षालयेच्छिवयोगीयः सयातिनरकंध्रुवं॥५
६॥ नस्पृष्टिर्नरजोदोषं नस्त्रीबालादिकल्पना॥ नजन्ममरणाशौचं नस्नानादिर्विधियता॥५७॥ ब्रा
ह्मणाःक्षत्रियावैश्याः शूद्रयेचान्यजातयः॥ लिंगधारणमात्रेणशिवएवनसंशयः॥५८॥ स्त्रियोबा
लास्तथा वृध्धाः खंजाःकुब्जाथपंगवः॥ उन्मत्ताबधिराकाणः शठाधूर्ताश्चवंचकाः॥५९॥ चोराजारा

स्तथावैश्या आचांडाळांत संभवाः ॥ मल्लिंगधारणादेव मद्रूपा एव तेशिवे ॥ ६० ॥ न बालवृध्दभेदोस्ति नमस्कारा
दिपूजने ॥ सर्वेपि वंदनीया हि विधवाः पुष्पिणीमुखाः ॥ ६१ ॥ यस्यास्ति भक्तिरीशानि वीरशैवमताश्रये ॥ भ
क्तिमात्रपवित्रा हि सर्व एकाधिकारिणः ॥ ६२ ॥ देव्युवाच ॥ जय शंकर सर्वेश सर्वज्ञ सकलोत्तम ॥ मते तु वीर
पूर्वत्वे किं प्रमाणमिहोच्यतां ॥ ६३ ॥ यौगिकं रूढिकं वेदमुपाचारापि वै प्रभो ॥ तदद्य कथयेशान नास्ति नान्यस्य
चेद्दृशं ॥ ६४ ॥ ईश्वर उवाच ॥ साधु पृष्टं त्वया देवि सर्वलोकहितं त्विदं ॥ महारहस्यमेतत्ते वक्ष्ये मोहवशार्दितः ॥ ६५ ॥
वीरत्वं नाम विश्वेशि तुरीयो यत्र यत्र वै ॥ गुरूक्तमार्गनिरता मते वीरपदाभिधे ॥ ६६ ॥ सर्वेपि वीरा देवेशि तुरीया
यत्र यत्र ये ॥ किं तु मे शिव भेदो यो वीरशैवः स उच्यते ॥ ६७ ॥ अन्यत्र कर्मबाहुल्यादाचारस्य व्यतिक्रमात् ॥ न चित्त चि
शुध्दलाभाच्च भेदः सद्भावतः स्मृतः ॥ ६८ ॥ अत्र वक्ष्ये विशेषं ते लिंगधारणसंभवात् ॥ भक्तिमार्गेण कल्याणि सुखं
दुःखांबुधिं तरेत् ॥ ६९ ॥ प्रवेशमात्रेण मते मम शैवे मतोत्तमे ॥ अनायासेन सस्मरल्लिंगधारणसंभवात् ॥ ७० ॥ अ-

॥पा॰तं॰॥ न्यत्रनास्तिमल्लिंगधारणंमत।वर्त्तिक॥शैवस्थएवकुर्वीतलिंगधारणमीश्वरी॥७१॥मतांतरस्थोयोमू ॥अध्या॰॥
॥४॥ ढाःकुर्यान्मल्लिंगधारणं॥सजीवन्नेवचांडालोमृतोनरकमश्नुते॥७२॥योन्यधर्मःपरंधर्ममाचरेद्दिछ· ॥१॥
यान्वितः॥सजीवन्नेवचांडालोमृतोनरकमश्नुते॥७३॥योविनागुरुकारुण्यमिछयालिंगधारणं॥स·
जीवन्नेवचांडालोमृतोनरकमश्नुते॥७४॥यद्दिभक्तिर्दृढादेविममलिंगस्यधारणे॥शिवयोगीनमा
श्रित्यतंगुरुंशिवमर्चयेत्॥७५॥शिवदीक्षांविनादेवियःकुर्याल्लिंगधारणं॥सयातिनरकंघोरंयस्यचे
तद्भक्तितः॥७६॥विनाविधानमीशानिनकुर्याल्लिंगधारणं॥कृतंचेदकृतंविधिनतच्छैवमतंभवेत्॥
७७॥लिंगधारणमात्रेणशिवत्वंप्राप्तरेवहि॥शैवंमममतंदेविसद्योमुक्तिविधायकं॥७८॥तस्माच्छै
वमतंसर्वमतानामुत्तमोत्तमं॥ममस्वरूपदेवेशिमल्लिंगस्यचधारणात्॥७९॥विनानानुग्रहंतेषांममशै
वमतेशिवे॥भक्तिःसंपद्यतेक्वापितत्पुनर्भवभाजनः॥८०॥सकृत्सवेश्यचनरोगतेषुबहुजन्मसु॥ममशैवम ॥५॥

तेदेवि सोहमेव नसंशयः ॥८१॥ यथा नदीनां सर्वासां पुण्या भागीरथी शिवे ॥ यथैव भवती सर्वयोषितां पु
रुषेष्वहं ॥८२॥ यथैव काशी सेत्राणां क्षेत्रेषु मनकर्णिका ॥ मम पंचाक्षरी मंत्र सर्वमंत्रेषु वै यथा ॥८३॥ तथैव सर्व
लोकेषु कैलासस्थानमावयोः ॥ तथा शैवमतं देवि विद्धि सर्वोत्तमोत्तमं ॥८४॥ मम सर्वोत्तमत्वेन मत्स्पृष्टत्वात्सर·
स्य च ॥ तदेव तारतम्यं ते मते मम परत्र तु ॥८५॥ यथा वर्धयते राजा भृत्यं कर्मानुसारतः ॥ तारतम्यं पदं दत्वा तद्वेवाहं
मते मम ॥८६॥ विशेषं तत्र वक्ष्यामि रहस्यं गोप्यं तां त्वया ॥ न प्रकाश्यं कुत्रापि विना भक्तं सलक्षणं ॥८७॥ दे·
वालयादिषु यथा चित्रादिषु यथा गृहे ॥ दृश्यते चाकृतिर्यस्य न ज्ञानं जायते स्फुटं ॥८८॥ एवं त्वमत्राद न्यत्र स
र्वपापैः प्रमुच्यते ॥ लिंगस्य दर्शनाद्देवि मम ज्ञानं प्रजायते ॥८९॥ गतेषु बहुसंख्येषु दुःखरूपेषु जन्मसु ॥ मत्कारु
ण्यन तस्यांते जायते लिंगदर्शनं ॥९०॥ यदेतमिति जानाति लिंगं मम महेश्वरी ॥ मज्ज्ञानाद्दर्शनात्सद्यो मल्लिंग·
स्य च सोस्म्यहं ॥९१॥ एवं हि महिमा देवि मम लिंगस्य किं पुनः ॥ धृते तु तस्मिन्स्वतनौ सर्वो लिंगमयी तनु ॥९२॥

लीनार्थकमपिताशि यत्तल्लिंगमुदाहृतं॥तल्लिंगमयमित्येतच्छरीरं तस्य धारणात्॥९३॥देव्य उवाच॥वृ
षध्वज वृषारूढ विरूपाक्ष विषादन॥न ते कुर्वंति किं सर्वे लिंगधारणमीश्वर॥९४॥ईश्वर उवाच॥कथं भवि
ष्यति शिवे विनामत्करुणां नृणां॥कर्मपूरीतदृष्टीनां मन्मायामोहितात्मनां॥९५॥तदनुष्ठानमात्रेण॰
विधूयाखिलबंधनं॥सर्वकल्याणनिलयं मम सायूज्यमेति सः॥९६॥ज्ञानतो ज्ञानतो वापि शक्त्या
शक्त्यादिनापि वा॥यन्न्यूनमतिरिक्तं वा वस्थात्रययुतोपि वा॥९७॥द्विगुणं याति साद्गुण्यं शैवस्य॰
शिवयोगिनः॥सकृल्लिंगार्चनेनैव यत्तद्रूप महेश्वरी॥९८॥सर्वत्र मम दर्शित्वम् भक्तिरेकांतरूपिणी॥
मन्मतस्थ चमत्प्राप्त्ये हृयमेव हि साधनम्॥९९॥न पुष्पिणी त्यजेत्पूजाम् न भुक्त्वा नाशुचिस्त्वपि॥य॰
द्देवपूजयेल्लिंगं तदानुग्रहकोध्वहम्॥१००॥स्मरणात्कीर्तनाद्देवी मम लिंगस्य धारणात्॥अनायासेनाः
तिशायम् फलं स्यादुत्तमोत्तमम्॥१०१॥नमोस्ति यस्मिन्कारुण्यम् नतस्यात्र रुचिर्भवेत्॥यद्देवस्याहत्ररु॰ ॥५॥

त्रिस्तदामुक्तोनसंशयः ॥१०२॥ अतोममरहस्यंहिमतमेतन्महत्तरम् ॥ शैवम्पाशुपतंचेतियद्देकमूना
मभेदतः ॥१०३॥ तत्रसत्यविधेष्वेषुवीरशैवमहत्तरम् ॥ शैववीरत्वमात्रेणकिंपुनर्लिंगधारणात्
॥१०४॥ यथैकंवदर्शनालोकेशिखरस्यशिवालये ॥ नश्यंत्यनेकपापानिशिवत्वज्ञानसंभवात् ॥
॥१०५॥ तथैवदर्शनाल्लिंगधारिणःशिवयोगिनः ॥ सद्योनश्यंतिपापानितमःसूर्योदयेयथा ॥१०
६॥ अतएवमहादेविगुप्तंमतमिदंकलौ ॥ मन्मतज्ञानमात्रेणमुच्येयुरपिपापिनः ॥१०७॥ लाभःशै-
वमतस्यैकोवीरशैवप्रवर्त्तनम् ॥ भक्तिभूतदयाचेतिमतंकैवल्यचतुर्विधम् ॥१०८॥ यदिनास्त्यधि-
कंमत्तस्तदास्यान्मन्मतापरम् ॥ यदिस्यान्मत्परंदेविमत्स्वातंत्र्यकुतस्तदा ॥१०९॥ इत्थंतेकथितंदेवि
मतभेदमतःपरम् ॥ तारतम्यंफलंचापिकिंभूयश्रोतुमिच्छसि ॥११०॥ इतिश्रीपारमेश्वरतंत्रेशि
वाद्वैतसिध्धांतेवीरशैवदीक्षाप्रकरणेमतभेदनिरूपणम्नामप्रथमपटलःसमाप्तम् ॥१॥ छ॥

॥श्रीसांबसदाशिवार्पणमस्तु॥श्रीसीतारामचंद्रार्पणमस्तु॥छ॥१॥छ॥छ॥छ॥छ॥छ॥छ॥छ॥

श्रीगणेशायनमः॥श्रीगुरुभ्योनमः॥त्रियंबकनमस्तेस्तुत्रिपुरघ्नयमांतक॥वदमेकरुणासिंधोलिंगधार
णलक्षणं॥१॥दीक्षादिक्रमशः सर्वं सज्जिकाधिशुणाधिकं॥शिवाग्निजननंचापिसर्वंविस्तरतः प्रभो॥२॥ईश्व
रउवाच॥शृणुदेविप्रवक्ष्यामिलिंगानांभेदमादितः॥दीक्षायाः सज्जिकादेश्चसर्वंनिगदितोमम॥३॥ममलिं
गमिदंसर्वंजगस्थावरजंगमं॥ममलिंगमिदंविध्धिपाषाणादिविनिर्मितं॥४॥नादेयंशैलसंभूतं पुण्यक्षे-
त्रसमुद्भवं॥गंगोद्भवंसागरजंलिंगंतन्ममसंमतं॥५॥यद्देविशिवनाभाख्यंलिंगंतत्परमुत्तमं॥यद्दहितेहिगु
रुणालिंगंसर्वोत्तमोत्तमं॥६॥कामान्यन्यानिलिंगानितत्तदिष्टार्थदाहिनी॥सौवर्णपारदादीनि स्थूलंस्थूलं
प्रशस्यते॥७॥क्रमुखाकृतिमारभ्ययावदिच्छास्तिधारणे॥उत्तरादुत्तरंश्रेष्ठंममलिंगमलिंगमहेश्वरी॥८॥ राद्धे
पारदंसर्वकामायसौवर्णंवित्तकामिनः॥रजतंतुप्रजाकामितांम्रंशत्रुविनाशनं॥९॥त्रपुजंरोगनाशायसी
सकंपापनाशनं॥स्फटिकंज्ञानदंपुण्यंरुद्राक्षंमोक्षदायकं॥१०॥दारुजंसर्वनाशायकांस्यरोगार्त्तिदायकं

।।पार॰ तं॰।। ।।श्रीशैलजं महादेवि विद्येहि कामुष्मिकं प्रदं ।। ११ ।। सर्वोत्तमोत्तमं लिंगं सर्वाभिष्टार्थदायकं ।। यद्दत्तं गुरुणा देवि ।।अध्या॰।।
।।३।। लिंगं तद्देहमेव हि ।। १२ ।। बदरिकाफलमानं तु कृतं धर्माभिवृध्धिदं ।। क्रमुकीफलमानं तु धर्त्तुः सर्वार्थदा ।।२।।
यकं ।। १३ ।। जंबीरफलमानं तु सर्वकामार्थदायकं ।। ततो धिकं प्रियं पावच्चतुर्वर्गफलप्रदं ।। १४ ।। न प्रमाणं
तदं तस्य शिवना भस्य पार्वती ।। यद्दत्तं गुरुणा तस्य सर्वलक्षणलक्षितं ।। १५ ।। सर्वसाधारणं देवि सर्वसौभा
ग्यदायकं ।। सर्वसिध्धिकरं लिंगं यच्च पाषाणनिर्मितं ।। १६ ।। सर्वोत्तमोत्तमं लिंगं यच्च श्रीशैलजं शिवे ।। दोषा
श्च बहवः संति दृष्टया दानि धरात्मजे ।। १७ ।। अन्यलिंगेषु सर्वेषु नैव पाषाणसंभवे ।। जातके मृतकाशौचमलमू
त्रविसर्जनं ।। १८ ।। रतं वा शुध्धा उद्योगे रणे निद्रादिषु प्रिये ।। कर्मणा मनसा वाचा जाग्रत्स्वप्नसुषुप्तिषु ।। १९ ।।
लिंगमुत्सृजेत्क्वापि प्राणैः कंठगतैरपि ।। न पूजापि परित्याज्या कष्टेपि कुलनायके ।। २० ।। न सद्गुरुस्मरणं वा
पि मम लिंगस्य सद्गुरोः ।। तेष्वेकतममादाय लिंगं स्वाभिमतं शिवे ।। २१ ।। धारयेदात्मता हात्स्वं प्राणलिंगं ममे ।।१।।

तितत्॥अथकुर्यान्महादेवि सज्जिकाख्यंतदालयं॥२२॥यथा स्थिरस्यलिंगस्य तद्वदेवचरस्यच॥स्थिरलिं
गालयंदेविप्रसिद्धंदृष्टलक्षणं॥२३॥जानास्येतत्स्वरूपंच चरलिंगस्यशांकरी॥लक्षणंपूजनंविधिमाचारं
लिंगधारिणां॥२४॥क्रमेणशृणुतत्सर्वं तारतम्यफलंशिवे॥स्थिरलिंगार्चकोलोकेनशुद्धाःपंक्तिकर्मसु॥२
५॥धृतलिंगार्चकाःसर्वे पावनाःपंक्तिकर्मसु॥पृथक्स्थित्वाचलिंगस्य स्वदेहस्याप्यशुद्धिजं॥२६॥अर्हन
योग्यतालिंगंनचैवंशिवयोगिनः॥धृतलिंगशरीरत्वात्सदातुत्तानसंभवात्॥२७॥शुचिरेवसदातस्यनशु
चिर्नैवचाशुचिः॥गच्छन्तिष्ठन्स्वपन्भुंजन्जाग्रन्नपिहसन्नपि॥२८॥स्वादन्पिबन्शयानोवालिंगपूजां
समाचरेत्॥यथोपविश्यपीठादौशिवयोगीप्रवर्तते॥२९॥तथोपविष्टएवासौधावान्पूजितवानपि॥नका
यक्लेशासहनंनोपवासादिपीडनं॥३०॥यथेच्छामपिभुंजानोभोगालिंगंसमर्चयेत्॥दयाभूतेषुमद्भक्तिसर्वत्र
समदर्शनं॥३१॥मल्लिंगधारणंनित्यंभक्तिरेषाचतुर्विधा॥तस्मात्सौलभ्यमीशानितारतम्येनयोगिनां॥३२॥

मतस्यममचान्यस्यमन्मतेलिंगधारणात्॥ तस्यालिंगस्यविश्वेशिचरंकुर्याच्छिवालयं॥३३॥पंचसूर्यात्रो
ष्ठलिंगस्ययावसूर्णंतथाभवेत्॥सौवर्णमुत्तमंदेवियदिशक्तिस्तथाचरेत्॥३४॥ राजतंपित्तलंताम्रंनैवः
कांस्येनकारयेत्॥सीसेनपुणादेवितांतवीपादिकापिवा॥३५॥एतेष्वन्यतमंनित्यंनान्यकुर्यादनादपि॥परित्य
ज्यापियत्नेनप्राणमानधनादिकं॥३६॥संरक्षणीयंगिरिजेलिंगमेवनसंशयः॥संभावितेनद्रव्येणविना
नंतुपटोद्भवं॥३७॥कर्कटाद्याकृतीरन्यायथाकामफलप्रदां॥पंचसूत्रप्रमाणेनसज्जिकालिंगरूपिणी॥३८॥
तादृशास्यचलिंगस्यभोगमोक्षैकसाधनी॥भोगस्वर्गापवर्गायममनंदीश्वराकृतिः॥३९॥भोगमोक्षैकफः
लदासज्जिकार्कफलाकृतिः॥ऐश्वर्यविजयायुष्यतेजःप्रज्ञाविलासकृत्॥४०॥आयुष्मत्पुत्रसौभाग्यफलदा
मोदकाकृतिः॥ऐश्वर्यविजयायुष्यतेजःप्रज्ञाविलासकृत्॥४१॥सज्जिकाशिवलिंगस्यबिल्वीफलसमाकृतिः
॥शिवलिंगाकृतिःसज्जाभोगमोक्षैकसाधनी॥४२॥यद्यादिष्टतमंदेविभूषणंमणिकांचनं॥तदेवसज्जिकाकृ ॥२॥

त्वा सर्वकामं समश्नुते ॥४३॥ चचतुरस्रं पंकजाभं वा वर्त्तुलं बिंबकोपमं ॥ यथा संदर्शितं देवि गुरुणा तत्तदाचरेत् ॥

४४॥ एकद्वारक पाटादापाद तृतीयशोभिनी ॥ संनध्धगुणसंबध्धा दृढसंतानशोभिनी ॥४५॥ सौवर्णस्या

द्यदिगुणः सर्वसौभाग्यदायकः ॥ राजतः पुत्रकिर्त्तिस्यात्तां म्रश्चेध्धनधान्यकृत् ॥४६॥ पैत्तलं सर्वभोगाय कांस्य

कल्मषनाशनं ॥ त्रिपुसिसमयोवापि सभावाभिष्टफलप्रदः ॥४७॥ दारिद्र्यायचसंविध्धि परजः सर्वदुःखकृत् ॥ क

र्पिटः सर्वभोगाय तांतवी सर्वकामदः ॥४८॥ शुक्लो ज्ञानप्रदस्तत्र रक्तोवश्यकरो गुणः ॥ श्यामः शत्रुभयकरः पीतपु

त्रप्रदायकः ॥४९॥ चित्रो विचित्रफलदः सुदृढः श्रेद वर्जितः ॥ अग्रंथिरज्जुसर्पस्याद्दानाभ्यां कंठमध्यगः ॥५०॥ उ

यावदिच्छा भवेद्देवि सज्जिकागुण उत्तमः ॥ तावदेव प्रकुर्वीत सज्जिकागुणमीश्वरी ॥५१॥ या ॥ सज्जिकाया भवे

द्रूपामद्रूपोयोगुणः शिवे ॥ उभयोरावयोर्योगाज्जगदेतच्चराचरं ॥५२॥ पुंरूपमखिलं देवि ममरूप न संशयः ॥

स्त्रीरूपमखिलं देवि तवरूप न संशयः ॥५३॥ मया विनाक्वचिन्नास्ति तवरूपं तथा मम ॥ तदेवरूपलाभाय गुण

।।पार॰ तं॰।। योगप्रकीर्तितः।।५४।।शिवस्यैव भवेद्द्वारमेकं स्यादेकमेव हि।। सार्गलं तीर्थगरं सर्वमेकात्मिकं शिवे।।५५।।य ।।अध्या॰।।
।।२।। स्य द्वारयुगे देवि गोरिका त्वायनी उभे।। पार्श्वयोः शार्वरी रौद्री भद्रकाल्युपरिस्त्वधः।।५६।। यस्याः पादत्रयं धर्म॰ ।।२।।
कामार्थात्मकमीश्वरी।। यस्या महात्मकगुणो भोगमोक्षफलात्मकः।।५७।। गुणस्य यद्द्वयोरेव संबंधौ द्वौ सु
वर्तुलौ।। पद्मकूटमलसद्रूपौ प्रोक्तौ ज्ञानक्रियेति च।।५८।। तदुपर्येकमीशानि चित्रमेकं स्वरूपकं।। आत्म॰
पूर्वाग्रमांकुचद्यात्माग्रमवकुं चयेत्।।५९।। पार्श्वद्वयाग्रसंयोज्य यथोक्तं च गुणा ततः।। उक्तमेवमया लिंगस॰
ज्ञिकागुणलक्षणं।।६०।। तद्धारणक्रमं वक्ष्ये दीक्षापूर्वं सविस्तरं।। यस्तु मत्करुणापात्रं चरमं जन्मयस्य वा।
।।६१।। तस्यैव जायते भक्तिर्मम लिंगस्य धारणे।। निर्विष्टविषयः शांतः सर्वत्र समदर्शनः।।६२।। मुमुक्षुरीश्व
रे भक्तः श्रीगुरुं शिवमाश्रयेत्।। सर्वलक्षणसंपन्नं सर्वज्ञं सर्वसंमतं।।६३।। सदाचाररतं शुद्धं शिवलोकमलो
लुपं।। यथार्थवादिनं शांतं द्वेषासूयाविवर्जितं।।६४।। विदिताखिलशास्त्रार्थमिंगितज्ञमनाकुलं।। अनाथ ।।३।।

तुरमात्मज्ञमकामुकमवंचकं ॥ ६५ ॥ वाग्मिनंशिवतत्वार्थबोधकंहृष्टमानसं ॥ एतादृशगुणोपेतमुपेयाद्गुरुः

मीश्वरं ॥ ६६ ॥ रिक्तहस्तेननोपेयात्तूपसर्पन्गुरुंशुचिः ॥ नमस्कुर्यात्सविधानेनसाष्टांगंभक्तिपूर्वकं ॥ ६७ ॥

कृतांजलिपुटस्थित्वास्तुत्वाविज्ञापयेततः ॥ नमस्तेनास्तिभगवान्शिवायगुरुरूपिणे ॥ ६८ ॥ देहिशिष्यम

येवीरशैवंदीक्षामभीष्टदं ॥ इतिपृष्टोथशिष्येणयदिदातुमनागुरुः ॥ ६९ ॥ विशोध्यवर्षत्रितयमथतंदीक्ष

येद्बुधः ॥ कुशलंश्रीगुरोभक्तंश्रीगुरोःप्रियकारिणं ॥ ७० ॥ कर्मणामनसावाचाकायेवानुचरंसदा ॥ गु

रुमंत्रात्मदेवेषुतथैवासनमुद्रयो ॥ ७१ ॥ अभेदभावनाधारंसत्यवादिनमास्तिकं ॥ प्राणार्थमानवसुभिः

मनोवाक्कायकर्मभिः ॥ ७२ ॥ सर्वदासर्वभावेनगुरुशुश्रूषणेरतं ॥ अप्रमत्तमुदारागंदृढचित्तमनामयं ॥

॥ ७३ ॥ असत्यवादरहितमवंचकमद्रुहदं ॥ अनर्थालोभमर्थाढ्यंमृदुसंभाषणप्रियं ॥ ७४ ॥ इत्यादिगुणसं

पन्नमथतंदीक्षयेच्छिवे ॥ हस्तमस्तकसंयोगमाचरेच्छिवमस्मरे ॥ ७५ ॥ अस्तुतिष्टशिवाज्ञेतिहंगीकु

॥पार॰ तं॰॥ र्याद्गुरुस्ततः॥ यः सदागुरुसेवायां अप्रमत्तोजितेंद्रियः॥७६॥ भक्तिमुक्तिफलप्राप्त्यैसंसेवेदीशधियागुरुं॥ ॥अध्या॥
॥५॥ ॥नलंघयेद्गुरोछायामात्मछायांतथागुरौ॥७७॥ प्रसारयेत्स्वपत्लेन शिष्योभुभुकदाचन॥ उच्चासनंनसेवे॰ ॥२॥
तनोच्चर्भूयात्तदग्रतः॥७८॥ मुखावलोकीसेवेतस्प्रसन्नमनोमुखः॥ क्रूक्रैपिनालनःक्लेशांतदग्रेसंप्रकाश॰
ये॥७९॥ नचेष्टयेद्यथालेछंनान्यगोष्ठिंसमाश्रयेत्॥ नगुरोरग्रतोगच्छेन्नस्वपेद्गुरुसन्निधौ॥८०॥ सहश्री॰
गुरुणाशिष्योनकुर्यात्क्रयविक्रयं॥ नोच्चैर्हसन्नप्रलपेनोपविश्येत्तदाग्रतः॥८१॥ शय्यावासनवस्त्रादि॰
यत्तस्पृष्टंतुपूजयेत्॥ पादुकावाहनादीनिनापसव्यंव्रजेद्गुरोः॥८२॥ समर्थगुरवेश्रीयायात्सद्वादृष्टंतथासं॰
नः॥ भावयेछ्रीगुरोरूपंजगदेतच्चराचरं॥८३॥ संस्मरेछ्रीगुरोर्नामजाग्रत्स्वप्नस्सुषुप्तिषु॥ कर्तव्यंतुनमस्कारे॰
ज्येष्टपूज्यशिवादिषु॥८४॥ प्रणमेद्यत्रकुत्रापिगुरुमेवहृदिस्मरन्॥ इत्यादिगुणसंपन्नंमुपपन्नंस्वभक्तितः
॥८५॥ परिगृह्यगुरुःशिष्यंशिवदीक्षास्स्रयोजयेत्॥ इषोर्जमार्गशीर्षेषुतपस्यपितपस्यके॥८६॥ माधवेशु

क्लपक्षेतु पूर्णास्तुचविशेषतः॥जयास्तु शिवदीक्षायउत्तरोत्तरवृद्धिकृत्॥८७॥ पंचम्यांतु प्रजावृद्धिर्दशम्यां
तुपशुवृद्धिकृत्॥पौर्णमास्यांतुदीक्षाच चतुर्वर्गफलप्रदा॥८८॥ द्वादश्यांच चतुर्दश्यां नवम्याष्टमीदिने॥०
शिवरात्र्याममायांच कार्त्तिके सोमवासरे॥८९॥शुक्रार्कभौमवारेषुमघार्द्रारेवतीषुच॥श्रोणाश्विनीभर॰
ण्याग्निस्वातीमूलेंदुविष्णुषु॥९०॥फल्गुनीशततारासु स्वजन्मर्क्षेगुरोस्तुवा॥वैधृतिंचव्यतीपातमतिगंडं
चगंडकं॥९१॥शूलव्याघातमितरे वर्जयित्वाखिलाः शुभाः॥भद्रंवाकरणंदेवि किंतुस्तुघ्नमपिबालकं॥९
२॥मुक्त्वेतराणिगिरिजे यथायोगंसमाचरेत्॥सर्वलक्षणसंपन्ने दिनेकुर्यात्तथापि वा॥९३॥दोषालय
त्वंगुणाधिक्यंवीक्ष्यदीक्षांप्रयोजयेत्॥अपूर्वदीक्षाकरणे विधिरेषउदाहृतः॥९४॥यद्यावांतरदीक्षाचे
त्सर्वकालोनसंशयः॥यदिनश्येत्प्रमादेनलिंगमन्यद्यथाविधि॥९५॥दीक्षापूर्वप्रकर्तव्यं यदिसन्निक
यासह॥स्फुटतेतुक्वचिल्लिंगे दीक्षांसद्यः समाचरेत्॥९६॥ मध्येभेदेमहादेवि तडागाधाजलेक्षिपेत्॥एकरा·

त्रीविधानेन विनाहोमाभिषेचनं॥९७॥ संस्कृत्य धारयेल्लिंगं न दोषस्तत्र विद्यते॥ अथ चेत्सज्जिका नाशस्तदा
न्यां करियेत्पुनः॥९८॥ प्राणस्थापनमारभ्य शिष्टं संस्कारमाचरेत्॥ गुण नाशे पुनर्देवी गुणमन्यं संयोजयेत्॥
९९॥ सज्जिका गुण लिंगा हो यन्नष्टं तत्तदाचरेत्॥ यल्लिंगमोदितो लब्धं यावज्जीवं न देवहि॥१००॥ नान्यलिंगं भ
वेन्मध्ये यदि स्यात्स तु पातकी॥ सज्जिका गुणवस्त्रादि यद्दत्तं गुरुणा ततः॥१॥ यावज्जीवं त देवस्यदन्यथा यातिरौ
रवं॥ यल्लिंग गुरुणा दत्तं प्राणलिंगं न देवहि॥२॥ मध्येन दृष्टेभमाद्येन देहं त्यक्त्वा शिवं व्रजेत्॥ अतिक्रम्य गुरुं य॰
स्तु गुरुमन्यं समाश्रयेत्॥३॥ सजीवन्नेव चांडालो मृतो नरकमश्नुते॥ गुरुभक्त्या महेशानि सदा मल्लिंग धारणा
त्॥४॥ इहामुत्र सुखं तस्य सौभाग्यं च पदे पदे॥ सज्जिकादिक्रमं चाथ लिंगभेदं विशेषतः॥५॥ उक्तं त्व॰
याखिलं देवि किं भूयः श्रोतुमिच्छसि॥१०६॥ इति श्री पारमेश्वरतंत्रे शिवाद्वैतसिध्धांते वीरशैव दीक्षाप्र
करणे लिंग सज्जिकादि स्वरूप निरूपणं नाम द्वितीयपटलः समाप्तं॥२॥ ॥ ॥ ॥ ॥ ॥ ॥

श्रीगणेशायनमः॥श्रीपार्वतीरमणायनमः॥देव्युवाच॥नमस्तेमेरुकोदंडधारिणेफणिहारिणे॥वद
विश्वेशदीक्षायाविधानंपरमेश्वर॥१॥ईश्वरउवाच॥शृणुवक्ष्यामिदेवेशिदीक्षाविधिमनुत्तमं॥यस्यवि·
ज्ञानमात्रेणयोग्यस्यालिंगधारणे॥२॥उपलिप्यगृहंसर्वंम्यगुक्तलक्षणकेहिते॥स्रुधादिशोभितंकुर्या·
द्रंगवलयाद्यलंकृतं॥३॥वितानतोरणाभ्युक्तंधूपदीपविराजितं॥सन्मंगलसमायुक्तंयथाविभवविस्तरं॥४॥
यथाशक्तियथाभक्तिमनोन्मत्स्यर्धिसंयुतं॥कार्यंहिवैभवंदेविवित्तशाठ्यंनकारयेत्॥५॥यजमानःसमुत्थाय
निर्वृत्यप्रातरह्निकं॥मित्रबांधवसंयुक्तोमंगलस्नानमाचरेत्॥६॥स्रुशुभेस्रुसमेदेशगोमयेनोपलिप्यच॥र
क्तमृत्तिकयातत्रविलिप्यचतुरस्रकं॥७॥बाहुमात्रप्रमाणेनपंचवर्णैर्विलेखयेत्॥रंगकैश्चित्रकैःपद्मैःसर्वत्र
समलंकृते॥८॥मंडलेनूतनंवस्त्रमाछाद्यतदुपर्यथ॥पंचप्रस्थप्रमाणेननिक्षिपेछालितंदुलान्॥९॥तदुपर्यम
लंकुंभंनिक्षिपेन्नूतनंदृढं॥अनुलिप्यसहाभ्युक्तमापूरितजलंशिवं॥१०॥पंचपल्लवसंयुक्तंकुंकुमाद्यैरलंकृतं॥अ

श्वत्थोदुंबरप्लक्षवटचूतमहीरुहान् ॥११॥ कलशोपरितः सूत्रं वेष्टयित्वा यथाविधिः ॥ नदंतर्नवरत्नानि निक्षिपे
द्भक्तिशक्तितः ॥१२॥ सुवर्णं वा यथाशक्तिस्तत्सर्वं गुरवे र्पयेत् ॥ प्राणप्रतिष्ठां कुंभस्य कुर्यान्मूलेन पार्व-
ती ॥१३॥ गुणितं पट्टवसनं निक्षिपेत्कलशोपरि ॥ अबाध्य कंठहारिद्रमावेष्टितमहांशुकं ॥१४॥ संवेष्ट्य
मालिकाभिश्च दिव्यधूपैः सुधूपयेत् ॥ चत्वारऋत्विजस्तत्र गुरुरेकस्तु पंचमः ॥१५॥ समर्चयेयुः कलशं बिल्व
पत्रैस्तिलाक्षतैः ॥ दूर्वाभिः कोमलाभिर्द्रोणैश्च करवीरकैः ॥१६॥ पंचाक्षरेण तारेण पराप्रासादमंत्रतः ॥ शक्ति
पंचाक्षरेणैव पंचब्रह्मानुवाककैः ॥१७॥ अर्चयंति पृथक्केते पंचैतल्लिंगमृत्विजः ॥ ध्यात्वा बाह्यमहादेवं कल-
शोपरिपूजयेत् ॥१८॥ मामनाद्यंतमीशानं उमया सहितं शिवं ॥१९॥ चतुर्भुजं चंद्रकलावतंसं वराभयेरु-
रुकुठारपाणिं ॥ वामांकसंशोभितशैलकन्यां भजेन्महेशं परमात्मरूपं ॥२०॥ अथ संपूज्य विधिवत्षोडशोप-
पचारकैः ॥ यस्य हस्त्याहिकर्मांते समाप्य कलशार्चनं ॥२१॥ उपस्थानं प्रकर्तव्यं ऋत्विग्भिरपि पंचभिः ॥

श्रीरुद्रस्यानुवाक्येनमूलेनमनुनाशिवे॥२२॥एवंहिनत्रयंकुर्यात्प्रत्यहंकलशार्चनं॥षड्रसैरन्नपानाद्यैर्भोः
जयेल्लिंगधारिणः॥२३॥आबध्धकंकणोदेविनियतोनियतेंद्रियः॥एकहारोभवेन्नित्यंयजःमानःपयोव्रः
ती॥२४॥अथतद्दक्षिणेभागेकुंभस्थापनदेशतः॥वितानादिसमोपेतेस्फकृतेवेदिकोपरि॥२५॥निक्षि
प्यपीठममलंमलमूत्रेणतद्गुरुः॥सद्योजातेनतदुपर्यात्छाद्यांशुकमुत्तमं॥२६॥वामदेवेनतदुपर्यातल्लिं
गंविनिक्षिपेत्॥अघोरेणाथलिंगस्यसज्जिकायागुणस्यच॥२७॥तत्पुरुषस्यानुवाक्येनईशानस्यानुः
वाक्यतः॥क्रमेणकुर्यात्प्राणप्रतिष्ठांगुरुरादरात्॥२८॥पूर्वोक्तमेवध्याईतल्लिंगरूपांतनुंमम॥आवाह
नादिकुर्वीतगुरुर्भक्तिसमन्वितः॥२९॥मूलेनवाहनंकुर्याद्दासनंशंभवेनमः॥पाद्यमीशायदेवायदः
द्यादर्घ्यंशिवायच॥३०॥दद्यादाचमनंस्नानंमहादेवायतेनमः॥पंचामृतस्नानमथकुर्यात्संचानुवाकः
कैः॥३१॥आपोहिष्ठेतिशुध्धोदस्नानंलिंगायकारयेत्॥दद्यात्कपर्दिनेवस्त्रमुत्तरायंत्रिशूलिने॥३२॥

त्रे

॥पार॰तं॰॥ यज्ञसूत्रौ ततोदद्यान्नमः पशुपतयेशिवे ॥ गंधं कामांतकायेति चाक्षतांमखघातिने ॥ २३ ॥ पुष्पंवृषध्वजायेति ॥अध्या॰॥
॥२॥ समर्प्यांगानिपूजयेत् ॥ शिवायपादौगुरवेगुल्फौजंघेमृडायच ॥ २४ ॥ जानुनीशंकरायेतिनमउरूभवाय ॥३॥
च ॥ कटिंपिनाकहस्ताय नाभिंमेरुधनुर्भृते ॥ २५ ॥ उदरंविश्वरूपायविरूपाक्षायचस्तनौ ॥ हृदयंपार्वती
शायवक्षकैलासवासिने ॥ २६ ॥ कंठंतुनीलकंठाय स्कंधौस्कंदहस्कतायते ॥ अनंतबाहवेबाहूनूहस्तान्ह
स्तौत्वचेनमः ॥ २७ ॥ अंगुली रंगजहतेकक्षपंचमुखायते ॥ कर्णौदिग्वर्णिनेदेवि नासिकां सर्वगंधिने ॥ २८
वक्त्रं तुसर्ववक्त्रायनेत्राणित्र्यंबकेनमः ॥ भ्रुवौभूभारभंगाय ललाटमल्लिकाक्षिणे ॥ २९ ॥ शिरःसर्वोत्त
मायेति सर्वांगंशशिमौलिने ॥ पूजयित्वाखिलांगानि महापूजामथाचरेत् ॥ ४० ॥ सहस्रनामभिर्देवि
रुद्रसूक्तोक्तनामभिः ॥ मुक्तमंत्रेणचान्यैर्वा स्तोत्रमंत्रैः समर्चयेत् ॥ ४१ ॥ पंचपुष्पाणिपूजायामव॰
श्यंविधिनार्चयेत् ॥ द्रोणंच बिल्वपत्रंच नित्यंनित्यार्चनेशिवे ॥ ४२ ॥ तिलाक्षतैस्तंडुलैर्वानित्यंपूजा ॥२॥

समाचरेत्॥ यान्यन्यानि सुगंधीनि वन्यानि ग्रामजानि वा॥४३॥ सर्वस्यान्मम पूजायां पुष्पं पल्लवं पत्रकं॥ चं
पकै जातिकुसुमैर्मल्लिकावनसंभवैः॥४४॥ पद्मैरपामार्गकैश्च कल्हारैश्च कदंबकैः॥ चंपकैर्जातिकुसुमैर्म-
ल्लिकावनसंभवैः॥४५॥ उत्पलैः करवीरैश्च रजैश्च तुकदंबकैः॥ चूतपुन्नागबकुलमरुगैर्दवनादिभिः॥४६॥ कु
टुजैर्वा कुरुवकैः कुंदकेसरनागकैः॥ इत्याद्युतैरनुक्तैर्वा मम मल्लिंगं संपूजयेत्॥४७॥ दूर्वाभिस्तुलसीबिल्वैः करवीरै
श्च कोमलैः॥ द्रोणैश्चंपकभिर्नित्यं मम मल्लिंगं समर्चयेत्॥४८॥ मोक्षार्थी बिल्वजैः पत्रैरर्चयेच्चातिलाक्षितैः॥ धर्मार्थी
द्रोणकुसुमैरर्थार्थी करवीरजैः॥४९॥ धत्तूरैरर्ककुसुमैरपामार्गैर्मनोरथी॥ तुलसी शत्रुनाशाय जातिर्वश्या
य योषितां॥५०॥ अर्कपुष्पं रागवश्यं तु वश्यं कमलार्चनं॥ मल्लिकाभिर्जयार्थी च दूर्वाभिः कीर्तिकामनः॥५१॥
आरोग्यकामस्तु सलजैः पुत्रकामी कुरुंटकैः॥ पुन्नागैः पशुकामा च सर्वार्थी सर्वसंभवैः॥५२॥ एवं संपूज्य विश्वेशि
प्रत्यहं तु दिनत्रयं॥ तथाष्टांगयुतं धूपं गंधाव्यग्रहकारिणे॥५३॥ कर्पूरादिसुदीपांश्च सोमसूर्याग्निचक्षुषे॥ नै

॥पार॰ तं॰॥ वेद्यंषड्रसोपेतंयद्यद्योग्यंममादरात्॥५४॥अन्नानांपतयेतुभ्यंइतिमंत्रेणनिर्मलं॥तेतत्समर्पयेद्देविलिंगरू ॥अध्या॰॥
॥३॥ पेमयिप्रिये॥५५॥तांबूलंचसकर्पूरंरसज्ञायेतिमंत्रतः॥घृताक्तिवर्त्तिसंयुक्तंनीराजनमथाचरेत्॥५६॥ ॥३॥
मंत्रपुष्पंततोदद्यात्त्र्यंबकेतिस्कमंत्रतः॥प्रदक्षिणंनमस्कारान्कृत्वास्तोत्रस्तुवेदथ॥५७॥क्षमापन्नंप्रा॰
र्थनंचयस्यस्मृत्वाक्षमापयेत्॥रात्रौजागरणंकुर्यान्ममलिंगस्यसन्निधौ॥५८॥लिंगेनसहकुर्वीतसज्जि
कायागुणस्यच॥प्राणस्थापनमारभ्ययथालिंगस्यतत्तथा॥५९॥यदितंतुपटोत्पन्नोनचैवंसज्जिकागुणैः॥
यदिलोहमयीसज्जायदिवाताद्दशोगुणाः॥६०॥लिंगेनसहसंस्कारंकुर्याद्देवमतंद्विजः॥शैथिल्येसज्जिका
देस्तुसंस्कृत्यपुनरन्यतः॥६१॥अष्टबंधेविशीर्णेतुपुनर्बंधंचकारयेत्॥यदिमोहस्त्यजेद्देहंसचांडालोभविष्यति
॥६२॥यन्नष्टंतत्सर्वीतयथाशास्त्रंगुरोर्वचः॥नतिष्ठेन्निपमेनासौलिंगसंपूज्यनाहृते॥६३॥नान्यधर्मोभवे
द्धर्मोनधर्मोधर्मएवच॥नान्यधर्मैर्नपाषंडैर्नदुर्वृत्तैर्नलोलुपैः॥६४॥नधूर्त्तैर्नगुरोर्भक्तैर्नाभक्तैर्नान्ततो ॥३॥

क्ति भिः॥ नमतहे षिभिर्मूखैर्नानाचाररतैरपि॥६५॥ नाशानर्थलुब्धैश्च नागुरुकार्यकारिभिः॥ नस्त्रीषुलो
लुपैर्जारैर्न चोरैरालकारिभिः॥६६॥ न दूषकैर्हासकैर्वा नानार्हैश्च कचित्प्रिये॥ सहोपवेशयेद्भावेद्भीयालं
गमान्वरेत्॥६७॥ स्वपेद् छेदुपश्लोके नालोकेनाभिवादयेत्॥ यदिशाक्त स्तदालिंगंशिवयोगीसमर्चयेत्॥
६८॥ पुण्यकालेषुयोगेषुविशेषेणसमर्चयेत्॥ संक्रान्ताविषुवे चैव स्वजन्मत्रितये दिने॥६९॥ नवम्यां च चतुर्द
श्यां सीतायां सोमवासरे॥ यथाशक्त्यार्चयेल्लिंगं पौर्णमास्यां विशेषतः॥७०॥ अर्धोदयस्य लक्षणमहा
ज्योतिषे॥ अमार्कश्रवणे पाते युक्ताचेत्पुष्यमाघयोः॥ अर्धोदयस्य विज्ञेयः किंचिन्न्यूनो महोदयः॥७१॥
कृष्णपक्षे त्रयोदस्यां मघामिंदुकरे रविः॥ यदानदागजछाया श्राद्धेसर्वेरमापते॥७२॥ नभस्याशितपक्षेच ष
ष्ठीकुजंदिनेयदा॥ रोहिणी पातयोगेन साषष्टीकपिलास्मृता॥७३॥ अर्धोदयादियोगेषुग्रहणेचंद्रसू
र्ययोः॥ व्यतीपातेकुयोगेन्वप्रदोषेचविशेषतः॥७४॥ प्रतित्रयोदशीरात्रौशनियोगेविशेषतः॥ कृष्णाभो

माघचतुर्दश्यां गुरूणां च मृतेहनि ॥ ७५ ॥ पित्रोः सिध्धिंगतदिने विशेषेण समर्चयेत् ॥ शुक्लभौमचतु
र्थ्यां तु कृष्णाष्टम्यां विशेषतः ॥ ७६ ॥ नृत्यवादित्रगीताद्यैर्यथाविभवविस्तरं ॥ दरिद्रः करतलैर्वा घं
टानादेन चार्चयेत् ॥ ७७ ॥ श्रूयते हि जनैर्यावत् घंटनादसमंततः ॥ तावत्पापानि रक्षांसि राक्ष्या
स्थातु न हि क्षणं ॥ ७८ ॥ कोटयो ब्रह्महत्यानामगम्यागमकोटयः ॥ श्रवणेनैव घंटाया नादस्य यांति सं
क्षयं ॥ ७९ ॥ तथैव यत्नतो देवि ताडयेज्जयघंटिकां ॥ तदभावेपि यत्नेन कांस्यनादं समाचरेत् ॥ ८० ॥
कुर्वीत कहलानादं ममलिंगार्चनोत्सवे ॥ लिंगधारी विशेषेण शंखनादेन पूजयेत् ॥ ८१ ॥ सर्वभावेः
पि यत्नेन यतः शंखो मम प्रियः ॥ दीपान्प्रज्वालयेद्देवि ममलिंगस्य सन्निधौ ॥ ८२ ॥ अभिषेकः प्रक
र्तव्यो यथाशक्त्यामलोदकैः ॥ तुलकोदकमारभ्य यावल्लक्ष्याभिषेचने ॥ ८३ ॥ तावदासेचयेल्लिंगं अ
धिकं अधिकं फलं ॥ ग्रंथांतरे अष्टगंधस्य लक्षणं लिख्यते ॥ कस्तुरीकुंकुमं गंधं कर्पूरं च सुशोभनं ॥ उसि ॥ ४ ॥

रं चागरुः कोष्टं तमालदलमेवच ॥ ८४ ॥ शिवाष्टांगं धमेतत्तु ह्यष्टमूर्तिस्वरूपकं ॥ साधयेद्यत्नतोगंधंक
स्तुर्यादिस्वशक्तितः ॥ ८५ ॥ अशक्तः सर्वयत्नेन द्रोणपुष्पैः समर्चयेत् ॥ सर्वदासर्वयत्नेन सर्वंत्यक्त्वातु पार्व
ती ॥ ८६ ॥ सर्वलाभासरंमत्वा लिंगार्चनपरो भवेत् ॥ चतुर्थेतु दिने देवि कुलोपस्यवगाहनं ॥ ८७ ॥ यथाशक्ति
यथाभक्ति यथाकालंयथासुखं ॥ यथासंभावितेर्द्रव्यै र्लिंगपूजापरो भवेत् ॥ ८८ ॥ यथेच्छायजमानस्य मंगलं
स्नान माचरेत् ॥ समेसबहुभिर्वृध्दैः शिवतत्वार्थवेदिभिः ॥ ८९ ॥ लिंगपूजासुनिरतैर्लिंगिभिः शिवयोगि
भिः ॥ पीठे पुराणं लैंगंम्ये नंदाशांपूजयेच्छिवे ॥ ९० ॥ नचूर्मिका सदा धार्या भक्तस्यांगुष्ठपर्वणि ॥ नोच्छिष्टः
दोषंन्योन्यं भुंजतां धृतलिंगिनां ॥ ९१ ॥ नचप्रक्षालनंपाण्योस्तदुच्छिष्टधियाशिवे ॥ शयानः श्रीगुरोः पाद
पभाग्रेशायिता भवेत् ॥ ९२ ॥ यथाशिवेतथालिंगेयथालिंगेतथागुरौ ॥ यथागुरौतथाप्राणेतथाप्राणानु
शासने ॥ ९३ ॥ यथायथैवतच्छास्त्रमतेचापितथाभवेत् ॥ येकाभिमानसद्भक्तिर्वीरशैवमतेमम ॥ ९४ ॥ लिंग

॥ पार· तं· ॥ धारणमात्रेण कुर्तो सो मानुषः शिवे ॥ सदाविभूतिसंपर्कात् सदारुद्राक्षधारणात् ॥ ९५ ॥ धारणान्ममलिंग ॥ अध्या· ॥
·॥ ५ ॥· स्य सोहमेवन संशयः ॥ अनुमात्रमया शानि ललाटे यस्य दृश्यते ॥ ९६ ॥ मन्नामपाविता भूतिः सोहं रुद्रो ·॥ ३ ॥·
न संशयः ॥ धृतं सद्भूति सर्वांगे येपश्यंपि पापिनः ॥ ९७ ॥ तएव धन्या गिरिजे ते चान्ये यावयंति च ॥ यस्य
देहेस्ति रुद्राक्षो यावद्भस्मैक एव वा ॥ ९८ ॥ तं दृष्ट्वा दूरतो यांति पापानि विविधानि च ॥ विभूतिरपि रुद्राक्षं
लिंग यस्य त्रयं तनौ ॥ ९९ ॥ स साक्षाद्रुद्र ईशानि सोहमेवन संशयः ॥ ममलिंगार्चना भूति रुद्राक्षसमनुजा·
पनैः ॥ १०० ॥ एकैक एव मल्लाख्ये किं फलौ सर्वसन्निधौ ॥ ललाटे भस्मना पुंड्रं करे रुद्राक्षजापनं ॥ १०१ ॥·
कंठे च लिंगाभरणं सोहमेवन संशय ॥ १०२ ॥ इति श्री पारमेश्वरतंत्रे शिवोदितसिध्धांते वीरशै
वदीक्षायां लिंगार्चनविधिर्नाम तृतियपटलः समाप्तं ॥ ३ ॥ श्रीसांबसदाशिवार्पणमस्तु ॥ शुभं
भवतु ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ॥ ५ ॥

श्रीगणेशायनमः॥श्रीपार्वतीशंवंदे॥ ईश्वरउवाच॥ उपविश्ययगुरुःपीठे प्राणायामादिकंचरेत्॥ वीरशै
वाख्यदीक्षांगंकरिष्येहोममित्यथ॥१॥ कृत्वा संकल्पमीशानि होमदेशंविशोधयेत्॥ स्थंडिलंवापिकुंडंवा
यथाकामं समाचरेत्॥२॥ स्थंडिले सर्वसंपत्तिः कुंडेसर्वार्थसिध्धयः॥ स्थंडिलंत्रिविधंप्रोक्तं कुंडं पंचविधं
शिवे॥३॥ चतुरस्रत्र्यस्रवृत्तभेदा धर्मार्थकामदाः॥ चतुरस्रत्र्यस्रवृत्तार्धचंद्राब्जमदाक्रमाः॥४॥ धर्मार्थकाम
सायुज्यकैवल्यफलदायिनः॥ एतेष्वन्यतमेदेवि प्रदेशे होमकर्मणः॥५॥ पुण्याहवचनंकृत्वा नांदीकर्म समाच
रेत्॥ योगिनिभिः सहेशानि चतुर्भिर्लिंगधारिभिः॥६॥ संपूज्यशक्तितो भक्त्या गुरुरग्निमथानयेत्॥ पंच
गव्यादिकं पीत्वा सभांचशिवयोगिनां॥७॥ सूर्यारणिशिवागारशिवयोगिगृहादिभिः॥ मूलमंत्रेण चोदि
प्याभिवादेलंचमुद्रया॥८॥ ग्रंथांतरे पंचमुद्राप्रदर्शते॥ स्तंभनं चतुरस्रंच धेनुमत्स्यं तथैवच॥ योनिमुद्रान
मस्कारे पंचमुद्राः प्रकीर्तिताः॥९॥ पूर्वभागेऽग्निकुंडस्य संस्थाप्याग्निमथोपरि॥ संस्कुर्यात्स्थापनंदेशं वीक्ष

॥पार॰ तं॥ णादिभिरष्टभिः॥१०॥वीक्षणंताडनंदेविप्रोक्षणंचाभिमर्शनं॥घातनंप्रार्थनंचाभिमंत्रणंचनमस्कृतिः॥११॥ ॥अध्या॰॥
॥१॥ ॥वीक्षयेल्लक्षणेनादौयागदेशंगुरुःशिवे॥तथाष्टमंत्रितोयेनप्रोक्षणंताडनंविदुः॥१२॥तदेवप्रोक्षणंना ॥४॥
मरुज्जुतैर्क्ष्णादिभेदतः॥स्पृष्ट्वाहस्तेनतत्कुंडंजपोयद्यभिमर्शनं॥१३॥घातनंतुखनित्रेण॥खातनंहवनस्थले
॥प्रार्थयन्मूलमंत्रेणयथाशक्त्याभिमंत्रणं॥१४॥तेनैवद्वादशाजपेस्पृष्ट्वातदभिमंत्रणं॥नमस्कृतिर्नमस्का
रैरेनैरष्टभिरन्विते॥१५॥मेखलत्रयसंयुक्तेसाश्वत्थदलशोभिते॥सार्धरत्न्यंतरेगाधेताद्दक्कुव्यायामशो
भिते॥१६॥मूलेनाग्निंप्रतिष्ठाप्यपुनस्तेनानुमंत्रयेत्॥हुमितिप्रोक्षितंचाग्नौनिक्षिपेत्समिधांशतं॥१७॥ध
मन्याध्मयेदग्निंकवचेनगुरुःशिवे॥ज्वलितेग्नौपुनर्ध्यायेन्मामेवपरमेश्वरी॥१८॥चतुर्भुजमुदारांगंचं
द्रशेखरमव्ययं॥कुठारेणाभयवरंपाणिपंकजशोभितं॥१९॥वामांगालिंगितांद्रिंद्रतनयंपरमेश्वरं॥मं
दस्मितंत्रिनयनमुमारमणमीश्वरी॥२०॥अथध्यायीतभवतीमेवरूपंविचक्षणः॥उद्यद्दादित्यसंकाशाम ॥१॥

रुणाभरणां शुकां ॥२१॥ अंतर्गत महद्वन्हिं गुर्विणी कुंडरूपिणी ॥ सहतारेण मूलेन दद्याद्दाज्याहुतिर्दश ॥
२२॥ शिरोसि जगतामीशस्यनेनाग्निं विभावयेत् ॥ तद्गर्भजठरे देवी समुत्पन्नं हुताशनं ॥२३॥ नमो मन्यवेते
रुद्राय पशूनांपतये नमः ॥ नमउग्राय वीराय नमस्ते चंद्रमौलये ॥२४॥ इत्यमंत्रैः पृथगाज्येन हुनेद्देवं शताहुतीः
॥ अथ यज्ञेन कुंडस्थां ध्यायेद्रुद्रं हुताशनं ॥२५॥ सप्तहस्तं चतुःशृंगं सप्तजीवद्विशीर्षकं ॥ त्रिपाद निर्मलसु
खं स्वस्तिकासीनं शुचार्पितं ॥२६॥ तोमरं व्यजनं बालं चापबाणौ वराभये ॥ दधानं सर्वभूषाढ्यं सद्यो जातं महे
श्वरं ॥२७॥ नमो रुद्राय देवाय चेशानाय कपर्दिने ॥ हुताशनाय नीलाय लोहिताय कृशानवे ॥२८॥ सहता-
रेण मूलेन प्रतिमंत्रांतरं तदा ॥ जुहुयादाज्येन देवेशि षोडशाज्याहुतीः क्रमात् ॥२९॥ जातस्य जातकर्मार्थं हु-
नेदाज्याहुतीर्दश ॥ सहतारेण मूलेन जातकर्मेदमच्युते ॥३०॥ रुद्राग्नि रिति चेशानि नामकर्मैवमाचरेत् ॥ सह
तारेण मूलेन हुनेदाज्याहुतिर्दश ॥३१॥ पृथग्भूतमुमेशाभ्यामग्निं संचिंत्य योगिनं ॥ कुर्यान्निष्क्रमणं नाम हुनेदा

ज्याहुतिर्दश॥३१॥ पृथग्भूतमुमेशाभ्यामग्निसंचिंत्य योगिनं॥ कुर्यान्निष्क्रमणं नाम हुनेद्दशाज्याहुतिर्दश॥३२॥
कर्णवेधाभिधं नाम संस्कारं मणिकुंडले॥ भावयित्वा शुचिः कर्णे हुनेद्दशाज्याहुतिर्दश॥३३॥ अथान्नप्राश-
नार्थं च चौलार्थं क्रमतो दश॥ कृत्वोपनयनं नाम संस्कारं मूलमंत्रतः॥३४॥ तारेण शतमूलेन नमो रुद्रा-
य चक्रमात्॥ हुनेदाज्याहुतीरष्टौ भीत्यर्थं विंशतिं हुनेत्॥३५॥ शतमष्टोत्तरं पश्चान्मूलेनाज्येन पार्वति॥
कुर्याद्विवाहसंस्कारं स्वाहया सह वैभुने॥३६॥ तरुणं रूपसंपन्नमर्चिर्षं दिव्यतेजसं॥ स्वाहाशाभितवा
मांकमभिध्यायेद्धुताशनं॥३७॥ तस्या जिह्वा महादेवि सप्तसमर्चिषा शुभाः॥ ध्यात्वा क्रमेण च हुनेत्सप्तस-
प्ताहुतीः शिवे॥३९॥ लेलीहाना कराली च रोचिष्केशानि लोहिता॥ विद्युत्प्रभा शिवाख्या च तन्त्रमघाशिवा-
भिधा॥४०॥ अथार्थिलेलिहानायां कराल्यां धर्मकामतः॥ पुत्रकीर्त्यर्थवान्रोचिष्केशायां पुष्टिकामनः॥४१॥
आयुष्कामा हुनेच्छांति लोहितायां पशुप्रियः॥ विद्युल्लिरिविनाशार्थं प्रभायां शिवलोकधीः॥४२॥ मोक्षार्थी

जुहुयादेविशिवायांचतनोमम॥दशद्वादशपंचाष्टत्रिंशत्षोडशषष्टितः॥४३॥अष्टोत्तरशतं चैव हुनेदाज्याहुतिं
शिवे॥अथकुंडस्यपरितोमेखलात्रितयेयजेत्॥४४॥जयाचविजयाभद्रानीव्रगौरीकुकुमती॥ईश्वरीशांभ-
वीदिव्याज्वालिनीभोगदायिनी॥४५॥कल्याणागगनारक्तनंदाज्योतिष्मतिक्रमात्॥प्रणवादिनमोमंत्रैर्दि
क्षुपूर्वादिषुक्रमात्॥४६॥पाशांकुशावराभीतिहस्तअर्धेंदुशेखरः॥तृतीयस्यांमेखलायांपूज्याषोडशशक्त-
यः॥४७॥हल्लेखागगनारक्तामहोत्कुष्माकपिंजला॥अरुणामालिनीशांतानिद्राचुक्रोधनीक्रिया॥४८॥
अलंबुषासिनीवालीकुहुराकायथाक्रमात्॥मध्यमेमेखलावृत्ते पूज्याषोडशभक्तयः॥४९॥इंद्राद्याअ-
ष्टदिग्पाल॥अमृतामानदापूषापुष्टिस्तुष्टिरतिधृतिः॥शशिनीचंद्रिकाकांताज्योत्स्नाप्रीतिःप्रियंवदा॥
५०॥गांधारीहस्तिजिह्वाचविपिनीचक्रमाहिनी॥प्रथमेमेखलावृत्ते पूज्याषोडशशक्तयः॥५१॥इंद्राद्या-
अष्टदिग्पालवाहनादिषुसंयुताः॥दुर्गागणपतिक्षेत्रपालमप्सुंजयस्ततः॥५२॥अभयकरईशानिमध्येदि

पार.तं. ॥ क्षुविदिक्ष्वपि॥स्ववाहनायुधोपेतापूज्याकुंडेततोहुनेत्॥५३॥क्रमेणाज्याहुतिंतेषामेकमेकमतंद्रितः॥ ॥अध्या.॥
॥२॥ जयादिशक्तिमारभ्यभयंकरमथांततः॥५४॥सहतारेणमूलेनत्रिपंचाशत्कुलेश्वरी॥अथसंप्रार्थयेद- ॥४॥
ग्निंज्वलंतंममरूपिणं॥५५॥नमस्तेसप्तजिह्वायनमस्तेरुद्रमूर्त्तये॥नमःसर्वहविर्भोक्त्रेनमोदिश्वगम
येनमः॥५६॥चतुःशृंगायशांतायवीतिहोत्रायतेनमः॥वैश्वानरायदेवायवन्हयेविश्वकर्मणे॥५७॥ध-
नंजयायरुद्रायज्वलनायनमोस्तुते॥नमस्तेनूनपादेतेनमस्तेजातवेदसे॥५८॥उषर्बुधायबौध्याय-
अहिर्बुध्नायतेनमः॥नमस्तेबर्हिषेनित्यंनमःशुष्मायशंभवे॥५९॥कृपीटयोनयेतुभ्यंनमस्तेकृष्णा-
वर्त्मने॥आश्रयाशायचबृहद्भानवेतेनमोनमः॥६०॥इतिसंप्रार्थ्यकुंडस्थमावयोस्तनयंशिवे॥आवयो-
रेकरूपेणध्यायेदग्निमतंद्रितः॥६१॥प्रणवेरष्टभिस्तोयैःपरितोग्नेःप्रवोक्षयेत्॥आवयोरेकरूपेणध्या-
येदग्निमतंद्रितः॥६२॥प्रणवेनाहृतैर्दर्भैःपरितोग्निंपरिस्तरेत्॥प्रणवेनाग्न्युपस्थेचपालान्परिधीन्क्षि ॥२॥

पेत् ॥ ६३ ॥ औदुंबराः शमीजाता यद्विकामप्रदः शिवे ॥ पालाशाश्वत्थकाश्मर्यमयाः परिधयोऽन्यतः ॥ ६४ ॥ अ
थाग्निचर्मयेत्सम्यग्दिक्षु रक्ताक्षतैः शुभैः ॥ प्रागादीशानपर्यंतं क्रमेणैभिः प्रदक्षिणे ॥ ६५ ॥ नमः शिवाय
रुद्राय मृडाय शशिमौलये ॥ ईशानाय गिरीशाय रुद्रायाष्टांगमूर्तये ॥ ६६ ॥ अलंकृत्याष्टभिर्दिक्षु पु
ष्पैरभ्यर्चलैः शिवे ॥ अग्नेरुत्तरदिग्भागे बहुदर्भान्क्षिपेद्ध्रुवं ॥ ६७ ॥ तेनैव प्रणवाद्येन चैतत्तदुपरि क्षि
पेत् ॥ दुर्वाघस्थालिकां चैव प्रोक्षणीं पूर्णपात्रिकां ॥ ६८ ॥ इध्मस्रुवाविति द्वानि षट् पात्राणि प्रयोजये
त् ॥ सहस्विरन्वदर्भाग्रपाणिनावोरसां भसा ॥ ६९ ॥ कृत्वोत्तानानि पात्राणि पुनश्चावोक्षयेत्प्रियै ॥ प्रणवे
न हृदां मूर्ध्नि प्रोक्षणीमग्रतो नयेत् ॥ ७० ॥ सहतारेण मूलेन साक्षतं जलमानयेत् ॥ शिवाय शंभवे तु
भ्यं नमो रुद्राय मृत्यवे ॥ ७१ ॥ प्रोक्षये द्यागसामग्र्यं सपवित्रेण पाणिना ॥ तदन्यत्र समुत्सृज्य पूर्णपात्र
मथोहरेत् ॥ ७२ ॥ तत्रापि पूर्ववत्कृत्वा चोद्धृत्य मुखतः समं ॥ क्षिपेदुत्तरतो ग्न्यश्च हुं फट् स्वाहेति मंत्रः

तः॥७३॥तदुपर्यष्टभिर्दर्भैराचार्यः प्रणवेनच॥मूलमंत्रेणचाभ्यर्चनमस्कृत्याभिमंत्रयेत्॥७४॥ततःआदाय
चार्चार्च्य आज्यस्थालीं पवित्रकं॥अपनीयं क्षिपेद्देवि चाज्यसंस्कारमाचरेत्॥७५॥अंतर्गतपवित्राय॰
आज्यधानी पृथक्कुचरेत्॥नमः ॐनिक्षिपेद्वह्नौ स्वाहादेवि विलापयेत्॥७६॥हुंफट्दुर्भाः यसुगुलमा
ज्यधान्यां क्षिपेच्छिवे॥प्रदर्भाज्वलितानूर्द्भान्प्रुनस्तेरेव साग्निभिः॥७७॥सह तारेण मूलेन क्षिपेद्वह्नौ॰
शिवर्पयेत्॥अथस्रुवासमारभ्य वायुमग्नेयकोणगां॥७८॥अपूरयेद्दविच्छिन्नामाज्यधारां गुरुः शिवे॥
तद्धानामतिमारभ्येशानांतं तारवर्मणा॥७९॥शास्त्रमूर्धा सृजाहे विजुहुयाच्चक्षुषि स्रुचा॥ताराप्
र्वेणमूलेन द्विवायेति समर्पयेत्॥८०॥अथस्रुजाज्यमाचार्यऋत्विजश्चसमंततः॥दक्षिणोदिक्प्रती
चीषु प्रविश्या मेहुनेत्ध्रुवं॥८१॥पंचात्तु वाक्यमंत्रैस्तु शतमष्टोत्तरं क्रमात्॥सह तारेण मूलेन सह स्व॰
चसहार्लिजा॥८२॥प्रत्येकं गुरुणा होमः कार्योग्नौ गिरिनंदने॥अथहुत्वाष्टदिग्पालान्ताराहुंफट्शि ॥४॥

रोन्वितं॥९३॥ दुर्गागणपती गौरी ईश्वरी अचला त्मजा॥ दुर्वासं संशिवम् रुद्रम् त्रियंबक मुमाप॰
तिः॥९४॥ कश्यपं कपिलं कण्वं जमदग्निं च नंदिनं॥ वृषभं तु भृंगिटिकान् कुमारमपि पार्श्वगान्॥९५॥
॥ एकैकस्य क्रमाद्दष्टौ हुनेदाज्याहुतीः प्रिये॥ हुनेनवग्रहान्तत्तनु मंत्रैः पूर्णाहुतिं हुनेत्॥९६॥ कृत्वा
स्विष्टकृतं पश्चात् प्रायश्चित्ताहुतीहुनेत्॥ अग्निमूर्धामयेचेतिकद्रुद्रायानुवाककैः॥९७॥ पंचब्रह्म मः
येस्तारमूलेन क्रमशो हुनेत्॥ सहतारेणमूलेन होमशेषं समर्पयेत्॥९८॥ ततः शास्त्रानुसारेण गु॰
रुरेव मतंद्रितः॥९९॥ इति श्री पारमेश्वरतंत्रे शिवाद्वैत सिध्धांते वैरक्तोवदीक्षा होम प्रकरणनाम
चतुर्थपटलः समाप्तं॥४॥ श्रीसांब सदाशिवार्पणमस्तु॥ श्रीरस्तु॥ शुभंभवतु॥ श्री गौरीशं वं
देइति॥७॥७॥७॥७॥७॥७॥७॥७॥७॥७॥७॥७॥७॥७॥७॥

श्रीगणेशायनमः॥ श्रीसांबसदाशिवायनमः॥ अथशृणु महादेवि दीक्षाबंधनंलक्षणं॥ सज्जिकागुणलिं
गानांसंयोगक्रममादितः॥१॥ पुनः संपूज्य तं लिंगं यथाशास्त्रमुपचारकैः॥ सज्जिकाच गुणंवस्त्रमुद्रास्यप्र
णवेनतत्॥२॥ स्मृत्वा मां मूलमंत्रेण गुरुरावाह्यसज्जिकां॥ अभिमंत्र्यानुवाक्येस्तैः स्विकुर्याच्च गुणंततः
॥३॥ द्विषड्वारंतुमूलेनाभिमंत्र्यथनियोजयेत्॥ सहतारेणमूलेन योजयेसज्जिकांगुणं॥४॥ तेनैवांतस्त
रेद्वस्त्रं लिंगंतेनैवपूजयेत्॥ तेनैवोपरिसौवर्णपूजयेत्पुष्पमुत्तमं॥५॥ स्वर्णरहितं लिंगं धारयेन्नक्रदा
चन॥ ससुवर्णमभिष्टार्थकार्यैलिंगंनसंशयः॥६॥ कपाटंबंधयेद्देवि मूलेनार्गलयोजनं॥ मूलेन वस्त्रमा
बध्यसंभद्रायगुरुस्ततः॥७॥ विशिष्टपूजयेद्देविध्यायेतांसज्जिकांततः॥ ममरूपंपरंध्यात्वा स्तुवीतानेन
पार्वती॥८॥ नमः शिवायरुद्राय शंकरायकपर्दिने॥ मृडायनीलकंठायनमोधूर्जटयेनमः॥९॥ ॐ नमः
परेशायनमः ॐकाररूपिणे॥ घंटाप्रियायशर्वायसर्वायशाशिमौलये॥१०॥ नमः फणींद्रभूषायत

रक्षुगजचर्मिणे॥नमोललाटनेत्रायनमस्तेलष्टमूर्त्तये॥११॥नमस्तेपंचवक्त्रायनमोमृत्युंजयायच॥नमोंध
कद्विषेतुभ्यंनमस्तेमेरुधन्विने॥१२॥नमस्तेपार्वतीनाथायगणनायकेसूनवे॥नमःकुमारपुत्रायनमोगंग
धरायते॥१३॥नमस्त्रिपुरसंहर्त्रेनमोविष्णुधवायते॥नमःशशांकवर्णायनमस्तेशंभवेनमः॥१४॥नमउ·
ग्रायवीरायनमःपशुपतेहरे॥पाहिमांगिरिजानाथक्षमस्वममविप्रियं॥१५॥·तिष्ठदेहेममसदाममदेहे·
तवात्मनां॥देहिसायुज्यमीशानसौभाग्यंशिवशंकर॥१६॥इतिस्तुत्वाथतंलिंगंसहसज्जिगुणाश्रुकं॥·
निक्षिप्यपूर्ववत्संतिष्ठेत्तुलानलाभीषेचयेत्॥१७॥कलिकुचतुष्टययुतोगुरुस्तकलशांभसां॥पीठस्यय·
जमानंतंअभिषिंचेद्दिमैःक्रमात्॥१८॥पंचानुवाकैस्तारेणमूलमंत्रेणरुद्रतः॥शुध्धवस्त्रधरंभक्तंसर्वालं
कारसंयुक्तं॥१९॥सहतारेणमूलेनस्वाभिमंत्राष्टधागुरुः॥विभूतिधारणंभक्तःशरीरेस्वयमाचरेत्॥२०
॥आदौशिरसिमूलेनप्रणवेनललाटके॥नमःकंठेसियुगलेस्वाहाकरणद्वयासयोः॥२१॥वषट्वौषट्भु

जहूंहै हुं फट् तन्म ध्यमाग्रयोः ॥ प्रणवेनहृद्दीशानीहृद्दाकंठे पराभिधे ॥ २२ ॥ तारेण वक्षसिशिवे मूलेनोह
रनाथिके ॥ उरुजान्वंघ्रिजंघासुप्रणवेनैवलेपयेत् ॥ २३ ॥ यथाशास्त्याथरुद्राक्षान् धारयेत्तं स्वयंगुरुः ॥
सांप्रदायानुसारेणदीक्षारुद्राक्षभस्मनां ॥ २४ ॥ अथभक्तोगुरुंदेविपूजयेद्भक्तिशक्तितः ॥ मणिकांचनव
स्त्राद्यैरर्चयेच्छिवमीश्वरी ॥ २५ ॥ गुरोर्दक्षिणपादस्यनिबध्यांगुष्टमूलके ॥ सूत्रायमंत्रतस्याग्रं गृहीत्वाह
स्तयुग्मतः ॥ २६ ॥ अथोपदेशंकुर्वीतगुरुश्शिष्यायमेमनुं ॥ संप्रदायानुरूपेणयथोक्तेनविधानतः ॥ २७
॥ इत्थंनिर्वृत्यदेवेशि दीक्षांपूर्वांग संयुतां ॥ सबध्नातगुरुर्लिंगं देहेशिष्यप्रयत्नतः ॥ २८ ॥ मोक्षार्थिनःशि
रवादेशेबाहुमध्येतुधर्मिणः ॥ कामार्त्तिनः कटीदेशेकंठेसर्वार्थिनःप्रिये ॥ २९ ॥ अष्टोत्तरशतंजप्त्वा ममसूलं
महामनुं ॥ अबध्नातगुरुर्लिंगंशिष्यायममद्वेलिजे ॥ ३० ॥ गायंतीभिः पुरंध्रीभिः सर्ववाद्यविघूर्णितं ॥
सन्मंगलसमायुक्तं यथाविभवविस्तरं ॥ ३१ ॥ अथशिष्योगुरुंभक्त्याप्रणवेद्भक्तितःपुरा ॥ आशीर्वदेद्गु

रुः शिष्येमतस्तकेहस्तसंयुत॥३२॥ स्फपुत्रो धनसंपत्तिर्बलिको भव॥ अथार्चयेत्सभां देवि स्वशक्त्या शिवयो
गिनं॥३३॥ दक्षिणांश्च कतांबूल भणमाद्यैश्च भक्तितः॥ निर्मलैरन्नपानाद्यैर्भोजयेल्लिंगधारिणः॥३४॥ य
थाशक्ति यथा भक्ति सिध्धः शिवमयोजनः॥ तदाप्रभृति भक्तो सौ लिंगपूजापरायणः॥३५॥ समबुध्धि
भवेदात्मा गुरुलिंगशिवेषु च॥ त्रिकालमर्चयेल्लिंगं न्यायार्जितधनादिभिः॥३६॥ द्विकालमेकका
लं वा सर्वदा लिंगमर्चयेत्॥ न स्वस्थं न त्यजेत्सूजां नानापद्यनिमित्ततः॥३७॥ यादित्यजातिमूढलारोरवं न
रकं व्रजेत्॥ स्नानं तु भस्मना नित्यं सर्वाश्चारस्य कर्तये॥३८॥ न स्पृश्य बुध्या स्नायात यदि कुर्यात्स पातकी॥
लिंगं मम धृतं येन न विष्टा खिलकर्मणा॥३९॥ ये संति जातिभेदास्ता नेकवछिवयोगिनः॥ पश्येदखिल
जातिस्थानेकमातृसहोदरान्॥४०॥ न स्त्रीभेदो न पुंभेदो जातिवर्णाश्रमादिकं॥ सर्वातीतमिदं विध्धि
वीरशैवमतं मम॥४१॥ यदानायासतो देवि भोगमोक्षकरस्थितौ॥ धारणान्मम लिंगस्य पूजनाच्च निरं

तरं ॥४२॥ नान्यत्कर्मनैवै कार्यंव्रतमेतन्महच्छिवे ॥ एकस्य द्रोणपुष्पस्य फलमप्यर्पितस्य तत् ॥४३॥ व
क्ष्यामिश्रृणु हे देवि तिद्द्वारे किं करोम्यहं ॥ यद्द्रोणकुसुमैः पूजा मम संनिधिकारणं ॥४४॥ ऋणात्तस्यनमो
क्ष्यामि कल्पकोटिशतैरपि ॥ यदेकमपि हे देवि बिल्वपत्रसमर्चयेत् ॥४५॥ ममलिंगे विशेषेण सदातिष्ठा
म्यसंशयः ॥ तिलाक्षतैः शमीपत्रैरपामार्गैः पयोरुहैः ॥४६॥ दूर्वाभिश्चार्चयेन्नित्यं मन्त्रैरपिस्रग्गंधिभिः ॥ न
द्वेषं चिंतयेल्लिंगं धारणे शिवयोगिनि ॥४७॥ नबालयुववृध्धादि नारतम्याधिया भजेत् ॥ प्रत्युत्तिष्ठेत्तदान्यो
न्यं दृष्टमात्रेण लिंगिनः ॥४८॥ अभिवंदेत्तदान्योन्यं नभेदो लिंगधारिणां ॥ नब्रह्मचर्यं नियमो नवानप्रस्थल
क्षणं ॥४९॥ नसंन्यासो नवैराग्यं यदि लिंगार्चने रतिः ॥ नमुंडनं नापिशिखा नभुक्ता नारुणापटः ॥५०॥ ना
नेकशाट्येकोशाटिः स्वेच्छाभोगाहि लिंगिनः ॥ सामान्ये नार्चयेल्लिंगं नित्यं नित्यक्रमेणतः ॥५१॥ नैमित्तिके
नकुर्वीत काम्यं कामानुसारतः ॥ सावित्रिके निसपूजां षोडशोरुपचारकैः ॥५२॥ यावल्लब्धं यथाशक्तिर्नाय

सस्तत्र विद्यते॥यावन्नैमिकापूजा स्वजन्माक्षादि पूर्ववत्॥५३॥अभिषेकादिकं यावछ्स्यादि शेषतः॥
पृथक् दधिमधुसिता पृथक् क्षीर घृतादिभिः॥५४॥अभिषिचेत्सयत्नेन ममालिंगमहेश्वरी॥अभिषिं
चेद्यथाशक्ति नारीकेलफलोदकैः॥५५॥अन्नेननवनीतेन मृदुशर्करयापिच॥पंचामृतैर्यथाशक्तिः
विशेषेणाभिषेचयेत्॥५६॥शीतलैः शुध्धतोयैश्च सुसंशुध्धैः सुगंधिभिः॥धूपपुष्प सुपुष्पाणि मृदु·
नैवेद्यमर्चयेत्॥५७॥अन्नाद्यैरर्चयेद्भक्त्या स्वशक्त्यालिंगधारिणः॥लिंगवस्त्रगुणाहीनि दद्याद्यः
दाक्षितं॥५८॥स्वर्णतांबूलपुष्पाद्यै र्यथाभक्त्यासमर्चयेत्॥स्वाप्य पृष्ठे ततः सर्वं यदि स्यात्सन्निधौगुरोः
॥५९॥संपादितं स्वशक्त्यायतदुक्तं यत्नदाचरेत्॥गुरोस्तुजन्मनक्षत्रे सिध्धिंगतदिनेपिच॥६०॥यथाशक्ति
यथाभक्ति पूजयेल्लिंगधारिणः॥नसमीक्ष्यक्वचिद्दापि लिंगिनं शिवयोगिनं॥६१॥नचारोवानचारोलिं ॥२॥
गी स्यात्सविशिष्यते॥धृतलिंगमहाभस्मरुद्राक्षाः शिवयोगिनः॥६२॥शिवास्ते शिवभक्तत्वादागताइ

तिश्चिंतयेन्।। यद्यस्ति दूरे वा देवी शिवयोगी शिवार्चकः।।६३।। संप्रार्थ्या कारयेधर्मन्नृयद्दहंसउमेश्टणु।।अ-
लाभे गृहीणो वापिह्यर्चेल्लिंगिन एव हि।।६४।। शक्तिमात्रविशेषेण स्वशक्तो लिंगमर्चयेत्।।न कुर्षेधरणीवी
राशैवदीक्षासुदीक्षितः।।६५।।न खातेन खनेत्क्वापि न छेदेनैव बंधयेत्।। न वहेच्छिरसा पादैर्भारं न काष्टं।
नेतरं लघु।।६६।। यदिच्छाकुसुमं धार्यं जटोष्णोषादि भूषणं।। दीक्षितो वीरशैवायां दीक्षायां धृतलिंगिनः।।
६७।। न नीचमाचरेत्कर्मानायासं नापि कुत्सितं।।अथ काम्यानि कर्माणि वक्ष्यं ते लिंगधारिणः।।६८।। यदि-
स्याद्योगिनायुक्तस्तदेत्थं व्रतमाचरेत्।।सोमवारे विशेषेण द्रोणपुष्पेण चाहरेत्।।६९।। अभिमंत्र्याथमनु-
ना तानि पंचाक्षरेण वै।।एकवारं समुच्चार्य मंत्रं मम समं पुनः।।७०।। एकं समर्पयेद्देवं सहस्रं प्रति वासरं।।नि
यमेनैकवर्षांते सुपोष्या क्षस्तदर्शनात्।।७१।। निधिलाभः पुत्रलाभः शिव एव न संशयः।। तथैव बिल्वपत्रै स्तु-
भोगस्वर्गार्थसिद्धये।।७२।। दूर्वाभिराजसन्मानं कमलैरिष्टकामिनः।। तुलसीशकुनाशायधत्तूरैः रोगना-

शानं॥७३॥शामिशत्रुविनाशाय कीर्त्तिदाहितिलाक्षताः॥शिवराव्यांमहादेवि स्नानादस्तमयेहदे॥७४
॥४॥ ॥संस्थाप्यपुरतः पीठे पूजयेल्लिंगमात्मनः॥कन्यार्थीपूजयेदर्कैर्वश्यार्थीतुशमादलैः॥७५॥मोक्षार्थी ॥५॥
बिल्वजैः पत्रैः सर्वार्थोद्रोणसंभवैः॥दूर्वाभिराजवश्याय वीर्यायोत्पलजैरपि॥७६॥ वश्यकामीप-
योत्पातैः सर्वार्थ्यन्नेनसुंदरी॥पुत्रकामीपाटलजैरर्कैरुच्चाटयेद्रिपून्॥७७॥करवीरैर्भवेज्ज्ञानंविद्याउन्मा
गसंभवैः॥दूर्वाभिराजवश्याय वीर्यायोत्पलजैरपि॥७८॥कुरंटकैर्धनप्राप्ति र्धत्तूरैर्मारयेद्रिपून्॥७८॥ र
चूतैर्विषनाशाय मधूकैः पशुवृध्धये॥चंपकैर्मित्रलाभाय नीपजैर्निधिसिध्धये॥७९॥जातिभिर्भो
ध्य गसिध्धार्थमल्लिसंपत्समृध्धये॥सर्वाभिष्टार्थंद्रोणपुष्पैःसमर्चयेत्॥८०॥तिलाक्षतैर्बिल्वदलैर्नि
त्यपूजांसमाचरेत्॥यथाशक्त्यार्चयेद्दानैरतिथीन्शिवयोगिनः॥८१॥तोषयेत्सर्वयत्नेनयद्य
कालेसमागतं॥प्रत्युत्थानाभिगमनंवंदनंप्रियभाषणं॥८२॥आसनंचान्नपानादियथाशक्त्या ॥४॥

र्चयेच्छिवे॥ सर्वाभावेप्यशक्तोवा विनयादिभिरर्चयेत्॥ ८३॥ कल्याणिं वा वदेद्वाणीं प्रमादस्यादथा

न्यथा॥ यदि चेद्वमानेन निराशो निर्गतोतिथिः॥ ८४॥ इष्टं पूर्तं हुतं दत्तं सर्वमादाय गच्छति॥ अहमे:

व महेशानि धृत्वा जंगमविग्रहं॥ ८५॥ सद्भक्तानुग्रहार्थाय पर्यटामी महीतले॥ नस्माद्भक्त्या यथा:

शक्ति पूजयेच्छिवयोगिनः॥ ८६॥ लब्धमात्रेन च गृहे शिष्टेन स्वात्मजीवनात्॥ योर्चयेज्जंगमान्भ:

क्त्या मामेवार्चितवागतं॥ ८७॥ साक्षात्सद्रूपमीशानि शयनासनभोजनैः॥ अनाथं रोगिणं दीनं:

मूकं बधिरमेव च॥ ८८॥ पंगुं मूढं दुराचारं नावमन्येत लिंगिनं॥ नकार्यः कलहो देवि अन्योन्यं शिवयो

गिभिः॥ ८९॥ न पैशून्यं न मात्सर्यं न द्रोहं नापि पीडनं॥ न स्पृशेदायुधं क्वापि प्राणैः कंठगतैरपि॥:

९०॥ न छेदयेत्तरुं वापि लिंगमुद्रांकितं शिवे॥ नाधिरोहेन्न तन्मूले मलमूत्रादिकं त्यजेत्॥ ९१॥ न:

दहेद्दृंधनं वापि शुष्कं वा लिंगभूरुहं॥ पाषाणं वृषभं वृक्षं लिंगमुद्रांकितं यदि॥ ९२॥ नापसव्यं व्रजे:

॥पार॰तं॰॥ योगाञ्शिवलिंगाविलोकयन् ॥ नाधिरोहेद्दनड्वाहं रथंवातुरगंगजं ॥९३॥ पथेच्छंविहरेलिंगा पुपानधौ ॥अध्या॥
॥५॥ स्वादुकादिभिः॥वृषभंलिंगमुद्रांकं दृष्ट्वाभूमौरवनेन्मतं॥९४॥नस्पर्शयेच्चनोपेक्षेछादिभिर्मांसलो ॥५॥
लुपैः॥शैवदीक्षाश्रितोलिंगीनैवलिंगीसमर्चयेत्॥९५॥नैवपेक्षेततत्पूजामर्चयेद्देवलिंगिनं॥पूज्यो
पिपूजकोवापिलिंगिनामेवलिंगिभिः॥९६॥नान्यैर्भर्यंन।चाम्नेषामाचरोर्यंहिलिंगिनं॥असमा
नतया नार्हात्मन्मताश्रयवर्जनात्॥९७॥पूज्यपूजककर्मादौ यद्योग्याह्यलिंगिनः॥तद्दर्दनेवपूजा
यां दर्शने भाषणेपिवा॥९८॥संबंधेसंगमेवापि सल्लापे सहभोजने॥शयनेसहयानेवा सुखदुःख
दिषुप्रिये॥९९॥लिंगानांशिवभक्तानां योग्याएवहिलिंगिनः॥ज्ञानविज्ञानसंपन्नः सर्वसाधनवा
नपि॥१००॥अशुध्धएवदेवेशियद्यलिंगीभवेज्जनः॥अशिष्टोवापिशिष्टोवा भक्तोभक्तोपिवायदि
॥१०१॥अलंगिभ्योवरोलिंगी लोहानामिवकांचनं॥किमत्रबहुनोक्तेनशृणुतत्वमुमेमम॥१०२॥स ॥५॥

र्वसिध्धांतसारोहि मन्मताश्रयणांनृणां ॥ यथादेवेष्वहंश्रेष्ठो यथात्वमनघेस्त्रियां ॥१०३॥ यथापव-
र्गः प्राप्तेषु तथाशैवमतं मम ॥ तत्रसप्तविधानांतुवीरशैवमतंश्रयेत ॥१०४॥ तदाश्रयादृते देविन-
पुंभिर्लभते सुखं ॥ तस्मात्सर्वप्रयत्नेन जनः शैवमनुत्तमं ॥१०५॥ आचारंलक्षणयुतं किंभूयश्रो-
तुमिछसि ॥१०६॥ इतिश्री पारमेश्वरतंत्रेशिवाद्वैतसिध्धांतेवीरशैवदीक्षाप्रकरणंलिंगधारणस्व-
रूपणंनामपंचमपटलः समाप्तं ॥ ५ ॥ श्रीशिवार्पणमस्तु ॥७॥७॥७॥७॥७॥७॥७॥७॥७॥

श्रीगणेशायनमः ॥ श्रीगौरीशंवंदे ॥ पार्वत्युवाच ॥ कपर्दिन्करुणासिंधो मे रुधन्विन्महेश्वर ॥ वद मेष-
ट्स्थलज्ञानं लक्षणं तत्क्रमं विभो ॥ १ ॥ ईश्वर उवाच ॥ शृणु देवि प्रवक्ष्यामि स्थलषट्कस्य लक्षणं ॥ यज्ज्ञात्वा
जायते सद्यः शिव एव न संशयः ॥ २ ॥ गोपनीयं प्रयत्नेन दरिद्रेण यथाविधिः ॥ यथा स्त्रियं तथा गोप्यं
स्वयोनिरिव सुव्रते ॥ ३ ॥ शिवभक्तिविहीनाय दुराचाररताय च ॥ नास्तिकाय न दुष्टाय वक्तव्यं षट्स्थ
लक्रमः ॥ ४ ॥ अहमेकः परानंदः परमात्मा सदाशिवः ॥ सृष्ट्वा मायामयीं शक्तिं तथाहं षड्विधो भवं ॥ ५ ॥
शैवदीक्षाकल्पवृक्षं तत्फलं स्थलषट्ककं ॥ इति संज्ञां विधायाहमसृजन्मुक्तिसाधनं ॥ ६ ॥ अहमेव जगत्स्रष्टा
पुनर्मय्येव लीयते ॥ अहमेव स्थलं विद्धि षड्विधं च मम प्रियं ॥ ७ ॥ भक्तो महेश्वरश्चैव प्रसादी प्राणलिं-
गकः ॥ शरणः शिवलिंगेभ्यः स्थलषट्कं मम रूपकं ॥ ८ ॥ गुरौ च जंगमे लिंगे नारत्म्यविशेषतः ॥ पूजयेत्त्रि
विधं रूपं तद्भक्तस्थलमुच्यते ॥ ९ ॥ तदेव पृथिवीतत्त्वं तनुरन्यतमा मम ॥ तस्याधिदेवता चाहं सोऽहं देविन-

संशयः॥१०॥जंगमं पूजयेद्यस्तु साक्षान्मद्रूपमीश्वरं॥स मां पूजितवानेव सोहं देवि न संशयः॥११॥तस्माद्यो
भक्तिमान्शक्तो जंगमेषु महात्मसु॥तद्धि भक्तस्थलं विद्धि मम चातिप्रियं शिवे॥१२॥यो गुरुक्तेन मा
र्गेण लिंगपूजारतः सदा॥जंगमानर्चयेच्छक्त्या स हि माहेश्वरस्मृतः॥१३॥त्रिकालमर्चयेलिंगं मम भ·
क्तेषु भक्तिमान्॥स्वमताचारनिरतः स वै माहेश्वरः प्रिये॥१४॥जलतत्वमिदं देवि तनुरन्यत मामम॥त·
स्याधिदेवता चाहं सोहं देवि न संशयः॥१५॥य उक्तलक्षणेतस्मादाचारे जंगमार्चने॥स्थलं माहेश्वरं वि
द्धि मम चातिप्रियं शिवे॥१६॥यो नार्पितं महेशानि नार्चयित्वापि जंगमान्॥नाश्नाति नस्येन्मह्यमर्पितं·
रुद्र गोपि वा॥१७॥सोयं प्रसादी कथितः सोहमेव न संशयः॥तत्प्रसादीस्थलं विद्धि मम चातिप्रियं शि
वे॥१८॥अग्नितत्वमिदं देवि तनुरन्यत मामम॥तस्याधिदेवता चाहं सोहमेव न संशयः॥१९॥यथा प्राणे·
तथा लिंगे यथा लिंगे तथा शिवे॥प्राणलिंग शिवेष्वेक बुद्धिमान् प्राणलिंगिकः॥२०॥वायुतत्वमिदं देवि

तनुरन्यतमा मम॥तस्याधिदेवता चाहं सोहमेव न संशयः॥२१॥इषणात्रयनिर्मुक्तो नित्यमेकांतसेवनः॥
मम ध्यानरतो नित्यं शरणः परिकीर्त्तितः॥२२॥शरणत्वाधिकारी यः स देहांते शिवो भवेत्॥शरणाख्यः
स्थलमिदं मम चातिप्रियं शिवे॥२३॥व्योमतत्वमिदं देवि तनुरन्यतमा मम॥तस्याधिदेवता चाहं सोह-
मेव न संशयः॥२४॥न पूजा नैव च ध्यानं न योगकरुणादिकं॥अहंताभावनाधीराः शिवलिंगैकसंज्ञिताः॥
॥२५॥य एष शिवलिंगैक्यसंज्ञकः परमेश्वरः॥स्थलं तच्छिवलिंगैक्य मम चातिप्रियं शिवे॥२६॥साक्षि-
तत्वमिदं देवि प्रधानेयं तनुर्मम॥मम रूपमिदं देवि सोहमेव न संशयः॥२७॥य इदं षट्स्थलं नाम रहस्यं
परमं पदं॥यज्ज्ञात्वा मुच्यते सद्यो जन्मसंसारबंधनात्॥२८॥स्थलषट्कपरिज्ञानं देवानामपि दुर्लभं॥
मामृते परमेशानि नान्यो जानाति कश्चन॥२९॥त्वत्स्नेहपाशसंबंधमनसा कथितं मया॥स्थलषट्कपरि-
ज्ञानं ~~देवानामपि~~ मिदं तुभ्यं निवेदितं॥३०॥तत्र वक्ष्ये विशेषं ते शृणु षसरहस्यकं॥षडंगानि महेशानि म-

॥पार॰तं॰॥ हश्चाश्वपरात्मनः॥३१॥सर्वज्ञतातृमरनादिबोधः स्वतंत्रतानित्यमलुप्तशक्तिः॥ अनंतशक्तिश्चविभोर्वि ॥अध्या॰
॥२॥ धिज्ञाषडंगहुरंगानि महेश्वरस्य॥३२॥यद्रूकस्थलमित्याहुस्तत्सर्वज्ञत्वमुच्यते॥यन्मल्केश्वरंनामसात
त्तिर्ममशांकरी॥३३॥यत्प्रसादाभिधंस्थानंतद्बोधोमेनिरंकुशः॥यत्प्राणलिंगकंनामतत्स्वातंत्र्यमुदा ॥६॥
हृतं॥३४॥यदस्तिशरणज्ञानमलुप्ताशक्तिरुच्यते॥यदैक्यस्थानमूर्ध्वस्थंशक्त्यानंतेशतेमम॥३५
॥एतदंगस्थलंदेविगुह्याद्गुह्यतमंपरं॥एतानिममचांगानिवृक्षुरादिन्यसंशयः॥३६॥एतदंगः
स्थलंज्ञानंयदिपुंसामहात्मनां॥सद्गुरोरुपदेशेनवर्ततेसपरःशिवः॥३७॥नयस्यांगपरिज्ञानंना
गांभीभावबोधनं॥नतेनलभ्यतेमुक्तिदूरेस्थाहियतःशिवे॥३८॥अथवक्ष्येविशेषंतेशृणुष्वेकम॰
नाःशिवे॥उपांगषट्कमपरंभक्त्यादिपरमंपदं॥३९॥भक्तिःकर्मक्षयोबुध्धिर्विचारोदर्पसंक्षयः॥स
म्यक्ज्ञानमस्तिप्रोक्तंस्थलषट्कममाप्रियं॥४०॥कामुकस्ययथाजारकांतायामभिवेशने॥यथैवल ॥२॥

ध्येचनिधोदरिद्रस्यमनस्तथा॥४१॥अस्पृष्टविषयेस्नेहोयोमोहःशुध्धसात्विकः॥मयीश्वरेमहादेवि
सद्भक्तिरभिधीयते॥४२॥भक्तिर्मातापितादेविकामधेनुसुरद्रुमः॥करस्थममृतयासंविद्धिभक्तंकुः
लेश्वरी॥४३॥योभक्तिरहितोमर्त्यःसमस्ताःनिष्फलाक्रियाः॥नतस्यपरलोकोस्तिमृतःश्वानोभविष्य
ति॥४४॥भक्तिहीनस्यकर्माणिवृथापूजाजपादिकं॥धृतमंगलसूत्रापिविधवानसुवासिनी॥४५॥य
थाभक्तिर्यथायस्यतद्वशाद्भुतजन्मसु॥मामानिबंधकर्माणितेषास्यात्संक्षयेलघुः॥४६॥दुर्वासनानु
बंधानिकर्माणिप्रकृतानिच॥कृताभक्तिमयोत्राक्तिसानाशयतितानहि॥४७॥कर्मबंधेषुनष्टेषुबुध्धिः
स्वस्थाभवस्तथा॥संत्यक्तविषयादेवीस्थिरामयिपरात्मनि॥४८॥यस्यास्तिनिश्चलाबुध्धिरधीशेम
यिशंकरे॥समामुपेतिभ्रमरकीटन्यायेनसुंदरी॥४९॥नयस्यनिर्मलाबुध्धिःसध्यायेद्विषयान्सदा
॥ध्यायतेविषयान्पुंसःसंगस्तेषूपजायते॥५०॥संगात्संजायतेकामःकामात्क्रोधोभिजायते॥क्रोधा

द्भवतिसंमोहः संमोहात्स्मृतिविभ्रमः॥५१॥स्मृतिभ्रंशाद्बुध्धिनाशोबुध्धिनाशाद्विनश्यति॥तद्बुध्धबु

 ध्धिमानेतिमामेवमयिशंकरे॥५२॥नयागुरूक्तवाक्यार्थचिंतनंनिश्चयोहृदि॥हिताहितविवेकस्यविचा 

रःसउदाहृतः॥५३॥विनागुरूक्तवाक्यार्थविचारंनप्रयोजनं॥विचारंनैवजानातिसकलंचशुभाशुभं॥५

४॥एवंविचारितेशास्त्रेज्ञात्वाममखिलेश्वर॥स्वरूपमभिजानातिनस्यस्याद्भवसंक्षयः॥५५॥निरस्तद

र्पसंबधःशिवज्ञानरतोभवेत्॥तेनशीघ्रंगुरुस्कृतेसम्यग्ज्ञानंततोभवेत्॥५६॥येनभूतान्यशेषेणद्रक्ष्य

स्यन्यतोमयि॥प्रसयातृतीयैश्येनसम्यग्ज्ञानीसचाप्यहं॥५७॥चराचरात्मकंसर्वंभावयन्परमात्मनः॥म

मरूपंमहेशानिसम्यग्ज्ञानीसउच्यते॥५८॥उपांगषड्मेतध्धिभत्स्याहिस्थलषट्कं॥भक्तादिसर्वज्ञलादिभ

क्तादिक्रमशःशिवे॥५९॥यस्यसर्वज्ञताभक्तियत्तिसिः कर्मसंक्षया॥अनंतशक्तिरितिमे॥अनादिबोधो

योबुध्धिर्विचारोमेस्वतंत्रता॥६०॥अलुप्तशक्तिरितियासाचमेगर्वसंक्षया॥अनंतशक्तिरितिमेसम्यग्ज्ञा 

नंददातिसा॥६१॥अंगोपांगात्मभावेनस्थलषट्कस्यनिर्णयः॥योजानातिसदेवेशःशिवएवनसंशयः॥६२॥
पादपाणिशिरोदेहमंगषट्कंमहेश्वरा॥भक्तादिसर्वतत्त्वादिभक्त्यादिस्थानषट्ककं॥६३॥लब्ध्वाएतत्स्थ-
लंज्ञानंविदितःसद्गुरोर्मुखात्॥षडूर्मिसंगरहितः षड्वर्गपरिवर्जितः॥६४॥परित्यज्याथमहताहंकारंस
शिवोभवेत्॥ऊर्मिवर्गमयंयस्यनसमुक्तोनसंशयः॥६५॥क्षुत्पिपासेमहेशानिशोकमोहौजनिर्मृतिः॥
संसाराध्धूमयश्चेतायथाध्वाकर्मयस्तथा॥६६॥क्षुत्पिपासेप्राणधर्मौशोकमोहौमनोगतौ॥जननंम
रणंचेतिदेहधर्मौषडूर्मयः॥६७॥भवंत्सप्राप्यदुःखायप्राप्यापिचतथैवहि॥आगमापायिनोनित्यंन-
स्वस्थंस्थापयंत्यमी॥६८॥अतऊर्मिविदूर्मित्वंतदुःखंजनकंनृणां॥तेषामिदंसहायोहिवर्गषट्कंदुरासवं॥
॥६९॥कामक्रोधश्चलोभश्चमोहश्चमदएवहि॥मात्सर्यंचक्रमेणैनदूर्गषट्कमुदाहृतं॥७०॥अरिवत्प्रति
कूलत्वादरिषड्वर्गमुच्यते॥तदूर्मिषट्कमरिषड्वर्गसत्कोविमुच्यते॥७१॥भक्तादिसम्यक्ज्ञानांतंमुत्तरो-

त्तरमुत्तमं॥ साधनं पूर्वपूर्वस्याद्वसाध्यं स्यादुत्तरोत्तरं॥ ७२॥ ऊर्मिवर्गविहीनस्य सम्यग्ज्ञानाधिकारिणः॥ सु
ज्ञातस्थलषट्कस्य मुक्तिः करतले स्थिता॥ ७३॥ यस्याप्रियोऽहमीशानि सममासीत्प्रियोऽपतः॥ उक्तलक्ष
णसंपन्नः सोऽहमेव न संशयः॥ ७४॥ कृतपुण्यफलाद्वीरशैववंशाद्धुरंधरः॥ त्रिः संध्यमनया स्तुत्या
स्तुन्वे मामेव मद्विजे॥ ७५॥ नमः शिवाय रुद्राय नमः ॐकाररूपिणे॥ भक्तस्थलस्वरूपाय शिवलिंगा
यते नमः॥ ७६॥ गजचर्मांबरभृते व्याघ्रचर्मधरायते॥ महेशस्थलरूपाय शिवलिंगायते नमः॥ ७७
कपर्दिने सकालाय ककुद्मिध्वजशोभिने॥ प्रसादस्थलरूपाय शिवलिंगायते नमः॥ ७८॥ नमः परमा
सनेतुभ्यं प्राणलिंगिस्थलासने॥ शुद्धस्फटिकवर्णाय शिवलिंगायते नमः॥ ७९॥ नमः परमासने तु
भ्यं॥ नीलकंठायनित्याय निर्मलाय परमासने॥ शरणस्थलरूपाय शिवलिंगायते नमः॥ ८०॥ त्रिशूल
लमृगहस्ताय कुठारभयपाणये॥ शिवलिंगैक्यरूपाय शिवलिंगायते नमः॥ ८१॥ नमो दक्षमखांत

यनमोंतकविघातिने॥नमः सर्वज्ञरूपाय शिवलिंगायते नमः॥८२॥ पार्वतीशाय पृथवे पराय परमेष्ठिने॥
नमः सर्वज्ञरूपायशिवलिंगायतेनमः॥८३॥नमस्ते वेदरूपायनमः कंथानिषंगिणे॥नमस्त्वनादिबो
धायशिवलिंगायतेनमः॥८४॥नादितारिवलभूतायनगजाधंशरीरिणे॥नमः स्वतंत्रतंत्रायशिव
लिंगायतेनमः॥८५॥नमः शशांकचूडाय शशांकायुतरोचिषे॥अलुप्तनिशक्तये नित्यं शिवलिंगा-
यतेनमः॥८६॥ नमः कैलासवासाय नमस्ते पुरघातिने॥नमस्ते भक्तरूपाय शिवलिंगायतेनमः॥८७
॥निश्वासोत्पन्नवेदाय साक्षीभूतत्रयीमते॥नमस्ते भक्तिरूपायशिवलिंगायतेनमः॥८८॥कमलोद्भ-
वलिंगाय कपर्दिजटिलेनमः॥कर्मक्षयात्मनेतुभ्यं शिवलिंगायतेनमः॥८९॥नमोगणेशायनमोनम
स्ते स्कंदसूनवे॥नमोबुध्धिस्वरूपायशिवलिंगायतेनमः॥९०॥गंगाधरायगोभर्त्रे गौरीवक्त्रावलोकिने॥
नमोविचाररूपायशिवलिंगायतेनमः॥९१॥विश्वेश्वरायविश्वेशाविश्वरूपायवेधसे॥दर्पक्षयस्वरूपा-

॥पार·तं॥ यच्छिवलिंगायते नमः॥९२॥ सर्वाधाराय सर्वाय सर्वोत्सत्तिलयात्मने॥ सम्यक्ज्ञानस्वरूपाय शिवलिं ॥अध्या॥
गायते नमः॥९३॥ नमः श्चिद्घनरूपाय सच्चिदानंदमूर्तये॥ समर्थैश्वर्यरूपाय शिवलिंगाय ते नमः॥ ॥६॥
॥५॥ ९४॥ मृत्युंजयाय रुद्राय त्र्यंबकाय त्रिमूर्तये॥ महावीर्याय वीराय शिवलिंगायते नमः॥९५॥ वेद
वेदांतवेद्याय वेदध्यायविवेकिने॥ महसे यशसे तुभ्यं शिवलिंगायते नमः॥९६॥ सोमसूर्याग्निनेत्राय
नमस्ते त्वष्टमूर्तये॥ नमो महार्घ्यरूपाय शिवलिंगायते नमः॥९७॥ नमः षड्गागरूपाय नमः षड्गा·
ग्यदायिने॥ मुक्तये मुक्तिसंधात्रे शिवलिंगायते नमः॥९८॥ निराकाराय कवये कारणाय कला·
त्मने॥ नित्यज्ञानस्वरूपाय शिवलिंगायते नमः॥९९॥ सूर्यकोटिप्रकाशाय सूक्ष्माय सुखरू·
पिणे॥ शुध्धवैराग्यरूपाय शिवलिंगायते नमः॥१००॥ अतीतव्यष्टतत्वाय व्यष्टतत्वस्वरू
पिणे॥ पंचविंशात्मतत्वाय शिवलिंगायते नमः॥१०१॥ वरदमृगकुठाराभीतिहस्तांबुजाय॥ ॥५॥

स्फुटमुकुटविराजचंद्रमाशेखराय॥ मृदुविमलसुदूर्वाश्लिष्टभूभृत्स्नुताय प्रणवमयनमश्श्रीशंकरायो
नमस्ते॥१०२॥ इतिस्तुवितयोभक्त्यात्रिसंध्यंप्रत्यहंशिवे॥ तद्दृष्टिगोचराः सर्वेशिवएवनसंशयः॥१०३॥
एतद्विजाननतोदेवि नान्यदस्ति ततःपरं॥ ज्ञातव्यंपरतत्वाख्यं सोहमेवनसंशयः॥१०४॥ अनेनस्तवरा
जेनभावयेन्मामधीश्वरं॥ देहांतेसर्वदाप्नोति ममसायुमव्ययं॥१०५॥ विचारयेद्देतदर्थं सम्यक्कुरुमु
खाच्छिवे॥ नसभूयोनपतति संसारेदुःखसागरे॥१०६॥ परित्यज्यापिसर्वस्वं सर्वयत्नेन सर्वदा॥ स
र्वदावर्तयेद्धयहि छेत्सुखमात्मनः॥१०७॥ एतत्तेकथितंदेवि षट्स्थलज्ञानमुत्तमं॥ सफलंलक्षणयु
तंकिंभूयश्रोतुमिच्छसि॥१०८॥ इतिश्री पारमेश्वरतंत्रेशिवाद्वैतसिध्धांते दीक्षाप्रकरणे षट्स्थलनि
रूपणंनाम षष्टमपटलः समाप्तं॥६॥ श्रीसांबशिवार्पणमस्तु॥ श्रीरस्तु॥ शिवायगुरवेनमोस्तु॥ हरये
नमः॥ शिवाय॥ गुरवे॥ नमः॥ श्रीपाद॥ श्रीवल्लभ॥ दत्तात्रयार्पणं॥ अस्तु॥ श्रीगोपालकृष्णायनमः॥

पार॰तं॰॥ इदं षष्ठम पटलं ॥ ६ ॥ श्लोकसंख्या ॥ १०८ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ७ ७ ७ ७ ७ अध्या॰

॥ ६ ॥॰ ६

६

श्रीगणेशायनमः ॥ श्रीमहारुद्रसदाशिवायनमोनमः ॥ देव्युवाच ॥ निस्तरंसंसारांबोधौनौकाक्रीडन-
शंकर ॥ नमस्तेनिर्विकारायनिर्विशेषायशंभवे ॥ १ ॥ कथितानित्वयान्यानियानिसमविधानिमे ॥ वी
रशैवादिभेदेनशैवंसत्यविधिंत्विति ॥ २ ॥ उपक्रमेणानाद्यादिमतानांलक्षणादिकं ॥ यज्ज्ञात्वामनुजःस
द्योवीरशैवप्रवर्त्तते ॥ ३ ॥ ईश्वरउवाच ॥ शृणुष्वैकमनादेविमहात्म्यंतुमतस्यमे ॥ अनादिशैवभेदस्यल
क्षणाचारमादितः ॥ ४ ॥ प्रवेशमात्रेणमतेकामुक्तिरविवेकिनां ॥ विनास्वरूपविज्ञानंममशंभोरनु
ग्रहात् ॥ ५ ॥ कृतपुण्यानुसारेण प्रवेशोलभ्यतेमते ॥ ततोयदिभवेद्धीमान् जागरूकोभवेद्दृढः ॥ ६ ॥
यथोक्तंगुरुणाशास्त्रंतत्तथावर्त्तयेत्सदा ॥ तदुक्तमनुतिष्ठेतान्नत्यजेत्कृच्छ्रगोपिवा ॥ ७ ॥ त्रिकालमर्च
येल्लिंगंममलिंगमतंद्रितः ॥ जंगमानांचयेभक्त्यास्वशक्त्यानोदकादिभिः ॥ ८ ॥ हृष्टोभवतिसंतुष्टोन-
ष्टशोचतिलोकवत् ॥ नबंधवेत्तिनोमोक्षंसोनामतमाश्रयेत् ॥ ९ ॥ प्रमादेकुरुतेप्रायश्चित्तंसाकल्यसि

ध्ययेत् ॥ शुभं चरेच्छुभप्राप्तौ अशुभे शुभमाचरेत् ॥ १० ॥ तद्दानादिमतं शैवं नादिसोपानकं यतः ॥ ततो यदि विशे
षज्ञः स्वादिशैवमताश्रयेत् ॥ ११ ॥ शक्त्यासमर्चयेद्भक्ते जंगमान् गृह मागतान् ॥ त्रिकालमर्चयेल्लिंगमा
दिशैवमतं शिवे ॥ १२ ॥ यथाशक्त्याचरेच्छास्त्रमशक्तं वर्जयेत्क्वचित् ॥ नाश्रयेन्नापि वर्त्तेत सो नादि र
धिकः शिवे ॥ १३ ॥ अर्चयेदेककालं वा लिंगमेजंगमानपि ॥ ममध्यानपरो नित्यं मनुशैवमतो भवेत्
॥ १४ ॥ ज्ञानेनाधिकतायस्य शास्त्राभ्यासपाठनात् ॥ नतस्य कर्मबाहुल्यं ज्ञानमेवाधिकं परं ॥ १५ ॥
तद्विशेषादिकारो यो मतभेदेषु धीबलात् ॥ कामादिरहितः शांत उत्तरोत्तरमाश्रयेत् ॥ १६ ॥ नाधिका
रं विना मूढो मतमुत्तमं माश्रयेत् ॥ सोवश्यं तिपतितो दूरे वृक्षाग्रच्युतपादवत् ॥ १७ ॥ वृध्य साधनसंप
न्नः सग छेदुत्तरोत्तरं ॥ संतरेद खिलं दुःखं स्रोतसीव दृढो दुमः ॥ १८ ॥ अथ वक्ष्ये महाशैवं न विना जंगमा
र्चनं ॥ तत्प्रसादं विना क्वांति महाशैवमतेस्ति नः ॥ १९ ॥ सर्वस्वपेक्ष्यनादीनि पूजायै शंकरे र्पयेत् ॥ सर्वे

द्रियनिवृत्तोपि शिवमेवार्चयेच्छिवे ॥ २० ॥ चराचरात्मकं सर्वं जगदेच्छिवात्मकं ॥ भावयन्नात्मदाता त्वं ये
गश्शैवमतो वशेत् ॥ २१ ॥ नबाह्यपूजनाचारो नैव जंगमपूजनं ॥ न मद्गुरुश्चानमन्यस्य योगश्शैव मते मम ॥
२२ ॥ विविक्तदेशमाश्रित्य परित्यज्य धनादिकं ॥ निर्ममो निरहंकारो ध्यायी तात्मनमीश्वरं ॥ २३ ॥ जग
ल्लिंगमयं पश्येल्लिंगमद्रूपमीक्षयेत् ॥ ममात्मानं परं ध्याये योगश्शैवमते स्थितः ॥ २४ ॥ तदेतज्ज्ञानशैवाख्यं
ज्ञानस्य ज्ञानमुत्तमं ॥ जगत्तदात्मकं ज्ञानं महाज्ञानमितीश्वरी ॥ २५ ॥ न ध्यानं नापि वा यासो नार्चा जंगमलिं
गिनां ॥ न योगधारणं ज्ञानं शैवस्थस्य मम प्रिये ॥ २६ ॥ यो ज्ञानशैवमतगो य उक्तकर्मनिष्ठितः ॥ स जीव
न्नेव विश्वेशि शिवोहं नात्र संशयः ॥ २७ ॥ एवं क्रमेण सोपानं मतभेदं ममाश्रयेत् ॥ यद्दिव्यक्तमतो गच्छे
त्सपतेनात्र संशयः ॥ २८ ॥ यदाश्रित्योत्तरं भेदमशक्त्यात्तदुनिष्ठितो ॥ पूर्वभेदानुसरणात् स पतेनात्र संश
यः ॥ २९ ॥ ज्ञानाधिकारसिध्यर्थमाचरेत्कर्मचोदितं ॥ ज्ञाननिष्ठाबलेनैव त्यजेत्कर्माणि नान्यथा ॥ ३० ॥

विनाज्ञानाधिकारेण शास्त्याकर्माणि यस्त्यजेत्॥ न याति पारं दुःखस्य विषयेष्ववसीदति॥३१॥ दी-
क्षा हि माहिकं सर्वं सर्वत्र सममेव हि॥ आचारश्चापि भक्तिश्च समा सर्वमतेष्वपि॥३२॥ लिंगस्य पूज-
नं नित्यं जंगमानां च पूजनं॥ कर्त्तव्यं नियतो भक्तिः सर्वभेदेष्वपि प्रिये॥३३॥ अनादिशैवनिष्ठस्य क-
र्मैव परमा गतिः॥ आदिशैवमतस्थस्य स्मरणं सततं विधिः॥३४॥ अनुशैवमतस्थस्य मननं मुख्य-
साधनं॥ महाशैवमतस्थस्य निश्चयः परमा गतिः॥३५॥ योगशैवमतस्थस्य योगस्याष्टांगलक्षणं॥ ज्ञान-
शैवेन योगस्य ज्ञानानां भावनाखिलं॥३६॥ वीरशैवमतस्थस्य ज्ञानयोगो हि साधनं॥ विज्ञानेन न योग-
स्यान ज्ञानं योगतो विना॥३७॥ न विज्ञानान योगाभ्यां वीरशैवमताश्रयः॥ संतारणाय भवते च्यवते ना-
त्र संशयः॥३८॥ यथा वीरो रणे शूरो वीरशैवमते तथा॥ भक्त्या वीरो न वैरेण न बलेन च कार्यतः॥३९॥ न मां-
स भक्षयेल्लिंगी नोप्यपेयं पिबेत्क्वचित्॥ नाभक्ष्यं भक्षयेद्देवि नानावश्यनिमित्तकं॥४०॥ नासार्थं पाचये

दिष्टिं नाघान्नातिथ्यनार्पितं॥ शास्त्यासंपूजयेल्लोके जंगमं गृहमागतं॥४१॥ नाद्याद्दलिंगिनश्चान्नं दृष्टं चा
न्नं मलिंगिना॥ याचयेद्गृहमागत्य दद्यादन्नं मलिंगिने॥४२॥ नोदासीनं न च द्वेषं न हिंसा न पिवंचनं॥ कुर्वी-
त लिंगियलेन विमतेष्वप्यलिंगिषु॥४३॥ पूज्यपूजकभावाद्धि भोजनादिषु कर्मसु॥ विमतत्वादयोगत्वा
देवमेवाखिलं जगत्॥४४॥ गृहमायांतमालोक्य गुरुं वा गुरुमेव वा॥ यो गृही भवती नम्रः स गुरुर्नेतरः क
चित्॥४५॥ तदागतं गृहे वीक्ष्य प्रत्युत्थायाभिवादयेत्॥ श्रमापनोदनं कुर्यात् व्यजनाभिरादरात्॥४६॥
प्रणम्य स्वागतं ब्रूयात् पादप्रक्षालनं चरेत्॥ प्रथमं पूजयेद्गंधपुष्पैः संक्षालयेत् ततः॥४७॥ अंगुष्ठे भाव
येद्रुद्रं तर्जन्यां शंकरं स्मरेत्॥ मध्यमायां महादेवमनामिक्यां त्रियंबकं॥४८॥ कनिष्ठिकायामीशानं
पादोपरि कपर्दिनं॥ पादाधः पंचवदनं गुल्फयोरुग्रभर्गकौ॥४९॥ सर्वलिंगमयं ध्यात्वा पादं जंगमलिं
गिनः॥ पिबेत् संक्षालितं तोयं पीत्वा शिरसि धारयेत्॥५०॥ न पातयेदधो बिंदुं पादप्रक्षालनंभसां॥ पु

दि

॥पार॰ तं॰॥ ॥२॥ शि

नःसंपूजयेद्गंधपुष्पधूपादिभिःक्रमात्॥५१॥स्त्रियोवापुरुषोवापिसर्वत्रातिथिपूजने॥पुंभिःपुंसांस्त्रि
यास्त्रीभिःदद्याद्गंधादिकंकरे॥५२॥नजातिभेदस्तत्रास्तिलिंगिनांशिवयोगिनां॥नदृष्टिस्पृष्टदोषो
वासर्वएवशिवःशिवे॥५३॥गुरुर्लिंगंजंगमश्चपादतीर्थंप्रसादकं॥देहेविभूतिरुद्राक्षौममपंचाक्ष
रीमनुः॥५४॥अष्टावरणसंयुक्तावीरमाहेश्वरानराः॥ममरूपधरादेविविचरंतिमहीतले॥५५॥नस्व
न्नेलिंगिनाभुक्तिछिष्टमुच्छिष्टधीहतः॥नक्षालयेचतत्पात्रंनभेदंतत्रकारयेत्॥५६॥येनकेनापिभक्ते
तुलिंगिनोच्छिष्टपात्रके॥पात्राभावेकक्षालादौसर्वेप्यश्नंतिलिंगिनः॥५७॥नब्रह्मस्वनक्षेत्रवृत्तिनो
वेत्रयवृत्तितः॥नभूद्रव्यस्याजीवेतयदिलिंगेहतेसुखं॥५८॥नवैप्रतिग्रहेद्दानंनऋणंनातिसंग्रहं॥यद्द
त्तुभक्तिसमुखंनोचेद्भिक्षाटनंचरेत्॥५९॥पक्वंचेल्लिंगिनामेवनानादिकमलिंगिनां॥गृह्णीयादे
वियलेनस्यपक्वंसर्वजातिषु॥६०॥नाश्नीतदद्यपक्वंचस्वस्यान्नस्ययथारुचिः॥अपक्वंनपिबेत्तोयमः

॥अध्या॥ ॥७॥ ॥२॥

लिंगीस्पृष्टमीश्वरी॥६१॥ चांडालेनापिदेवेशिसंस्पृष्टं धृतलिंगिना॥योग्यंस्यादन्नपानादिनश्रेष्टेन
प्यलिंगिना॥६२॥यत्नेनार्चयेदन्नंयदिस्युलिंगधारिणः॥अभावेयान्वयेदन्नमपक्वंचाप्यलिंगि-
नः॥६३॥नरध्याज्यमयस्तक्रंपक्वमप्यशुचिःप्रिये॥जातिभेदेनकर्त्तव्यःपाकभेदेनकोरसे॥६४॥०
नसूर्यकिरणास्पृष्टमुदकंशिवपूजने॥योग्यंतदानयेद्रात्रौचोदयात्पूर्वतोरवेः॥६५॥यथाकाशंप्रतिफले
नघंटांतस्थितांभसि॥तदाछाद्यदृढंभांडंमुखंसूदकमानयेत्॥६६॥नभूमौप्रक्षिपेत्क्वापिविनापूजा-
स्थलंशिवे॥यद्यन्यत्रक्षिपेत्कुंभंमशुच्यंभःपरित्यजेत्॥६७॥पत्रंपुष्पादिपूजार्थंयद्यलिंगासमाहृतं॥ते
नार्चयित्वागिरिजेरौरवेनरकेवसेत्॥६८॥यद्दानीतंलस्त्वशुचिनालिंगिनाप्यर्चनायमे॥संपूजयित्वा
मांदेवीरौरवेनरकेवसेत्॥६९॥तदुत्थायशुचिर्भूत्वाधृतरुद्राक्षभूतिकाः॥जपन्पंचाक्षरमू
मंत्रंस्मरन्वानाममेशिवे॥७०॥मौनीनिरस्तचेष्टःसन्नदिशोन्याविलोकयेत्॥ध्यायन्पुष्पेषु

॥पा॰तं॰॥ मांदेविलयासहलुनेच्छुनैः॥७१॥अकीटकैमिदृष्टानिअविछिन्नदलानिच॥अनूतनान्यपूर्वाणि ॥अध्या॥
॥६॥ पक्वान्नेवलुनेच्छिवे॥७२॥नदारुण्मयेपात्रेनहस्तेनचवाससि॥पर्णाद्योचूलिकाद्योवापुष्पपा ॥७॥
त्रादिकंक्षिपेत्॥७३॥नभूमौनक्षिपेत्पुष्पंनाशुध्धेनशरीरके॥स्थापयेद्दंबिकेशुध्धं
देवतायतनंविना॥७४॥नार्द्रैस्तिलाक्षतैर्देवि पूजयेन्नमिश्रवज्जलैः॥निरसैः क्षालि
तैःशुध्धैरखंडैरर्चयेच्छुभैः॥७५॥सिकतारुणनैल्यादिरहितैश्चतिलैरपि॥त्रिकालम
र्चयेल्लिंगम् समभागैस्तिलाक्षतैः॥७६॥करवीरैर्द्रोणदूर्वाबिल्वपत्रैस्तिलाक्षतैः॥
अर्चयेन्नित्समीशानि पंचपुष्पैरतंद्रितः॥७७॥यत्नतोनित्यपूजायै पंचैतानिसुसाधयेत्॥
॥यद्यदन्यत्सुखालब्धमधिकस्याधिकंफलं॥७८॥धत्तूरैरर्कपालाशैः कमलोत्पलपाटलैः
॥नीपचंपकपुन्नागैर्मधूकंबकुलादिभिः॥७९॥नागकेसरशामंतीनीलिकुरुबकैरपि॥मल्लि ॥६॥

काजातिकल्हारैर्ग्रामवन्यैरनेकशः ॥८०॥ पुष्पाणि संति पात्राणि सकलभानि धरातले ॥ अ
नायासेन संपाद्य पूजयेन्मां यथासुखं ॥८१॥ शम्यापामार्गतुलसी बृहत्यस्मांतमर्जुनं ॥ वि
ष्णुक्रांता चामलकदेवदार्वादिकानि च ॥८२॥ यत्नसाध्यमत्यायासेन यत्नप्रयलेन दुर्लभं ॥
यद्दमूल्यं विशेषेण तत् संपाद्यर्चयेच्छिवं ॥८३॥ सुगंधं शीतलं रम्यं मधुरं लघुपावनं ॥ य-
त्नेन जलमानीयाभिषिंचेन्मां यथाबलं ॥८४॥ प्रत्यहं यावदुत्थानं यावत्स्वापपुनर्निशी ॥
तावच्च लिंगसेवार्थं कालं व्यापनयेत्सुधीः ॥८५॥ न विना मम दास्येन न विना लिंगपूजनं ॥ तद्भ-
वेत् सकलाभाय यद्यत्स्यान्यत्प्रयोजनम् ॥८६॥ मम सेवा तपो देवि मम सेवा व्रतं शिवे ॥ म-
माश्रयो हि कैवल्यम् धाम तां सुखमिच्छतं ॥८७॥ यथांधस्याक्षिलाभेन निधालाभाद्दरिद्रि-
णः ॥ क्षुधितस्यान्नलाभेन कामिनः कामलाभतः ॥८८॥ कामिन्या सहृत्प्राप्ते पुत्रलाभे खपु-

त्रिणः॥ पंगोः शरीरहार्देन जीवनेन पुनर्भ्रते॥ ८९॥ तथा विधिमतं देवि मम शैवं महत्तरं॥ तन्मंथ
नोत्थितं सारम् वीरशैवं परं शिवे॥ ९०॥ निष्ठाभेदेन मर्त्यानां भेदावांतरभेदतः॥ कल्पिता हि
मया भेदा ज्ञानमेकं हि कारणम्॥ ९१॥ अंधेन नीयमानोंधो निपतेत् सह तेन च॥ यथा तः
थानभिज्ञस्य वीरशैवमतं मम॥ ९२॥ रूपाणधारागमनं व्याघ्रकर्णावलंबनम्॥ वीरशैवमतं
देवि ससंत्वविदुषा मम॥ ९३॥ अनयासत पश्वर्यं शैवलब्धेन तोषणं॥ शिवपूजा सदा हे विकेव
ल्यशिवलिंगिनाम्॥ ९४॥ तत्रमुखोत योमूढः सकुलास्ता चारसुक्तवत्॥ श्रेयेत पश्यन् गिरिजे सदा
विषयलंपटः॥ ९५॥ मुक्तिमार्गो यमीशानि शाक्ताश्च समो समः॥ धामाने तिसुखं तेन न धिमानि
पते ध्रुवं॥ ९६॥ विषयाग्निशिखादीर्घतपश्चर्या न बोध्यतं॥ अभेत्सद्भावयेन्नित्यं ततो विजन माश्र
येत्॥ ९७॥ अहेरिव गुणाद्भीतः सन्मानस्मरणादि वे॥ कुणपादिव यस्त्रीभ्यो वीरशैवः स उच्यते॥ ॥५॥

॥९८॥ देवलब्धेनसंतुष्टा सर्वद्वंद्वविवर्जितः॥ शिवध्यानरतो नित्यं दृढचित्तो जितेंद्रियः॥९
९॥ त्रिकालमर्चयेल्लिंगं शिवपंचाक्षरीजपन्॥ कीर्तयन्शिवनामानि शिवोहमिति भावयन्॥
॥१००॥ जगज्जीवमयंसर्वं चैतन्यमयविग्रहं॥ पंचाक्षरमयंलिंगं लिंगंपंचाक्षरं जपन्॥१०१॥
जगदात्मनिसंपश्यन् आत्मानंजगतीक्षयन्॥ जगदात्मानमीशानि पश्यन् मयिचिदात्मकं॥
॥१०२॥ तदाधिकारसंपन्नोवीरशैवमताश्रयेत्॥ दृढवैराग्यसंपन्नो गुरुणेनविधानतः॥१०३॥ यः
शास्त्रविधिमुत्सृज्य वर्त्ततेकामकारतः॥ नससिद्धिमवाप्नोतिनसुखंनपरांगतिं॥१०४॥ तस्मा
च्छास्त्रंप्रमाणंहि कार्याकार्यव्यवस्थितौ॥ ज्ञात्वाशास्त्रविधानोक्तं नत्वंकुर्याद्गुरोर्मुखात्॥१
०५॥ इतितेकथितंदेविमतभेदमनुत्तमं॥ रहस्यंवीरशैवाख्यं किंभूयश्रोतुमिच्छसि॥१०६॥
इतिश्रीपारमेश्वरतंत्रेदीक्षानिरूपणंनामसप्तमपटलः समाप्तम्॥ ७॥ ७॥ ७॥ ७॥

श्रीगणेशायनमः॥ श्रीसांबसदाशिवायनमोस्तु॥ देव्युवाच॥ चिन्मयानंदविज्ञानगगनायमहात्मने॥
नमःस्त्रिशूलहस्तायपशूनांपतयेनमः॥१॥ कथितंमतभेदास्तेसमस्तंख्यातवानघ॥ वीरशैवमतंतत्रवि-
शेषेणाभिवर्णितं॥२॥ वीरत्वंनामभगवन्विज्ञेयंतुकथंमया॥ तारतम्येनयस्सामंप्रवृत्तागच्छवाहरान्
॥३॥ प्रविश्यवीरशैवेतुकिंवाकार्यंहिलिंगिनां॥३॥ भक्त्यामत्ताश्रयंकृत्वावैराग्यंशिथिलेंद्रियः॥ पुनरा-
गत्यविषयान्कांगतिंशिवगच्छति॥४॥ एतत्क्रमेणविश्वेशिवद्विस्तरतोमम॥ तारतम्येनयस्साप्यंप्र
वृत्यागच्छवाहरात्॥५॥ ईश्वरउवाच॥ शृणुदेविप्रवक्ष्यामियन्मांत्वंपरिपृच्छसि॥ सरहस्यंसविस्तारंमहि-
मानंमतस्यमे॥६॥ वीरत्वंनामदेवेशियथावीरोरणेभटः॥ तथामतेचसङ्गत्यावीरोवैराग्यतोदृढान्॥
॥७॥ इषणत्रयनिर्मुक्ताज्ञानविज्ञानतत्पराः॥ दृढवैराग्यसंपन्नावीरास्तेशिवयोगिनः॥८॥ अंधायेलिं
गिनोदेविपरस्त्रीरूपदर्शने॥ युवानश्चापिपटवस्तेवीराशिवयोगिनः॥९॥ अमानिनोदंभिनश्चहिंसा

क्षांत्यर्जवान्विताः॥ आचार्योपासनं वीरा वीरास्तेऽशिवयोगिनः॥१२॥ शौचात्मनिग्रहस्थैर्यरनहंका
रशालिनः॥ सर्वत्रसमचित्ताश्च वीरास्तेऽशिवयोगिनः॥१३॥ विशुद्धभक्त्या मयि ये ये च वैकांतसेवनः
॥ ममध्यानरता नित्यं वीरास्तेऽशिवयोगिनः॥१४॥ स्मरणं कीर्त्तनं केलिः प्रेक्षणं गुह्यभाषणं॥ संकल्पो
ध्यवसायश्च क्रियानिवृत्तरेव च॥१५॥ एतन्मैथुनमष्टांगं प्रवदंति मनीषिणः॥ विपरीतं ब्रह्मचर्यमे
तदेवाष्टलक्षणं॥१६॥ तदुक्तं लक्षणं ब्रह्मचर्यव्रतपराहि यो॥ योगिनो ये महात्मानस्ते वीराः शिवयोगिनः
॥१७॥ सत्यव्रतोक्तिनिरता अस्तेयधनतत्पराः॥ अपरिग्रहशीलाये वीरास्तेऽशिवयोगिनः॥१८॥ अद्वेष्टा
रोधिके स्वस्मात् स्वसमोष्ठानसूयवः॥ अतिरस्कारिणो नूनं वीरास्तेऽशिवयोगिनः॥१९॥ स्वर्धासूयाति
रस्कारवर्जिताः शांततेजसा॥ ममध्यानपरा नित्यं वीरास्तेऽशिवयोगिनः॥२०॥ धृत्वा काषायवस्त्रं भि
क्षाटनपरा सदा॥ शिवध्यानपराः शुद्धाः वीरशैवा हि ते शिवे॥२१॥ वीरशैवव्रतस्थस्य नान्यत्कार्यं हि

विद्यते॥ ममपूजाविनाध्यानं स्मरणं कीर्तनं विना॥२२॥ यद्दोतिष्ठति निर्त्रैण स्मरन्नेव गुरुं शिवं॥उथा-
यचिंतये देविगुरुं मां लिंगरूपिणं॥२३॥ वस्त्रष्टः पूर्ववसनः शुध्धवस्त्रधरः शुचिः॥ प्रक्षाल्यपादौ हस्तौ
च धृतरुद्राक्षभूतिकः॥२४॥ भस्मशुध्धं समादाय मृदुं वायदपेक्षितं॥ पात्रमध्ये विनिक्षिप्य छादये
सुनरन्यतः॥२५॥ वामहस्ते विनिक्षिप्य छाद्य दक्षिणपाणिना॥ शैवपंचाक्षरं मंत्रं शतमष्टोत्तरं जपे
त्॥२६॥ ततः शुध्धजलं हस्तेनाछाद्य प्रजपन्मनुं॥ सहतारेण मूलेन स्नापयेद्भस्मनां भसा॥२७॥ नमो
भवाय रुद्राय शर्वाय योग्राय शंभवे॥ नमो विभूतिरुद्राय सिध्धरूपाय ते नमः॥२८॥ मूर्धनि प्रणवेनाहो
भाले पंचाक्षरेण वै॥ सद्योजातेनाक्षियुगे वामदेवेन कर्णयोः॥२९॥ इति मंत्रेण संमर्द्य सकृद्यावद
पेक्षितं॥ प्रसगमेतैर्मन्तुभिः धारयेदा शिरः पदा॥३०॥ कंठे घोरेण मंत्राणां शायोस्तत्पुरुषेण तु॥ वक्ष-
सी शानमनुना सर्वैर्नाभावथोदरे॥३१॥ नमः शिवाय रुद्राय भवायोरुद्रये शिवे॥ नमउग्राय काला-

यन्यसेज्जंघाद्वयेतथा॥३२॥नमःशिवायशांताय पादयोरुपरिन्यसेत्॥ पादांगुलीषुदन्वासु मंत्रैरेतैर्वि-
लेपयत्॥३३॥वामपादकनिष्ठादिक्रमाद्भस्मविलेपयेत्॥दक्षिणपादकनिष्ठांतंप्रादक्षिण्येनसुंदरी
॥३४॥नमस्तेऊर्ध्वलिंगायऊर्ध्वलिंगायतेनमः॥नमोहिरण्यलिंगायहिरण्यलिंगायतेनमः॥३५॥
नमःसुवर्णलिंगायसुवर्णलिंगायतेनमः॥नमस्तेदिव्यलिंगायनमोदिव्यायतेनमः॥३६॥नमोभवाय
लिंगायभवलिंगायतेनमः॥नमःशिवायलिंगायशिवलिंगायतेनमः॥३७॥अग्निमंत्रद्वयेनाथगुल्फ
योर्विन्यसेत्क्रमात्॥विन्यसेद्दक्षिणेबाहुभुजेचापिचकर्पुरे॥३८॥मणिबंधेतथावामबाहोश्चभुजकर्पुरे॰
॥मणिबंधक्रमेणैतेर्मंत्रैर्भस्मसुधारयेत्॥३९॥ज्वालायज्वललिंगायनमआत्मायतेनमः॥आत्मलिंगा
यचनमोनमस्तेपरमायच॥४०॥नमःपरमलिंगायशिवायपरकंधरे॥नमस्त्रिलिंगिनेपृष्ठेमहादेवाय
तेनमः॥४१॥नमस्तेशंभवेतुभ्यंमलिकाक्षायकक्षयोः॥सहतारेणमूलेनसर्वांगभस्मलेपयेत्॥४२॥

नक्षालयेत्करौ धृत्वा शरीरे भस्म सुंदरी ॥ निपतेत्तस्य यो बिंदुरेनं पातयति ध्रुवं ॥ ४३ ॥ ततो गुरूक्तमार्गे-
ण मम मंत्रं चाक्षरं जपेत् ॥ सहस्रं त्रिशतं वापि शतमष्टोत्तरं तु वा ॥ ४४ ॥ जप्त्वा तदनु देवेशि स्तुवीतानेन-
नित्यशः ॥ भावयन्शिवलिंगात्मा गुरुणामेकरूपतां ॥ ४५ ॥ नमः शिवाय गुरवे गुरवे शिवरूपिणे ॥
शिवलिंगाय गुरवे शिवाय गुरवे नमः ॥ ४६ ॥ सद्योजाताय संधाय स्वात्मारामाय ते नमः ॥ नमो भवोद्भवा-
याथ शिवाय गुरवे नमः ॥ ४७ ॥ नमोष्टमूर्तये तुभ्यं मष्टत्रिंशत्कलात्मने ॥ नमस्ते वामदेवाय शिवाय गुरवे न-
मः ॥ ४८ ॥ नमो ज्येष्ठाय श्रेष्ठाय कालाय कलिवैरिणे ॥ नमो बलाय देवाय शिवाय गुरवे नमः ॥ ४९ ॥ न-
मो बलप्रमथिने मनोन्मनाय ते य ते नमः ॥ नमस्ते घोररूपाय शिवाय गुरवे नमः ॥ ५० ॥ सर्वेभ्यः सर्वशर्वे-
भ्यो घोरघोरतराय च ॥ नमस्ते रुद्ररूपेभ्यः शिवाय गुरवे नमः ॥ ५१ ॥ नमस्तत्पुरुषायाथ महादेवाय ते न-
मः ॥ नमस्ते वीरशैवाय शिवाय गुरवे नमः ॥ ५२ ॥ वीरशैवमतेशाय महावीराय शंभवे ॥ नमस्ते वीरशै-

पार·तं· वायशिवाय गुरवे नमः ॥५३॥ ईशानाय नमस्तुभ्यं ईश्वराय नमोस्तु ते ॥ मीढुष्टमाय महिते शिवा अध्या
३ यगुरवे नमः ॥५४॥ स्कभक्तकालकूटाय कद्रुद्राय प्रचेतसे ॥ परायफणिभूषाय शिवाय गुरवे नमः ८
॥५५॥ गंगाधराय गौराय गौरीनाथाय विद्महे ॥ धीमहीशाय देवाय तन्नो रुद्रः प्रचोदयात् ॥५
६॥ शिवलिंगाय गुरवे गुरवे शिवरूपिणे ॥ लिंगप्राणैकरूपाय प्राणलिंगाय ते नमः ॥५७॥ एतै
द्वादशभिः श्लोकैः स्त्रिकालं प्रत्यहं शिवे ॥ पूजयित्वास्तु वेन्मायो लिंगरूपिणमव्ययं ॥५८॥ नित्यं भ
वायतां मर्त्यो नराणां चर्मचक्षुषां ॥ धृत्वा मानुषरूपेण शिवोहं परमार्थितः ॥५९॥ यस्मिन्दिने पठेत्स्तो
त्रमिदं भक्त्योपासि प्रिये ॥ न दैवस्तु हि नं तस्य नान्यथा परमार्थितः ॥६०॥ समाप्योपासिकं कर्म प्रय
तो निर्गमेद्बहिः ॥ यद्यस्ति भक्तिशक्तिश्च पूजयेद्गुरुमीश्वरं ॥६१॥ यावल्लब्धेन दैवेन्निपुष्पपत्राक्ष
तादिभिः ॥ संपाद्य पूर्वदिवसे सर्वदोपासि पूजयेत् ॥६२॥ नित्यं पूजोपासि शिवे माध्यान्हे सायमेव च ३

सायं प्रातरशक्तोतु पूजयेत्सर्वदोषसि ॥६३॥ शक्ताउषस्यर्चनाया मर्चयेदन्यथाशिवे ॥ संध्यायामर्चये-
नित्यंयथारुचितथा भवेत् ॥६४॥ नित्यंत्रिकालतोनित्यंमाध्यान्हेर्चनमेछिकं ॥ नित्यंप्रातश्चसायंच
पूजानित्य कहाशिवे ॥६५॥ अशक्तश्चा सहायश्च यथेच्छंपूजयेत्सदा ॥ शक्तोपियोनकुरुतेरौरवेन
रके वसेत् ॥६६॥ सत्याम ःपिच सामर्थ्यंशक्तावपिममार्चने ॥ नपूजयश्चाद्येनकामुको विषयातुरः
॥६७॥ कर्मज्ञानोभयोश्रेष्ठो निममोदुःखसागरे ॥ रौरवेन रकेघोरे वसेदाचंद्रतारकं ॥६८॥ भूता
नांप्राणिनःश्रेष्ठबुध्धिमंतस्ततोधिकः ॥ ततस्ततोपिचबृहत् बहुधाकृतयोपुनः ॥६९॥ सर्वोत्तमाहि
मनुजास्तत्रविप्रामहोत्तमाः ॥ ततःपाशुपताःश्रेष्ठाः लिंगिनस्तुततोधिकाः ॥७०॥ वेदिनःकर्मकर्तार
स्तदर्थज्ञोविशेषतः ॥ ततोवेदांतसारज्ञास्ततःसंन्यासिनःपराः ॥७१॥ ततोधिकामहाश्रेष्टाःवीर
माहेश्वरःशिवे ॥ नतेभ्योह्यधिकःकश्चिद्दारशैवमतंभवेत् ॥७२॥ तावन्महिमसंपन्नोवारःशैवःपरः ॥

॥पार·तं·॥ ॥साक्षान्मद्रूपतामेत्यवीरशैवमतं भवेत्॥७३॥ नयहीतेंद्रियग्रामः स्फविविक्तस माश्रयः॥ यदिस्या ॥अध्या·॥
॥४॥ ध्याननिरतसतरेद्विविधंलघु॥७४॥ सयघदृढवैराग्यः सरागीविषयातुरः॥ सभूयोजायतइतिन ॥८॥
दुःखायस्फुरवायहि॥७५॥ नयावदृढवैराग्यंनयावद्विषयास्पृह्॥ नतावल्लभतेमुक्तिंविधूय·
विषयोयतः॥७६॥ यदाविनाशः प्रारब्धकर्मणः फलभोगतः॥ संचितस्यस्वविज्ञानमसंश्ले·
षान्नहेय्यतः॥७७॥ सवासनंमहादेविभक्तस्यशिवलिंगिनः॥ वीरशैवमतस्तस्यमुक्तिःकरत·
लेस्थिता॥७८॥ द्विविधं व्यवहारस्ययदानाशःस्ववासनं॥ यदेवाखंडविज्ञानवीरशैवस्तथाभ·
वेत्॥७९॥ अनालक्षितलोकोयःसर्वदान्नमितारानः॥ अजागरूकश्चास्वप्नोवीरशैवस्तेथा॥ ।सउच्यते।
भवेत्॥८०॥ यदिगच्छेत्क्रमेणैवसोनायासेनमुच्यते॥ आरुह्ययः पतेद्भूयोव्यवधानेनमुच्यते
॥८१॥ नहिकल्याणकृत्कश्चित्दुर्गतिंदेविगच्छति॥ धृत्वालिंगंममशिवेकथंयास्यतिरौरवं॥ ॥४॥

८२।। प्राप्यपुण्यकृतान् लोकानुषीत्वाशाश्वतीः समा।। गृहेषु लिंगिनामेव व्रतभ्रष्टोऽभिजाय
ते।।८३।। एतद्धि दुर्लभतरं लोकेजन्मयदीदृशं।। तत्रतंबुध्धिसंयोगं लभते पौर्वदेहिकं।।८४।। यत
ते च ततो भूयः संसिधौ गिरिनंदने।। क्रमेण कुरुते वीर शैववीरसमाश्रये।।८५।। मतस्य मम विस्ता
रूचरमंतस्य जन्मतत्।। स्वरूपं फलतः प्राप्य याति कि न्नोपदो मम।।८६।। पूर्वाभ्यासेन तेनैव न्हीयते
ह्यवशोऽपि सः।। अनेक जन्मसंसिध्धिस्ततो याति शिवं परं।।८७।। तपस्विभ्योऽधिको लिंगी ज्ञानि
भ्योऽपि मतोऽधिकः।। कर्मिभ्यश्चापि योगी यः शिवत्वप्राप्तिकारकाः।।८८।। अथवानंतरं भानो रु
दयाद्दर्चयेच्छिवं।। पूजाकालस विज्ञेयः शिवलिंगी विशिष्यते।।८९।। उषः सूर्योदयात्पूर्वं मुहूर्त्तावध्य
ने हसि।। माध्यान्हेऽपि तथा सायंकलानक्षत्रदर्शनं।।९०।। निर्वर्त्योषसि किं पूजां जपस्तोत्रादिकं प्रि
ये।। निर्गमेदटितुं भैक्ष्यं मणम्य गुरुमादितः।।९१।। यदि भिक्षाटणेंछास्ते तदाभिक्षाटनं चरेत्।। नक ने

र्त्तव्यस्त्वनियमोंसाधनंज्ञानमेवहि॥९२॥ पर्यटेल्लिंगनामेवभक्तानांशिवयोगिनां॥यावदिच्छ
न्गृहद्वारंपक्वंवापक्वमेववा॥९३॥निबध्यपादयोर्घंटांवाघंटांवाजयघंटिका॥शंखश्चशृंगिनादः
वादंडघंटोपिपर्यटन्॥९४॥ रुद्राक्षाणांचमालाभिः कंथाकंबलभूषितः॥विज्ञापयित्वागृही
णः कयाचिच्छब्दसंज्ञया॥९५॥भिक्षेत्याज्ञापयेल्लिंगीगुरुधर्ममनुस्मरन्॥गृहीयागृहिणीवापि
नत्वाजंगममानयेत्॥९६॥शिवबुध्यार्चयित्वातंसंतृप्तंप्रेषयेत्पुनः॥यद्यपक्वंसमानीतंपक्वंकृ
त्वार्पयेन्मम॥९७॥ यदिस्यात्पक्वमानीतमश्नीयादर्पितंमम॥नचैकभुक्तनियमोनोपवासादि
नोव्रतं॥९८॥त्रिकालमर्चयेल्लिंगंविहरेतयथासुखं॥विषयेंद्रियसंरोहंधं नैरंतर्येणयावता
९९॥ यत्नेनयततेलिंगीतावद्दुःखसुखंव्रजेत्॥यथैवगच्छन्मार्गेषुशीतवातातपादिता॥१००॥
विषह्यलघुदेवेशिस्वपदंचाधिगच्छति॥नस्त्रीषुनैवानर्हेषुनाधर्मेष्वपिजन्मसु॥१०१॥विषह्यल

घुदेवेशिस्वपदं चाधिगच्छती॥ नस्त्रीषुनैवानर्हेषु नाधर्मेष्वपिजन्मसु॥१०१॥ नतिर्यगादिनी-
चेषुजायतेवीरशैवगः॥ वीरशैवमतस्थस्य पूजयेच्छिवरूपिणं॥१०२॥ निस्तारयतिदातारं
दशपूर्वान्दशापरान्॥ यस्तिरस्कुरुतेमूढः शिवलिंगीनमीश्वरी॥१०३॥ सकोटिकुलसंयुक्तोरौ
रवेनरकेवसेत्॥ तदेतत्कथितंदेविवीरशैवस्यलक्षणं॥१०४॥ आचारंचफलंचापिकिंभूयश्रोतु
मिच्छसि॥१०५॥ इतिश्रीपारमेश्वरतंत्रेशिवाद्वैतसिध्धांतेदीक्षाप्रकरणे अष्टमपटलः समाप्तं
॥८॥ श्रीसांबसदाशिवार्पणमस्तु॥ शुभंभवतु॥ श्रीनृसिंहसरस्वत्यार्पणमस्तु॥ दत्त॥ दत्त॥ राम
॥७॥७॥७॥७॥७॥७॥७॥७॥७॥७॥७॥७॥७॥७॥७॥७॥७॥७॥

॥पार·तं॥

॥८६॥

॥अध्या॥

॥८॥

॥८६॥

श्री गणेशायनमः ॥ श्री सरस्वत्यैनमः ॥ श्रीगुरुभ्यो नमः ॥ श्रीगौरीशायनमः ॥ देव्युवाच ॥ ०

नमश्चैतन्यरूपायनमः पंचमुखायैते ॥ वदविस्तरतो देववीरशैवस्यविक्रमं ॥ १ ॥ कथितामतभेदा
स्तेलक्षणादिनिरूपितं ॥ वीरशैवमतस्यापि महिमा वर्णितेस्त्वया ॥ २ ॥ उक्ताधिकारीज्ञानेनवीर
शैवमतंगतः ॥ यथोक्तफलमाप्नोति शुश्रावेदंमयाखिलं ॥ ३ ॥ सहवासबलान्नान्योवासनावास·
नोपिवा ॥ स्वस्थः परवशो वापि कार्यार्थंवाभयातुरः ॥ ४ ॥ क्रमेणव्युत्क्रमेणंवा ॥ नशास्त्राचार्यशि·
क्षास्तेनज्ञानंनविवेकता ॥ हयद्वाउद्दितो वापि कार्यार्थंवाभयातुरः ॥ ५ ॥ अलब्धसंज्ञकृज्ञान·
श्चनस्थैर्यंनापिचापलं ॥ वीरशैवमतंप्राप्य कागतिंशिवगच्छति ॥ ६ ॥ अभावादधिकारस्य वी
रशैवमतंव्रजेत् ॥ नकश्चिदुभयभ्रष्ट प्राप्तसागेनशंकर ॥ ७ ॥ ईश्वरउवाच ॥ यथोक्तस्ययथोक्त
स्यात्सुलंचापिगतिंगते ॥ किंत्वन्येषांप्रवक्ष्यामि महिमानंगतिंत्वयि ॥ ८ ॥ यथांधोवापि पंगुर्वामू·

॥पार॰तं॥ कोवाबधिरोपिवा॥उन्मत्तोवापिसर्वज्ञोदरिद्रोवामहीपतिः॥९॥ पुण्यवानपिपापीवासाधुर्वादु ॥अध्या॥
॥३॥ र्जनोपिवा॥यद्विशुध्धोप्यशुध्धोवाकाशींप्राप्यभवेज्जनः॥१०॥ प्रविष्टमात्रेणशिवेपंचक्रोशात्म ॥९॥
केमयि॥अहमेवहितेसर्वेवीरशैवमतेतथा॥११॥प्रवेशमात्रेणशिवेममशैवमतेनरः॥सोहमे
वनसंदेहःकिमुवीरशिवोयदि॥१२॥क्षुधितस्यापितृप्तस्यशर्करामधुरायथा॥ज्ञानिनोज्ञानिनश्च
पिवीरशैवसुखंमहत्॥१३॥भयंनास्तीतिविषयेअनुरक्तोभवेद्यदि॥संसक्तःस्वोचितांचारःसंप॰
तेद्धोरवेचिरं॥१४॥नगृहात्तेंद्रियग्रामोनियुक्ताध्यानतत्परः॥अनपेक्षःस्वतःप्राप्तेप्यात्मध्यानपरा
यणः॥१५॥एकांतभक्तिरीशानेयत्सर्वत्रनतद्दीक्षणं॥अहंताभावनारवंडशांतिःप्राणिदयापरः॥१६॥
इत्यादिशासनोपेतःसक्रमात्कालमन्वहं॥स्थितस्यैवयोगेनयद्यबाधंजनुष्मतां॥१७॥क्वचिद्देवभ
।परो। वेच्चित्तंनिशामयमहेश्वरी॥यदिपीडाभवेन्मूढाःसपतेनात्रसंशयः॥१८॥यथाकथंचिद्योवीरशैवः॥सं ॥९॥

चितपुण्यतः॥ यदाकदा भवति तदा सोहं देवि नसंशयः॥१९॥ विना ममानुग्रहेण प्रवेशो लभ्यते नृभिः॥
न शैवमात्रे देवेशि वीरशैवमते न किं॥२०॥ तत्सर्वकर्मविलयः सर्वपुण्यफलोदयः॥ वीरशैवव्रतं तं
न लभ्यते देवि नान्यथा॥२१॥ अनाद्याद्दिषु भेदेषु यत्रयत्र खलेह्नते॥ कृपया मम कल्याणी वीरशैवनभु
ध्यति॥२२॥ वीरशैवमतं स्थाप्य यः कुर्यात्सरिपीडनं॥ भोगार्थं संग्रहं मद्यं मांसं स्त्रीचकलंजनं॥२३॥
वीरशैवमतं प्राप्य यो बुध्या विषयातुरः॥ श्वानयोनिशतं गत्वा चांडलो भुवि जायते॥२४॥ वीरशैवः
।म। व्रतं प्राप्य यः कुर्यात्सरिपीडनं॥ कर्मणा मनसा वाचा स वसेद्घोरवेचिरं॥२५॥ स्वर्णस्तेयं दिवानिद्रां
सर्वदैकान्नभोजनं॥ प्राकृतैः सहसंगं च संगत्यागं च लिंगिनां॥२६॥ स कोटिजनस्र श्वानं श्वांडलो भु
वि जायते॥ वाहनं जनसंगं च स्त्रीकथालोल्यमेव च॥२७॥ अनाधारं तथालस्य वीरशैवो न कारयेत्॥
॥पम॥ यः पश्यसंधवद्रूपं शब्दविद्बधिरोपि वा॥२८॥ काष्टवदृष्टदेहो यो वीरशैवः स उच्यते॥ न बुध्या चिंतयेद

॥पा॰तं॥ थंवीरशैवव्रतेसकृत्॥२९॥ संप्राप्यदुःखवाराशिं शनैर्मुक्तोभवेद्ध्रुवं॥ नयस्यानीश्वरश्चित्तं य· ॥अध्या॥
॥२॥ स्यचक्षुर्नदूरगं॥३०॥ नप्राणीपीडनपरोवीरशैवः सउच्यते॥ मर्मविज्ञायशास्त्रस्ययोबुध्याविः ॥९॥
षयातुरः॥३१॥ तस्यनास्त्येवनास्त्येव मसद्प्राप्तिरीश्वरी॥ लब्धेनिधौदरिद्रस्य गोपनंतस्यजीव·
नं॥३२॥ अस्थाभक्तिश्चतासयंवीरशैवस्तथायदि॥ तिष्ठेद्गुरूक्तमार्गेणसोनायासेननिर्वृतिं॥०
३३॥ यातिमत्तपयानोचदुःखेनायातिनिर्वृतिं॥ नहठात्सविरोधीरशैवव्रतमहाबुधो॥३४॥ धीमा
न्विनासाधनेनअयासस्सुखकामनः॥ हठाद्यत्सविस्यदेवादप्रमत्तस्ततोभवेत्॥३५॥ यद्यस्थि
रेंद्रियग्रामा सपतेनात्रसंशयः॥ यथामतेषुसर्वेषुतुरीयत्वेनशस्यते॥३६॥ सन्मासस्यान्यधर्मस्य
वीरशैवमतस्यच॥ खड्गारोहंदिवानिद्रां तांबूलाभ्यंगविग्रहान्॥३७॥ स्त्रूवर्णमुक्तावासश्चाप्यलिं
गीवर्जयेद्यतिः॥ येकत्रवासमेकान्नं रसवर्जनसंगमं॥३८॥ समाजमुत्सवंलोकं त्वलिंगीवर्जयेदिति॥ ॥२॥

॥३९॥ द्विरन्नमेच्छिकं क्षौरं लोहपात्रेषुभोजनं॥ तथैच्छिकजले स्नानं नलिंगी वर्जयेद्यतिः॥४०॥ ग्रस्त
योरस्तगतयो राहुणा शशिसूर्ययोः॥ शक्तो भैक्षमहोरात्रमलिंगी वर्जयेद्यतिः॥४१॥ अमृत्तिकादि
नियममम स्पृष्ट्वावगाहनं॥ अपूर्वापरकर्मांग मलिंगीवर्जयेद्यतिः॥४२॥ उपानह मनड्वाहं स्वयंपा
कंस्रगंधिकं॥ अकरस्थालंभुक्त्वा वालिंगी वर्जयेद्यतिः॥४३॥ पुष्पिण्यावापिगर्भिण्या सूतकान्नमशु
ध्धया॥ वृत्तिश्चवीरशैवस्य लिंगिनोलिंगतः स्मृतं॥४४॥ अलिंगिनो यतोदेवि बहुक्लेशं भवेत्सदा॥ भ
त्त्यापिदत्तं कृच्छ्रेपिद्यलिंगी वर्जयेद्यतिः॥४५॥ नकायक्लेशसहनं नवृतादाउपोषणं॥ नद्वंद्वसहनं भद्रे
वीरशैवस्यलिंगिनः॥४६॥ बध्धातुरस्यतु सदानास्त्येवममरूपता॥ सर्वसाधारणमिदमनायासो
विशिष्यते॥४७॥ अभ्यावावापिशुध्धोवा खट्वायामुपविश्यवा॥ पूजायाममलिंगस्य मामेवेति
नसंशयः॥४८॥ तिर्यगादिषुयोषित्सु भूत्वामत्वासहस्रशः॥ अनुष्ठायाहृतादीनि तत्रसंचितपुण्यतः

भवेन्मत्कृपयादेवि एकस्मिन्जन्मनिद्विजः॥अधीत्यवेदान्वेदांतंलब्ध्वातत्वंगुरोर्मुखात्॥५०॥संत्यक्तवि-
षयस्नेहसर्वभूतदयापरः॥संन्यस्यसंश्रयोद्योगंयेनमामेवयातिसः॥५१॥निष्पन्नयोगश्चरमेभवेलिं-
गीजनषथ॥तत्पक्कफलसारांशवीरशैवंमतांश्रयेत्॥५२॥ तत्वादुन्नतमागस्यपदंशैवमतंमम॥तत्रस-
र्वोन्नतंवीरशैवव्रतमनुत्तमं॥५३॥वीरशैवव्रतवतोव्यवधानंममापिच॥एतावद्देहांतेश्चैकायवनिकायदा वरे
॥५४॥शक्नोतिहेक्यसोढुंप्राकृशरीरंचविमोक्षणात्॥कामक्रोधोद्भवंवेगंसयातिलघुमांछिवे॥५५॥
यश्चशक्तःशिवेसोढुंवीरशैवमतंगतः॥निग्रहीकरुणानंतुसहक्रोणोपशाम्यति॥५६॥देवोपलब्धसु-
खंभुक्त्वाशिवपूजापरायणः॥वीरशैवपदंप्राप्यसुखेनोपैतिनिर्वृतिं॥५७॥त्रिकालंभस्मनास्नानंशक्ति-
तोलिंगपूजनं॥भैक्षंचशिवभक्तेषुवीरशैवस्यलक्षणं॥५८॥पात्रमेकंतुभैक्षायाःकंथोकारुष्णाकंबला॥दं-
डोध्वनिःशिवेभक्तिवीरशैवस्यलक्षणं॥५९॥चुलिंकापात्रदंडेचकंथाचकृष्णाकंबलः॥मुद्रैषावीरशैवस्य ॥२॥

वीरशैवस्यलक्षणं॥६०॥मौनमेकांतवासश्चमच्छास्त्रस्यावलोकनं॥विरक्तिर्विषयाग्रामेवीरशैवस्य
लक्षणं॥६१॥शांतिर्निष्ठाभूतदयाचित्तवृत्तिनिरोधनं॥सर्वत्रेश्वरतादात्म्यंवीरशैवस्यलक्षणं॥६२॥
नैवरक्षंतिविषयानतुभोगाचबांधवाः॥नैवसंपन्नदारिद्र्यं निष्ठेकासतिशंकरे॥६३॥ गुरुशुश्रूषणं
शास्त्रचिंतनंतदनुष्टुभिः॥शांतिरेकांतवासश्च भक्तिर्देविशिवेमयि॥६४॥पूजनंसर्वदालिंगेवीरशैवो
पसर्पणं॥मसद्गामयेचैतत्सोपानपथमुच्यते॥६५॥अरण्येसंतिपात्राणिनद्यां स्वादुदकानिच॥सं
तिहस्तौचपादौचमलिंगीरूपमद्दवं॥६६॥नोद्यमोनास्यसेवावनायार्थोसोनोर्थसंक्षयः॥आसाध्य
सुखमीशंमाधीमानेतिशिवंपदं॥६७॥लब्ध्वापिमूढःपुण्येनवीरशैवमतंमम॥नसाधयेत्स्करंवंयस्तुको
न्यतस्माद्चेतनः॥६८॥वीरशैवमतंप्राप्ययोऽन्यथासुखमिच्छति॥ससंत्यज्यगुडंमूढो लेलीहेस्पर्णमी
श्वरी॥६९॥वीरशैवमतेस्थोयोअकांक्षेक्षाणिकंसुखं॥आरुह्यपट्टभद्रेभं प्रविशेजलनिर्गमं॥७०

॥पा॰ तं॥ प्राप्यवीरमतंसत्क्रान्यथेछेद्यपरंमम॥सगृहीत्वाशुनः पुच्छंतत्तुमिछतिसागरं॥७१॥पुण्यैकलभ्यमा ॥अध्या॥
श्रित्यवीरशैवमतंमम॥योवंध्यंदिवसंकुर्यात्कोन्यस्मादास्यचेतनः॥७२॥करस्थितज्वलद्दीसेवी· ॥९॥
॥४॥ रशैवभिधेसति॥कुपथ्येनव्रजेयस्तुसोधोनगतिलोचनः॥७३॥वीरशैवव्रतस्वछवज्रनावमधि
ष्ठितः॥स्रुखंतरेद्रुवांबोधिंभक्तिनाविकचोदितः॥७४॥प्राप्यपिताहृषीनावमालस्येनैववासु·
ना॥प्रतिकूलेनदुःखाब्धौपासतेनिहतःसहि॥७५॥अभक्तेनाविकत्वेनादृढवैराग्यगौरवात्॥अ
धैर्यस्तंभितोनौकाम्पातयेद्रुग्नसाधनः॥७६॥कामलोभादिसहितःश्चोराहिविषयायतः॥ज्ञानर·
त्नापहारायपततंसततंशिवे॥७७॥अशक्तःसहिनोमूढोदृढंसुखस्यलक्षणं॥चिरंवसतेक्लेशांमः
धुमग्रेवमक्षिका॥७८॥अवर्जनीयोप्राप्यापिभोक्तुंप्राप्यापिदुःखदा॥यएषोभयदाशत्तुर्विषयःसु ॥४॥
खनाशकः॥७९॥तदात्वामलंस्पृष्ट्वाविषयंक्षालयेत्सुधीः॥जलेनवीरशैवेनव्रतेनैवशुचिर्भवेत्॥८०

यथैधांसि समिद्धोग्निर्भस्मसात्कुरुतेग्निवे॥ तथैव निर्दहेद्दुःखं वीरशैवव्रतानलः॥८१॥ वीरशैवव्रतमहा
वज्रपंजरमध्यगः॥ तिष्ठेद्नामयेनिसंस्कःखं हंसद्वाद्विजे॥८२॥ तिष्ठेद्नादिभेदेषु यद्छिछाविषयेष्व
थ॥ भुंजन् समुचितान् भोगान् पूजयेल्लिंगमुक्तिवित्॥८३॥ अर्चयेदतिथीन् भक्त्या साधयेत्कर्मचो
दितं॥ यद्यादिस्वार्चयेल्लिंगं मनुस्थश्रवणीभवेत्॥८४॥ विरोदथ महाशैवे मननायुक्तसाधनः॥ योग
युक्ताधिकारी सन् योगशैवमतं भजेत्॥८५॥ इषणात्रयनिर्मुक्तस्त्यक्तरागो जितेंद्रियः॥ योगशैव
मतं प्राप्य वधिकारोयमीश्वरी॥८६॥ ज्ञात्वागुरुमुखाच्छास्त्रं धृतकाषायदंडकः॥ प्रव्रजेद्गृहसुत्सृज्य
शिखिमुंड्यपि वाजटि॥८७॥ योगशैवमते वीरं भक्त्या नत्वा समाश्रयेत्॥ ततोधिकारसंप्राप्य व्र
तं पाशुपतं श्रयेत्॥८८॥ तदैव ज्ञानशैवाख्यं ततो वीरव्रतं चरेत्॥ कथितो योवधूताख्यो वीरशैवसदी
श्वरी॥८९॥ नातोधिकं मतं किंचि नास्ति मत्तःपरं सुखं॥ वीरशैवमतं नाम नावधूतव्रतात्परं॥९०॥

॥पा॰तं॥ शक्यते साधितुं प्राप्य न तत एव व्रतं चरेत् ॥ नैव शुध्धिर्न चाशुध्धिर्नैव वंद्यकवंद्यता ॥ ९१ ॥ न पूज्य· ॥अध्या॥
॥५॥ पूजकविधिर्न शिष्यो न गुरुः शिवे ॥ न माता न पिता भार्या न चांडालो न भूसुरः ॥ ९२ ॥ न गोर्न शु ॥९॥
न को ह्यस्ति गर्दभो वापि भेदतः ॥ नोत्तमं मध्यमं नीचं न न्यूनमधिकं समं ॥ ९३ ॥ वीरशैवावधूत
स्य सममेवाखिलं शिवे ॥ अखंड सच्चिदानंदं देहदृष्टांतवर्जितं ॥ ९४ ॥ अप्रतर्क्यमनिर्देश्यमव्य·
यं द्वैतवर्जितं ॥ निर्लेपमखिलाधारमसंगं सर्वकारणं ॥ ९५ ॥ सर्वदृक् सर्वसुक् सर्वमसर्वं सर्वतोमु·
खं ॥ तदेकमुच्यत प्रज्ञमप्रज्ञं भूतयोहितं ॥ ९६ ॥ ज्ञानज्ञेयं ज्ञानगम्यं ब्रह्म शैवपदं मम ॥ तन्मयं भावये·
त्सर्वं जगदेतच्चराचरं ॥ ९७ ॥ अनंतसागरारूढ स्फुरन्नौगर्भगः स्फुरंवं ॥ पुनरावृत्तिरहितमनामयमवि
क्रियं ॥ ९८ ॥ शैवमम पदं प्राप्य शिवो सोहमहं शिवः ॥ न क्रमो न विधिर्दोषनिषेधौ भाविताम्मनाः ॥ ९·
९९ ॥ वीरशैवावधूतस्य सोहमेव शिवस्वयं ॥ न पुण्यं न चैव पापं नाधमागतिरंतमा ॥ १०० ॥ स्वयमेवा ॥५॥

खिलं देवि वीरशैवः शिवोप्यहं॥ इति ते कथितं देवि संक्षेपेण मयाक्कचित्॥१०१॥ महात्म्यं वीरशैवस्य किं भूयः श्रोतुमिच्छसि॥१०२॥ इति श्री पारमेश्वरतंत्रे शिवाद्वैतसिद्धांते नवम पटलः समाप्तं॥ ९ ॥

॥छ॥छ॥छ॥छ॥छ॥छ॥छ॥छ॥छ॥छ॥छ॥छ॥छ॥छ॥छ॥छ॥छ॥छ॥छ॥छ॥छ॥

श्रीगणेशायनमः॥ श्रीशंकरायनमः॥ श्रीपार्वतीशं वंदे॥ श्री शंकरं नौमि॥ देव्युवाच॥ राम॥
योगीहृत्पद्मवासाय योगिवेद्यस्वरूपिणे॥ ब्रह्मतत्वप्रकाशाय शिवाय शिवते नमः॥१॥ अनादि
शैवनिष्ठस्य सोऽप्याचारोविधिः सदा॥ संकल्पोद्दिश्यचफलं शक्त्याजंगमपूजनं॥२॥ नित्यं नैमित्ति
कं कामं यथोक्तं गुरुशास्त्रतः॥ आचारेत्त्रिविधं कर्म यथेच्छस्तु स्वभुग्भवेत्॥३॥ आदिशैवमतस्थश्च
स्य यावन्नित्यं तथाचरेत्॥ यदि शक्त्यचरेदन्यं नित्यं बुध्या तथाचरेत्॥४॥ अनुशैवमतस्थस्यैश्च नित्य
मेव समाचरेत्॥ त्यक्त्वा कर्मफला संगं काम्यनैमित्तिकानिच॥५॥ यथाशक्त्याचरेनित्यं त्यक्त्वाशं
क्यं स्मरेच्छिवं॥ सर्वलिंगमयं ध्यायेन्महाशैवव्रजेदिति॥६॥ निरूपितं महादेव भगवन्भवताप्रभो॥
स्वरूपं योगशैवस्य ज्ञातुमिच्छास्ति मे हृदि॥७॥ इत्येतदधिकारोपि सोपानावलिरीरिता॥ एतां
दृष्ट्वाधिकारीसन्योगशैवं व्रजेदिति॥८॥ यन्नामज्ञानशैवं तन्नु कभेदं ज्ञानयोगयोः॥ याभ्यांसम

 न्वितोवीरशैवव्रतफलंलभे॥९॥एतत्सर्वंसविस्तारंब्रूयाहिशंकरत्वतः॥वदतस्त्वियशिष्योहंप्रियोऽ 
 सित्वंगुरोर्मम॥१०॥ईश्वरउवाच॥शृणुदेविप्रवक्ष्यामिरहस्यमिदमुत्तमं॥प्रत्यक्षावगमंधर्म्यंससुखं 
कर्तुमव्ययं॥११॥नेदंपूर्वंमयाक्वापिकथितंत्वितमद्भुतं॥त्वयिस्नेहेनवक्ष्यामिश्रुत्वाधारयगोपय॥
१२॥शैवभेदस्ययद्योगपूर्वत्वंयोगपातवत्॥सचापिद्विविधोयोगःसकराश्चनिराकृतिः॥१३॥निरा-
कृतिनिराकारोध्यातृध्येयाविवर्जितः॥ज्ञानज्ञेयःज्ञातृभेदप्रत्ययत्रयवर्जितः॥१४॥नतत्रचंद्रमाःसू-
र्यानक्षत्राणिहिरण्योनलः॥विद्युद्वातांबुधरणीमेरुब्रह्मांडसंज्ञिकः॥१५॥यदखंडपरंज्ञानंयदेकंस्वच्छम-
व्ययं॥यदव्यक्तंमनोतीतंतत्तरेकंब्रह्मकेवलं॥१६॥तद्भावनोदिकारीयोज्ञानयोगान्वितःशिवे॥वीरशैवव्र-
धूतोपिसएवकथितःशिवे॥१७॥बहिर्गतेपिनाचिन्हेस्तासाभावंविनाक्वचित्॥तत्तद्दास्यात्स्वभावेन
ज्ञानशैवव्रतीभवेत्॥१८॥न्यूनाधिकारिणस्तत्रसर्वेक्ष्यज्ञानकर्मणि॥विविक्तदेशमाश्रित्यध्यान 

मेवसदाभ्यसेत्॥१८॥ न्यूनाधिकारिणस्तत्र॥शुचौदेशेप्रतिष्ठाप्य स्थिरमासनमात्मनः॥तरक्षुवं वा
मार्गंवाचर्मास्तिर्यतथोपरी॥१९॥आस्तिर्यकंबलंकृत्स्नंवस्त्रंकाषायमास्तरेत्॥अभ्यसेदासनंचादौ
उपविश्ययथासुखं॥२१॥आसनेतुजितेदेवि जितोदेहोपिचस्वतः॥पार्ष्णिपाणिद्वयोभूत्वानासा
ग्रेगतलोचनः॥२२॥अतिष्टेस्थाणुवत्स्वस्थोयथादीपोनिवातगतः॥ समंकायसमग्रीवंधारयन्नचलं
स्थिरं॥२३॥हृत्पुंडरीकेनाभ्यंवा स्वाधिष्ठानेपिमूलके॥ विशुध्धौचापिविज्ञायां सहस्रारेपिवाशिवे॥
२४॥ब्रह्मरंध्रेशिवाग्रेवा द्वादशांतेचिदासनि॥एतदन्यतमस्थानेध्यायेन्मांपरमेश्वरं॥२५॥दिव्यसिंहा
सनंतत्र फणिकामध्यभागतः॥मंडपंचतुरंस्तंभंवितानावलिशोभितं॥२६॥भावयित्वातुपरितः कल्पवृक्ष
वनावलिं॥परितस्तस्यसंभाव्यंभावयेत्क्षीरसागरः॥२७॥दीपंमणिमयंध्यायेतन्मध्येमणिमंडपं॥मु
क्तप्रवालशोभाढ्यंचतुर्द्वारसमन्वितं॥२८॥ सर्वतोदीप्तिकारेखातोरणाद्यैरलंकृतं॥सर्वशृंगारसंपूर्णं

मनसैव विभावयेत्॥२९॥ मध्ये वज्रमये पीठे पद्ममष्टदलं लिखेत्॥ वृत्तं कलास्त्रवृत्तांते भावयेद्भूपरत्र
यं॥३०॥ षट्कोण मध्ये विलिख्ये त्रिकोणं तस्य मध्यतः॥ केसरान्विलिखेदष्ट पत्रमध्ये तु षोड्स्यं॥३१॥
बिंदुपरि महादेवि दिव्य सिंहासनं स्मरेत्॥ नवरत्नमयं रम्यं सूर्यकोटि समप्रभं॥३२॥ नवसोपानसं
युक्तं सर्वदेवमयं शिवे॥ सर्वशक्तिमयं सर्वमंत्रयंत्रमयं परं॥३३॥ तत्र मांससुखासीनमुमया सहितं
शिवं॥ चतुर्भुजमुदाराग चंद्रशेखरमव्ययं॥३४॥ भस्मोध्धूलित सर्वांगं नागाभरणभूषितं॥ कुमारेणाभ
यवरपाणिपंकजमीश्वरं॥३५॥ मंदस्मितं त्रिनयनं मीशानं कृत्तिवाससं॥ प्रसन्नं वदनं भोजं सर्वालं
कार शोभितं॥३६॥ एवं ध्यायेच्चिरं रोग्यावरणानि ततो यजेत्॥ सर्वत्र मूलमंत्रेण सह तारेण मंत्रवि
त्॥३७॥ पुरतो नंदिनं ध्यायेद्दक्षिणे गणनायकं॥ तत्सन्निधे महावीरभद्रमुत्तरतो गुहं॥३८॥ चतुर्दि
क्षु त्रिकोणस्य मातृदक्षिण्ये नशांकरी॥ यजेदारभ्य च स्वाग्रं नद्यादीनां चतुष्टयं॥३९॥ अथ षट्कोण

कोणेषु प्रादक्षिण्येन भावयेत्॥ षडामोदादिकान् षट् स्कंवाहनायुधसंयुतान्॥ ४०॥ आमोदं च प्रमो
दं च स्कंसुखं दुर्मुखं तथा॥ अविघ्नं विघ्नकर्त्तारं कोणाग्रेषु गणाङ्कगं॥ ४१॥ भवं पशुपतिं रुद्रं शिवं शर्वं त्रि
यंबकं॥ त्रिनेत्रं पंचवदनं पत्रेषष्ठसु पूजयेत्॥ ४२॥ वृषध्वजं वृषारूढं जटिलं चंद्रशेखरं॥ कपर्दिनं
कालकंठं पिनाकिनमुमापतिं॥ ४३॥ भूतेशं शांकरं स्थाणुं भाललोचनमीश्वरं॥ प्रथमं प्रथमाधारं
परमेश्वरमीश्वरी॥ ४४॥ भावयेत्केसरेष्वेतान् षोडशोष्वपि षोडश॥ अथ षोडशपात्रेषु शक्तिषोड
श भावयेत्॥ ४५॥ ईशानी शांकरी रौद्री कालकंठी कपालिनी॥ गांधारी हस्तिजिह्वा च पिंगलेज्जसु
षुम्निका॥ ४६॥ राकाकुहूः सिनीवाली भूतधात्री गिरींद्रजा॥ स्वासाहे मवती शानी वाहनायुधसं
युता॥ ४७॥ असितांगं गुरुं चंडं क्रोधमुन्मत्तभैरवं॥ कपालनं भीषणाख्यं संहाराभिधभैरवं॥ ४८॥
यजेत्प्रथमरेखायां भावयेद्यथमध्यमे॥ ब्राह्मीमाहेश्वरी रौद्री ह्लेखां गगनाभिधं॥ ४९॥ करालिनी

॥पार.तं.॥ महोत्कुष्मायजेज्वाल्यमुखीमपि॥ उमाभवानी रुद्राणीशर्वाणिसर्वमंगला॥ ५०॥ विश्वेश्वरीचकौमा- ॥अध्या॥
री गौरीचेतिक्रमाद्यजेत्॥ एतास्तृतीयरेखायां मंत्रस्योभयपार्श्वयोः॥ ५१॥ शंखपद्मनिधिद्वंद्वमिंद्रादी ॥१०॥
॥२॥ न् परित्यजेत्॥ चतुरस्त्रांत्यरेखायां वाहनायुधसंयुतान्॥ ५२॥ उपवेशनमारभ्य यासूजाविसर्जनं॥
तावध्यायीतमनसा सर्वसंसाधयेद्धृदि॥ ५३॥ एवमभ्यासनिरतः सर्वसंगविवर्जितः॥ ध्यात्वा मा
मीशमीशानिदेहांते प्रविशेन्मयि॥ ५४॥ भक्तिर्वैराग्यमनसो ध्यानमेकांतसेवनं॥ भिक्षादनं लिंगपू
जा स्मरणंसततंमम॥ ५५॥ एतानि योगाष्टांगानि योगशैवस्य लिंगिनः॥ एतदंगसमायेतो योगशैव
उदाहृतः॥ ५६॥ इत्थं संसिध्धयोगः सन् वर्त्तेतात्मपरायणः॥ सर्वमहात्मकं ध्यायद्यदिचित्तंबहिर्गतं॥
॥ ५७॥ दृष्टंश्रुतंचसंस्पृष्टं माघ्रातंस्वादितंकृतं॥ सर्वंशिवात्मकं ध्यायेत् ध्यानशैवसउच्यते॥ ५८॥ योग
ध्यानद्वयेभक्त्या योतीतः सर्वनिस्पृहः॥ शिवोहं भवनाधीरो वीरशैवउदाहृतः॥ ५९॥ वीरशैवम ॥२॥

तंप्राप्यजगदेतच्चराचरं॥ सर्वंशिवमयंध्यायेछिवोहमितिभावयेत्॥ ६० ॥ स१सपुष्पंक्षमापुष्पंव
स्तुषुच्चावचेष्वपि॥ अनन्यपूजनंपुष्पंपरोपिकृतमुत्तमं॥ ६१॥ स्कृहन्मित्रार्युदासीनमध्यस्थंद्वेष्यबंधुषु
॥ साधुष्वपिच पापेषु दुर्जनेषुजनेष्वपि॥ ६२॥ स्वमतेविमतेमूढे प॰ ॰राद्यर्युपकर्त्तरि॥ सर्वत्रभावयेदे
कंवीरशैवमतेशिवे॥ ६३॥ यः पूजयेन्मामीशानिपुष्पैरेतैरतंद्रितः॥ सर्वदासर्वदाशंभुवीरशैवः
सउच्यते॥ ६४॥ रागद्वेषवियुक्तानांलिंगिनांवीरशैविनां॥ अभितःशिवकैवल्यंकरस्थंविहितात्मनां
॥ ६५॥ अवधूतस्यसंन्यासीयोगीपाशुपतःशिवः॥ लिंगीवीरोवीरशैवोमहामहेश्वरोयतिः॥ ६६॥ पर्या
यनामान्येतानिवीरशैवस्यलिंगिनः॥ नान्यदस्तितत स्तस्य विनातादात्म्यभावना॥ ६७॥ नागरंकु
रुतेक्वापिनद्वेषंनान्यपीडनं॥ यदिछेन्ममसायुज्यंवीरशैवोमहेश्वरी॥ ६८॥ वीरशैवादधिकफलदंमत
मस्तिहि॥ यद्यस्त्यस्तितदाकश्चिदधिकोमत्परःशिवे॥ ६९॥ यःकुर्याद्वीरशैवस्थःपीडनंप्राणिनांभुवि॥

॥पा॰तं॰॥ सज्जीवन्नेवचांडालोमृतोनरकमश्नुते॥७०॥शमोदमस्तितिक्षाचोपरतिःश्रध्धासमाधयः॥षडंगानि॰ ॥अध्या॥
॥४॥ महादेविवीरशैवस्यलिंगिनः॥७१॥यद्यकेनापिचैतेषां विहीनोहिनएवसः॥अंगलोपेभवेद्व्यंगी ॥१०॥
तनाधोनिपतेध्रुवं॥७२॥यथामनुष्यःसर्वांगंसंयुक्तोगीतकथ्यते॥यद्यन्यथाभवेद्व्यंगीतथैवायनसंश
यः॥७३॥नपुष्पायाहरणायासेनोतद्धारान्यपीडनं॥भावेनैवपरंकर्महृद्येकावीरशैविनः॥७४॥यद्दा॰
भूतेषुतस्यैकसाधनंत्रासयेमम॥तथैकंनरकंप्राप्नोतिलिंगिनःपरपीडनं॥७५॥जगत्सर्वमहंदेवियच्चकिं
चिच्चराचरं॥मच्छरीरमिदंविध्धिनामरूपक्रियासकं॥७६॥तद्दृष्ट्वाममयोभक्तःकुर्याद्द्वेषमपिक्वचित्॥॰
नमद्द्वेषिनसंदेहोतन्मांसर्वत्रभावयेत्॥७७॥स्वशरीरयथादेविसापादातलमस्तके॥तथैवैकत्वमध्या
सःसर्वत्रैवविभावयेत्॥७८॥वीरशैवमतस्थस्ययावतीभेदभावना॥भूतेषुभवनास्तीवमत्प्राप्तिस्त ॥६॥
स्यसुंदरी॥७९॥किमित्रभवनातत्रशृणुचोर्ध्वेविनिश्चितं॥वक्तव्यंग्रंथविस्तारैःसर्वसिध्धांतमीश्वरी॥

८०॥ हृदीयस्यतनौलिंगंमनोमयिमनुर्मम॥ शैवः पंचाक्षरःपुण्यः सजिह्वाग्रमहेश्वरी॥ ८१॥ तत्रवक्ष्ये
गिरिसुते सारात्सारतरंतव॥ गोपनीयंप्रयत्नेन वद्भक्ताययोगिने॥ ८२॥ जपेत्पंचाक्षरः शैवंभुक्ति
मुक्तिफलप्रदं॥ सर्वधर्मान्परित्यज्य शैवपंचाक्षरंजपेत्॥ ८३॥ तिष्ठन्भुंजन्स्वपन्गच्छन्जाग्रन्नपिहस
न्नपि॥ उपविश्यन्प्रबुध्यन्वाशैवंपंचाक्षरंजपेत्॥ ८४॥ स्वस्थः परवशोवापिशुध्धोवाशुध्धएववा॥ विधि
नाविधिनावापिशैवंपंचाक्षरंजपेत्॥ ८५॥ सर्ववेदेषुसर्वत्र सर्वलोकेषुसर्वदाः॥ सर्वदासर्वदादेविशैव
पंचाक्षरंजपेत्॥ ८६॥ शांतोवाकुपितोवापि क्षुभितप्रखलादिषु॥ व्याजेनाखिलभेदेनशैवंपंचाक्षरंजपे
त्॥ ८७॥ नकैलासाद्दूरोलोकोनदेवंशंकरात्परं॥ नवीरशैवाच्चमतं नास्तिमुक्तेःपरंसुखं॥ ८८॥ नास्तिज्ञा
नात्परंमंत्रंनभक्तोसाधनंपरं॥ नशैवोदधिकोमर्त्यो मंत्रंपंचाक्षरंजपेत्॥ ८९॥ स्मरेत्स्मरणरूपेण स्तोत्र परः
रूपेण संस्तुवेत्॥ प्रजपन्मंत्ररूपेणशैवंपंचाक्षरंमनुः॥ ९१॥ यदिच्छेन्ममसायुज्यमनायासेनसुंदरी॥

नविस्मरेत्सदामंत्रं ममपंचाक्षरंपरं॥९२॥आलस्येनापिशाठ्येन परिहासेनमायया॥ स्मरेतवास्वभावेनशै
वंपंचाक्षरंपरं॥९३॥स्वप्नेपि वास्मृते मंत्रे सुखेदुःखेरतादिषु॥ सकृत्संचाक्षरेवापि सोहमेव ॰नसंशयः॥
९४॥·किंपुनर्भक्तितोयस्तुजपेन्मंत्रोत्तमोत्तमं॥शैवंपंचाक्षरंदिव्यं भुक्तिमुक्तिफलप्रदं॥९५॥स्मरणा
त्कीर्त्तनाध्यानात्जपादिभिनुतेरपि॥ मननात्पूजनाद्भावात् भोगःस्वर्गापवर्गदं॥९६॥·शिवपंचाक्षरंज
प्त्वालिंगपूजाकरोतियः॥सोपिमानुषदेहस्थशिवएवनसंशयः॥९७॥ यस्तुलिंगार्चनंकृत्वाजपेसंचा
क्षरंमनुं॥दिनेदिनेसहस्रंतुसोहमेवधरातले॥९८॥ पंचाक्षरस्यमाहात्म्यंमयावक्तुंनशक्यते॥ब्रह्महः
त्यादिभिःपापैर्मुच्यतेनात्रसंशयः॥९९॥ प्रोक्तंमयामहादेविशिवयोगस्यलक्षणं॥तध्यानंतद्विधानं
चकिंभूतस्यःश्रोतुमिच्छसि॥१००॥इतिश्रीपारमेश्वरतंत्रेशिवाद्वैतसिद्धांतेदीक्षाप्रकरणेशिवयो
गविधाननिरूपणंनामदशमपटलःसमाप्तं॥१०॥७॥७॥७॥७॥७॥७॥७॥७॥७॥७॥

श्रीगणेशायनमः॥श्रीसरस्वत्यैनमः॥श्रीगुरुभ्योनमः॥श्रीमद्गौरीशायनमोनमः॥श्रीराम॥०

परमेश्वरसर्वज्ञशुध्धज्ञानमहोदधे॥पंचाक्षरस्यमहात्म्यंश्रोतुमिछामिशंकरं॥१॥ पंचाक्षरविधानं चजपध्यानादिषुप्रभो॥कथयस्वामिन्देयंचतेनमंत्रेणकृत्स्नशः॥२॥देवताचऋषिछंदः तन्मेवद महेश्वर॥३॥ ईश्वरउवाच॥पंचाक्षरस्यमाहात्म्यंवर्षकोटिशतेरपि॥नशक्यंविस्तराद्वक्तुं तस्मात्सं क्षेपतःशृणु॥४॥ वेदेचवेदशीर्षेचाप्युभयत्रषडक्षरः॥मंत्रस्थितःसदामुख्योलोकेपंचाक्षरस्मृ तः॥५॥इहोनमःशिवायेतिमंत्रेणानेनसिध्धयः॥हंसोलभ्यःसदासर्वैःपरमेशप्रभावतः॥६॥स र्वमंत्राधिकाश्चायमोंकाराद्यःषडक्षरः॥सर्वेषांशिवभक्ताभ्यांअशेषार्थप्रसादकः॥७॥तदत्वंवेदसा राख्यंभुक्तिदंचविमुक्तिदं॥अज्ञासिध्धमसंदिग्धंवाक्यमेतच्छिवात्मकं॥८॥नानासिध्धियुतंदिव्यं लोकचित्तेषुरंजनं॥सुनिश्चितार्थगंभारंवाक्यंतत्सारमेश्वरं॥९॥मंत्रमुखोमुखोचार्यश्चाशेषार्थप्रसा

॥ पा॰ तं॰ ॥ दकः॥तदल्पंवेदसाराख्यंभुक्तिदंचविमुक्तिदं॥१०॥तद्बीजंसर्वविद्यानांमंत्रमाद्यंषडक्षरं॥अतिसू ॥ अध्या ॥
॥ १ ॥ क्ष्मांमहार्थंचज्ञेयंतद्वटबीजवत्॥११॥अहंगुणत्रयातीतःसर्वज्ञःसर्वकृत्प्रभुः॥ॐमेकाक्षरंमंत्रेस्थि ॥ ११ ॥
तःसर्वगतोस्म्यहं॥१२॥प्रणवोप्यधिकस्तस्यशिवस्यपरमात्मनः॥यामिकाभक्तिरुद्दिष्टाप्रणवा·
भ्याससंभवा॥१३॥शिवरुद्रादिशब्दानांप्रणवाहिपरःस्मृतः॥शंभोप्रणववाच्यस्यभावनातजपा
दपि॥१४॥यासिध्धिश्चपराप्राप्यभवत्येवनसंशयः॥तस्मादेकाक्षरंदेवमाहुरागमवादिनः॥१५॥
वाच्यवाचकयोरैक्यंमन्यमानोमनस्विनः॥ज्ञायतेयोगिभिर्ध्यानैर्मोध[illegible]मंदाव्ययाद्वयः॥१६॥ईशा·
नाद्यानिसूक्ष्माणिब्रह्मण्येकाक्षराणितु॥मंत्रोनमःशिवायेतिसंस्थितानियथाक्रमं॥१७॥मंत्रात्लक्ष
रतःसूक्ष्मःपंचब्रह्मतनुःशिवः॥वाच्यवाचकभावेनस्थितःसाक्षात्स्वभावतः॥१८॥वाच्यःशिवःप्रमे ॥ १ ॥
यत्वान्मंत्रस्तद्वाचकःस्मृतः॥वाच्यवाचकभावोयमनादिःसंस्थितस्तयोः॥१९॥तत्राधिपेनमंत्राणांसर्वे·

ज्ञेनमयाशिवे॥ प्रणितममलंबाक्यं नतेनसदृशं भवेत्॥२०॥ सांगानिवेदशास्त्राणि संस्थितानिषडा-
क्षरे॥ नतेनसदृशंतस्मान्मंत्रमस्त्यपरंक्कचित्॥२१॥ सप्तकोटिमहामंत्रैरुपमंत्रैरनेकशः॥ मंत्रः षडक्षरो
भिन्नंसूत्रंवृत्यात्मनो यथा॥२२॥ शिवज्ञानानियावंतिविद्यास्थानानियानिच॥ षडक्षरस्यसूत्रस्यता-
निभाष्यंसमासतः॥२३॥ किंतस्यबहुभिर्मंत्रैःशास्त्रैर्वाबहुविस्तरैः॥ यस्योंनमःशिवायेतिमंत्रोयंहृदिसं-
स्थितः॥२४॥ ततोधीतंश्रुतंदेविवितेनाचारःसुनिष्ठितः॥ येनोंनमःशिवायेतिमंत्राभ्यासःस्थिरीकृतः॥-
२५॥ नमस्कारादिसंयुक्तंशिवायेत्यक्षरत्रयं॥ जिह्वाग्रेवर्ततेयस्यसफलंतस्यजीवितं॥२६॥ अंत्यजोवा
धमोवापिमूर्खोवापंडितोपिवा॥ पंचाक्षरोजपेनिष्ठोमुच्यतेपाशबंधनात्॥२७॥ तस्मात्षडक्षरोमंत्रः
सर्वसिध्धिप्रदायकः॥ षडक्षरमयंदेवंमांतुयोजपतिर्भुवि॥२८॥ तस्यमुक्तिःकरस्थस्याद्वीरशैवतरस्य
च॥ शैवाश्रमवतांपुंसांलिंगिनांवीरशैविनां॥२९॥ ममपंचाक्षरोमंत्रःकल्पवृक्षोधरात्मजे॥ अस्याःपर-

॥पार.तं.॥ ॥अध्या.॥
॥२॥ ॥१३॥

मविद्यायाः स्वरूपमतिशोभनं॥२०॥शृणुष्व कथयिष्यामिगुह्यं तत्पापनाशनं॥आदौ नमः प्रयोक्तव्यं ः
शिवायेतिततःपरं॥२१॥ एषा पंचाक्षरीविद्या प्रणवाद्याषडक्षरी॥ सशब्दोतस्यसर्वस्य बीजभूत
समागतः॥२२॥ सर्वज्ञस्याज्ञयासिध्यात त्स रूपार्थवाचकी॥ तत्सचामीकरप्रख्यापीनोन्नतपयो
धरा॥२३॥ चतुर्भुजात्रिनयना बालेंदुकृतशेखरा॥प द्मत्सलधरासौम्यावरदाभयपाणिका॥२४॥
सर्वलक्षण॰संपूर्णसर्वाभरणभूषिता॥सितपद्मासमासीनानीलकुंतलमूर्ध्वजा॥२५॥अस्याः पंच
विधावर्णाप्रस्फुरद्रश्मिमंडला॥ त्वत्स्वरूपंहि देवेशिमत्स्वरूपंनमः स्वयं॥२६॥ पीतः कृष्णस्तथाधूम्रः
स्वर्णाभोरक्तएवच॥ प्रथक्प्रयोज्यायद्येते बिंदुनादसमन्विता॥२७॥ अर्धचंद्राकृतिर्बिंदु र्नादोदीपशि
खाकृतिः॥बीजंद्वितीयंबीजेषु मंत्रस्यास्यवरानने॥२८॥दीर्घपूर्वंतुरीयस्यासंचमंशक्तिमादिशेत्॥वा
मदेवोनामऋषिः पंक्तिछंदःउदाहृतः॥२९॥ देवतानाशिव एवास्यामनोगिरिसुतेस्म्यहं॥गोतमोत्रिर्महा ॥२॥

देवि विश्वामित्रस्तथांगिरः॥ ४० ॥ भारद्वाजश्च वर्णानां ऋषयः क्रमशः स्मृतः॥ गायत्र्युष्णिगनुष्टुप्पंक्ति

र्हासिबृहतीविराट्॥ ४१ ॥ शिवो रुद्रो महादेवः ईश्वरः परमेश्वरः॥ तेषामधाशावर्णानां क्रमेणैते शिवाद

यः॥ ४२ ॥ शिवस्य पंचवक्त्राणि तेषां स्थानान्यनुक्रमात्॥ पूर्वादिदिचोर्ध्वपर्यंतं नकारादि यथाक्रमं॥ ४३ ॥ उ

दात्तः प्रथमो वर्णो द्वितीयश्च चतुर्थकः॥ पंचमं स्वरितश्चैव मध्यमो निगदः शिवे॥ ४४ ॥ मूलं विद्या शिवः शैवं सू

त्रं पंचाक्षरं तथा॥ षडक्षरं च तस्याहु नामानि मुनयो मनोः॥ ४५ ॥ हृदयं मूलविद्येयं नकारः शंकरः शिवः रः

शिखा मकारः कवचं त्रि कारो वाक्पदत्रयं॥ ४६ ॥ यकारोस्त्रं नमः स्वाहा वषट् वौषट् फडित्यपि॥ षड्भिर्वर्णैः

षडंगानि कुर्यान्मंत्रस्य पार्वति॥ ४७ ॥ मंत्रवर्णाकदिकान्यासेत् पंचमूर्त्तिर्यथाक्रमं॥ तर्जनी मध्ययोरंत्या ना

मिकांगुष्ठके पुनः॥ ४८ ॥ तासु स्तत्पुरुषाघोरसद्योवामेश्च संज्ञिकः॥ वक्त्रहृत्पादगुह्येषु निजमूर्ध्वनिताः

पुनाः॥ ४९ ॥ प्राच्याम्यवरुणोदीच्यां मध्यचक्रेषु पंचसु॥ मंत्राग्राणि न्यसेत्पश्चात् जातियुक्तानि षट्क्रमा

॥पार.तं.॥ तू ॥५०॥ कुर्वतगोलकन्यासंरक्षायैतदनंतरं ॥ हृदिवक्त्रांसयोरूर्वोः कंठेनाभौ द्विपार्श्वयोः ॥५१॥ पृष्टेहृ ॥अध्या॥
दितततोमूर्ध्निवदनेनेत्रयोर्न्यसेतू ॥ दोष्यत्संधिषुसाग्रेषुविन्यसेतदनंतरं ॥५२॥ शिवंवदनहृत्कुक्षिसोरूपो ॥११॥
॥२॥ हृद्येशिवे ॥ मूलमंत्रस्यमंत्राणांयथावद्देविविन्यसेत् ॥५३॥ मूर्ध्निपालोदरांसेषुहृदयेतान्पुनर्न्यसेत् ॥
पश्चादनेनमंत्रेणकुर्वतव्यापकंसुधीः ॥५५॥ नमोस्तुस्थाणुभूताय ज्योतिर्लिंगामृतात्मने ॥ चतुर्मूर्त्तिवपु
च्छायाभासितांगायश्रीभवे ॥५६॥ एवंन्यस्तशरीरोसौचिंतयेन्मांमहेश्वरी ॥ अथध्यानं ॥ ध्यायेन्नित्यंमहे
शंरजतगिरिनिभंचारुचंद्रावतंसं ॥ रत्नाकल्पोज्वलांगंपरशुमृगवराभीतिहस्तंप्रसन्नं ॥ पद्मासीनंसमंतात्स्तुत
ममरगणैर्व्याघ्रकृत्तिंवसानं ॥ विश्वाद्यंविश्ववंद्यंनिखिलभयहरंपंचवक्त्रंत्रिनेत्रं ॥५७॥ एवंध्यायेन्महादे
विप्रसन्नविमलाशयः ॥ हेव्यश्चमूलमंत्रोयंकिंचिद्विदंसमन्वयात् ॥५८॥ तत्रास्यपंचमेवर्णद्वादशस्वरभूषि
तः ॥ तस्मादनेनमंत्रेणमनोवाक्कायभेदतः ॥५९॥ आवयोरर्चनंकार्यंजपहोमादिकंप्रिये ॥ यथाश्राध्वंत ॥३॥

थाप्राज्ञयथाकालंतथास्मृतिः॥६०॥यथाशक्तिस्तुसंपाद्ययथायोगंयथारतिः॥यथाकदापिवाभक्त्यायत्र
कुत्रापिवाकृता॥६१॥पञ्चियंत्वाशिवस्यैवक्रमेणव्युत्क्रमेणवा॥तथापिशिवभक्ताय नास्तंतविवशानराः॥
॥६२॥तेषामर्थेमयादेविनियमःपरिकल्पितः॥तत्राहंसंप्रवक्ष्यामितत्रसंग्रहणंशुभं॥६३॥येनकेना
पिवादेविपूजादेविहिनेष्यति॥सदासक्तेनमनसायत्कृतंपरमेष्ठिनः॥६४॥यद्दिनानिष्फलंजप्यंयेनवाः
सफलंलभेत्॥आज्ञाहीनंक्रियाहीनंश्रध्धाभक्तिविवर्ज्जितं॥६५॥अजप्तंदक्षिणाहीनंसदासत्यंचनिष्फ
लं॥अज्ञासिध्धांक्रियासिध्धांश्रध्धासिध्धांक्रियात्मकां॥६६॥तथैवदक्षिणासिध्धंजपसिध्धंमहत्फलं॥
॥तस्माद्गुरुमुपागम्यतोषयत्तत्प्रयत्नतः॥६७॥वाचाचमनसाचैवकायेनद्रविणेनच॥आचार्यंपूजयेच्छि
ष्यःसर्वदादेवयत्नतः॥६८॥हंस्त्यश्वरथरत्नानिक्षेत्राणिचगृहाणिच॥वासांसिधनधान्यानिरत्नानिवि·
विधानिच॥६९॥सर्वान्तद्गुरवेदद्याद्भक्त्याच्चविभवेसति॥वित्तशाठ्यंनकुर्वीतयदिच्छेत्सिध्धिमात्मनः

॥पार॰तं॰॥ ॥७०॥ तस्मान्निवेदयेद्देवि स्वात्मानं सपरिच्छदं ॥ एवं संपूज्य विधिवद्यथाशक्ति त्ववर्चयन् ॥७१॥ साध ॥अध्या॥
॥४॥ येत्तु गुरोर्मंत्रं ज्ञानदेवि क्रमेण तु ॥ षड्ध्वजमार्गशुध्धः सन्कुर्याद्दासजिगीषयः ॥७२॥ ज्ञात्वा गुरुर्मुखात्स ॥१३॥
म्यक् ज्ञानार्णवसमुत्तरेत् ॥ कलातत्वाध्वभुवनं वर्णपदमतः परं ॥७३॥ मंत्रं चेति समासेन षड्ध्वानः प्रकीर्ति
ताः ॥ देवितुष्टा गुरुः शिष्यं पूजकं वत्सरोषितं ॥७४॥ अभिषिंचः स्वलंकृत्सदद्यान्मंत्रं शिवात्मकं ॥ यमंत्रमे
नमधिगम्य गुरोर्मुखात्तु ॥७५॥ कृत्वा षड्ध्वपरिशोधनपूर्वचर्यः ॥ ध्यात्वा जपत्सनुदिनं विषयेष्वसक्ताः
॥७६॥ तस्याचरेण परितुष्यति चंद्रमौलिः ॥ साभिषेकं गुरोर्लब्ध्वा मंत्रादीक्षां च गौरवीं ॥ संकल्प प्रजपे
देवि पुरश्चरणपूर्वकं ॥७७॥ एकाग्रेण शिवं ध्यात्वा चेतसा विजितेंद्रियः ॥ यावज्जीवं जपेन्मंत्रं अष्टोत्तरसह
स्रकं ॥७८॥ अनश्नन्नूतसरो भुक्त्वा स याति परमां गतिं ॥ जपेदक्षरलक्षं वै चतुर्गुणितमाहरात् ॥७९॥ नक्ता
सी संयतमनाः पौरश्चरणिको मतः ॥ तत्पुरश्चरणं कृत्वा निःयजापि भवेन्नरः ॥८०॥ तस्य नास्ति समा लोके ॥४॥

ससिध्यःसिध्धिदोभवेत्॥स्नानंकृत्वाशुचौदेशेलब्ध्वारुचिरमासनं॥८१॥शिवभक्त्याशिवंध्यात्वास्वगुरोः
सन्निधोहरि॥उदङ्मुखोप्राङ्मुखोवामौनीचैकाग्रमानसः॥८२॥शिवोध्यपंचतत्वानिदहनासावना-
दिभिः॥मंत्रंन्यासादिकंकृत्वासकलीकृतविग्रहः॥८३॥अवयोर्विग्रहंध्यायेत्प्राणापानौनियम्यच॥वि
द्यास्थानंपरंरूपंमृषिलीकृतविग्रहः॥८४॥बीजंशक्तिंतथावाच्यंस्मृत्वापंचाक्षरंजपेत्॥उत्तमंमानसं
जप्यमुपांशुर्मध्यमंविदुः॥८५॥अधमंवाचकंप्राहुरागमार्थविशारदाः॥उत्तमंरुद्रदैवत्यंमध्यमंविष्णुदै-
वतं॥८६॥अधमंब्रह्मदैवत्यंदेव्याहुरनुपूर्वशः॥यदुच्चानीचस्वरितैःशब्दैःस्पृष्टपदाक्षरैः॥८७॥मंत्रमुच्चा-
रयेद्वाचावाचकोयंजपस्मृतः॥जिह्वमात्रपरिस्पंदइषुदुच्चारितंशिवे॥८८॥अपरैरश्रुतंकिंचिछ्रुतोवोपां
शुरुच्यते॥धियायदक्षरंश्रेणिवर्णाद्वर्णपदात्पदं॥८९॥शब्दार्थचिंतनंदेविकथ्यतेमानसोजपः॥वाचकोवै
कमेकंस्यादुपांशुःशतमुच्यते॥९०॥सहस्रोमानसःप्रोक्तःसगर्भस्तःछिताधिकः॥कुंभकेनसमायुक्तःस-

गर्भेजपउच्यते॥९१॥अद्यंतयोगगर्भेपिप्राणायामःप्रशस्यते॥चत्वारिंशत्समावृत्तिःप्राणानायम्यसंस्म-
रेत्॥९२॥मंत्रमंत्रार्थविद्धिमत्शक्तिःशक्तिमतोजपेत्॥अगर्भंवासगर्भंवासगर्भस्तत्रविशिष्यते॥९३॥
सगर्भद्द्विपिसाहस्त्रःसद्यानोजपउच्यते॥एष्वपुंचविधिष्वेकःकर्त्तव्यःशक्तितोजपः॥९४॥अंगुल्याजपसं-
ख्यानांमेकमेकमुदाहृतं॥रेखायाष्टगुणंविद्यात्॥९५॥शतंस्यात्छंकमणिभिःप्रवालैस्तुसहस्त्रकं॥स्फटि-
कैर्द्दशसाहस्त्रंमौक्तिकैर्लक्षमुच्यते॥९६॥पद्माक्षैर्द्दशलक्षंतुसौवर्णैःकोटिरुच्यते॥कुशग्रंथ्याचरुद्रा-
क्षैरनंतगुणितंभवेत्॥९७॥त्रिंशद्दक्षैःकृतामालाधनदाजपकर्मणि॥सप्तविंशतिसंख्यातैरक्षैःपुष्टिप्र-
दाशिवे॥९८॥पंचविंशतिसंख्याकैःकृतामुक्तिंप्रयच्छति॥अक्षैस्तुपंचदशभिःरभिचारफलप्रदा॥९९॥
अंगुष्टमोक्षदंविद्यात्तर्जनीशत्रुनाशनी॥मध्यमोधनदःशांतिंकुरुतेनामिकाजपात्॥१००॥कनिष्टा
रक्षिणीप्रोक्तापुत्रदाचविशेषतः॥अंगुष्टेनजपंजाप्यंसहान्यंगुलिभिःसदा॥१०१॥अंगुष्टरहितंज

प्यंकृतंतद्दफलंभवेत्॥जप्यायहेसमफलंगोष्टेशतगुणंविदुः॥१०२॥पुण्यारण्येतथारामेसहस्रगुः
णमुच्यते॥अयुतंपर्वतेदेविनद्यांलक्षमुदाहृतं॥१०३॥कोटिदेवालयेदेविअनंतंशिवसन्निधौ॥सूर्यः
स्याग्नेर्गुरोरिंदोर्दीपस्यचजलस्यच॥१०४॥लिंगस्यचगवांचैवसन्निधौशाक्यतेजपः॥पुमान्सदा
चाररतोजपेत्पंचाक्षरीमिमां॥१०५॥अस्मिन्सिध्धेमहामंत्रेसर्वेसिध्धिगिरींद्रिजे॥योजनःकी
र्त्तयेद्भक्त्याशृणुयद्वासमाहितः॥१०६॥सर्वपापविनिर्मुक्तःसयातिममसंन्निधं॥द्विसहस्रजपेद्रोगा
न्मुच्यतेनात्रसंशयः॥१०७॥त्रिसहस्रजपेन्मंत्रीदीर्घमायुरवाप्नुयात्॥सहस्रबध्याप्रजपेत्सर्वान्का
मानवाप्नुयात्॥१०८॥आज्यान्वितैस्तिलैःशुध्धैःजुहुयाल्लक्षमादरात्॥उत्पातजनितान्क्लेशान्नाश
येत्सर्वतात्मजे॥१०९॥शतंलक्षंजपेत्साक्षाच्छिवोभवतिमानवः॥किमत्रबहुनोक्तेनममरूपंसपार्व
ति॥११०॥मंत्रःपंचाक्षरीनियमवानपियोजपेत्॥तस्मिन्समाहितमनाःशुचिरात्मवशः॥१११॥पं

चाक्षरा नियम वा न पियोजपेत् ॥ तस्मिन् समाहितमनाः शुचिरालवशः ॥ १११ ॥ क्षेत्रे शिवस्य परमेश्रुवि पर्व
तेवं ॥ गछेत्स शंकरपुरं सिवसन्निकाशः ॥ ११२ ॥ इति ते कथितं देवि मनो माहात्म्यमुत्तमं ॥ मम पंचाक्षरं शैवं
किं भूयः श्रोतुमिच्छसि ॥ ११३ ॥ इति श्री पारमेश्वरतंत्रे पंचाक्षरी जपानुष्ठान स्वरूपणन्नाम एकादशा प
टलः समाप्तं ॥ ११ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥

श्रीगणेशायनमः ॥ श्रीसरस्वत्यैनमः ॥ श्रीगुरुभ्योनमः ॥ श्रीमत्पार्वतीरमणायनमः ॥ श्रीशिवः ॥ ०
देवदेवमहादेव महेशामृड शंमृड शंकर ॥ ज्ञानयोगस्यमाहात्म्यंवद मेकरुणाकर ॥ १ ॥ ईश्वरउवाच ॥ चर्याच-
र्याचसततमहिंसाज्ञानसंग्रहं ॥ सत्यमस्तेयमास्तिक्यंश्रध्धाचेंद्रियविग्रहं ॥ २ ॥ अध्यापनंचाध्ययनंय
जनंयाजनंतथा ॥ ज्ञानमीश्वरभावाश्वयजनंयाजनंशिवे ॥ ३ ॥ अंतर्योगंबहिर्योगंसततंज्ञानशीलता
॥ यएवंवर्त्ततेयोगीज्ञानयोगस्यसिध्धये ॥ ४ ॥ अचिरादेवविज्ञानंलब्ध्वायोगंचविंदती ॥ दग्ध्वादे
हमिमंज्ञानीक्षणाज्ज्ञानाग्निनाव्ययेत् ॥ ५ ॥ ममप्रसादाद्योगज्ञः कर्मबंधंप्रहास्यति ॥ पुण्यापुण्याऽ
त्मकंकर्ममुक्तेस्तस्तीतिबंधकं ॥ ६ ॥ तस्माद्योगंततोयोगीपुण्यापुण्यविवर्जयेत् ॥ फलंयामनयाकर्मंकर
णंप्रतिपद्यते ॥ ७ ॥ नकर्ममात्राकरणंतस्मात्कर्मफलंत्यजेत् ॥ प्रथमंकर्मयोगेनबहिःसंपूज्यशंकरं ॥ ८
॥ ज्ञानयज्ञरतोदेवियोगीममसायुज्यमाप्नुयात् ॥ तस्माद्योगंसमभ्यसेत् ॥ विधितेशिवयासेककर्म-

पार·तं·  अध्या·
·॥१॥·  ॥१२॥

णाज्ञानयोगिनः॥९॥नजयंतिशिवंयुक्तासमलोष्टाश्मकांचनः॥नित्यमुक्तोमहादेविभक्तिमान्यसमाहि
तः॥१०॥ज्ञानयोगरतोयोगीममसायुज्यमाप्नुयात्॥अथाविरक्तचित्तायेवर्णिनःशिवमाश्रिताः॥११॥
ज्ञानचर्यक्रियाण्येवतस्मिन्कुर्यास्तदार्हता॥बाह्यमभ्यंतरंचैवबाह्यमभ्यंतमेवच॥१२॥वाङ्मनःका·
यभेदेनत्रिधातद्भजनंविदुः॥तपःकर्मजपध्यानंज्ञानंचेत्यनुपूर्वशः॥१३॥पंचधाकथितंरुद्रेतदेवक·
थितंपुनः॥अभ्यासविधितंबाह्यंबाह्यमभ्यर्चनादिकं॥१४॥तदेवतुससंवेद्यंनमनोमात्रमुच्यते॥शिव
नामरताबाणिसायावाणिनिगद्यते॥१५॥लिंगैस्तच्छासनोदिष्टैस्त्रिपुंड्रादिभिरांकितः॥शिवोपः
चारनिरतःकायःकायोनचेतरः॥१६॥तमर्चाकर्मविज्ञेयंबाह्ययागादिनोच्यते॥शिवार्थेदेहसंशोष
स्तपःकृछादिनोमतं॥१७॥जपःपंचाक्षराभ्यासःप्रणवाभ्यासएवच॥रुद्राध्यायादिकाभ्यासोन·
चान्याध्ययनादिकं॥१८॥ध्यानंचशिवचिंतास्यादासाद्यर्थसमाधयः॥शिवागमार्थविज्ञानंज्ञानं·  ॥३॥

चान्यार्थवेदनं॥१९॥बाह्येचवाभ्यंतरेवा त्रयंस्यान्मनसोरतिः॥प्राग्वासनावशादेवशिवेनष्टासमाच

रेत्॥२०॥बाह्याद्भ्यंतरंश्रेष्ठं भवेच्छतगुणाधिकं॥असंकटत्वादुष्टानां दोषणामथसंभवात्॥२१॥शौच

मभ्यंतरंकुर्यानबाह्यंशौचमुच्यते॥ततः शौचविमुक्तासा ह्युचिरप्यशुचिर्यतः॥२२॥बाह्यमभ्यरतंचै

व भजनंभावपूर्वकं॥नभावरहितंग्राह्यं विप्रलंभैककारणं॥२३॥कृतकृत्यस्यशिवस्यतृप्तस्यपरमेष्ठि

नः॥नकैःकिंक्रियतेकर्मभावमात्रंहिगृह्यते॥२४॥अष्टधालक्षणंप्राहुःशिवधर्माधिकारिणां॥येन

ज्ञेयानरैरन्यैर्नराविश्वविलक्षणः॥२५॥शिवेभक्तेषुवात्सल्यंपूजयांचानुमोदनं॥स्वयमभ्यर्चनंचैव

तदर्थंचांगचेष्टनं॥२६॥तत्कथाश्रवणेभक्तिस्वरनेत्रांगविक्रिया॥शिवानुस्मरणंनित्यंसर्वथातदकैत·

वं॥२७॥एतदष्टगुणंचिन्हं यस्मिन्म्लेच्छेपिदृश्यते॥सापुनर्वीक्ष्यतेत्रेधामनोवाकायभेदतः॥२८॥प·

रांभक्तिसमभ्येत्यशिवधर्मरतेनरः॥परयाचतयाभक्त्याप्रसादंलभ्यतेनरः॥२९॥देवोवामानवोवा·

॥पार.तं.॥ पिपशुर्वाविहगोपिवा॥कोटिवापिकृमीर्वापिमुच्यतेतत्प्रसादतः॥३०॥गर्भस्थोजायमानोवाबालो॥ ॥अध्या॥
॥२॥ वातरुणोपिवा॥वृध्धोवाम्रियमाणोवास्वर्गस्थोवापिनारकी॥३१॥ पतितोपतितोवापिपंडितोमूढ॥ ॥१२॥
एवच॥प्रसन्नेमयिदेवेशिमुच्यतेभवबंधनात्॥३२॥अथयेमानवालोकेस्वछयाधृतिविग्रहा॥भावा
तिशयसंपन्नापूर्वसंस्कारसंयुताः॥३३॥विरक्तावानुरक्तावास्त्रियाहिविषयेष्वपि॥पापैर्नतेविलि
प्यंतेपद्मपत्रमिवांभसा॥३४॥तेषांशिवात्मविज्ञानंविशुध्धानांशिवासनां॥तत्प्रसादद्विमुक्तानां
दुःखमाश्रमलक्षणं॥३५॥नास्तिकृत्यमकृत्यंचसमाधिर्वापरायणं॥नविधिर्ननिषेधश्चममसाम्यःस
चांद्विजे॥३६॥यथैवपरिपूर्णस्यसाध्यंममनविद्यते॥तथैवकृतकृत्यानांतेषामपिनसंशयः॥३७॥शि
वभक्तहितार्थंतेमानुषंभावमाश्रितः॥रुद्रलोकात्परिभ्रष्टाः तेरुद्राणात्रसंशयः॥३८॥यथावन्हिसमा
वेशाद्दयोभवतिकेवलं॥तथैवशिवसान्निध्यान्मर्तेकेवलमानुषाः॥३९॥शिवानुशासनंयद्वद्द्रुमादी ॥२॥

नांप्रवर्त्तकं॥ तदेतरेषामन्येषां तन्नियोगः प्रवर्त्तकः॥४०॥ तपस्तपादिसाधर्म्यैरुद्धधर्मवपुर्धरात्॥ प्रा
कृतान्येवमन्वानो नावजानीति पंडितः॥४१॥ अवज्ञानं कृतं तेषां नरैर्वा मूढमानसैः॥ आयुः श्रियं कुलं
शीलं हत्वा निरयमावहेत्॥४२॥ शिवज्ञानवतां पुंसां मोक्षस्तस्य करांबुजे॥ सा हानिस्तन्महच्छिद्रं स मोः
हः साधमारिहः॥४३॥ ब्रह्माविष्णुमहेंद्राणामपि तूलायते पदं॥ शिवादन्यदपेक्षाणां मुत्तमानामहात्म
नां॥४४॥ ततोदयान्यत्र कार्यं मोक्षमार्गबहिष्कृते॥ ज्ञानं क्रिया च चर्या च योगश्चेति धरात्मजे॥४५॥ चतुष्प
थः समाख्यातः शिवधर्मः सनातनः॥ पशुपाशपतिज्ञानं ज्ञानमत्यभिधीयते॥४६॥ षडध्वशुद्ध्यविधिनागु
र्वाहीनां क्रियोच्यते॥ वीरशैवप्रयुक्तस्य शिवेन विहितस्य च॥४७॥ लिंगार्चादेः स्वधर्मस्य चर्या चर्येति क
थ्यते॥ तदुक्तेनैव मार्गेण शिवस्थस्थितचेतसः॥४८॥ वृत्त्यंतरनिरोधोयं संयोग इति कथ्यते॥ अश्वमेध
शताच्छ्रेष्टं देवि चित्तप्रसादतः॥४९॥ मुक्तिदं च तदाप्येतद्दशक्तं विषयैषभिः॥ विजितेंद्रियवर्गस्य यमेनानि

यमेनच॥५०॥सर्वपापहरोयोगीविरुक्तशैवकथ्यते॥वैराग्याजायतेज्ञानंज्ञानाद्योगःप्रवर्त्तते॥५१॥यो
गज्ञःपतितोवापिमुच्यतेनात्रसंशयः॥शिवज्ञानसमासाद्यपरंशिवमथाश्नुते॥५२॥यश्चातोवशिवेभ
क्तोविषयेपरितोपिसन्॥शिवधर्मान्कुर्याद्योसदोषेणेवलिप्यते॥५३॥अर्चयेदंबिकानाथंसर्वगं
सर्वहेतुना॥ममधर्मरतोदेविश्रेयसिचेत्कृतोद्यमः॥५४॥पंचाक्षरमनुंनित्यंभावयेच्छिववाचकं॥भुक्तिमुक्ति
प्रदंदिव्यंप्रणवंचपरंशिवं॥५५॥पंचाक्षरमयींविद्यांजपन्नेकाग्रमानसः॥प्रणवंजापयामासशंकरंस
म्यगर्चयेत्॥५६॥साश्वमेधसहस्रस्यसाधिकस्यमहेश्वरी॥लभतेसमहत्पुण्यंज्ञानंशंकरमुच्यते॥५७॥
योयस्मिन्रुद्रसरसिस्नात्वापंचाक्षरंजपेत्॥सोपिपुण्यमहंलब्ध्वाभ्रष्टाचापिलिंगवान्॥५८॥शिवभा
वंसमाश्रित्यशिवयोगमथाचरेत्॥ब्रह्माद्यास्थावरांताश्चदेवदेवस्यशूलिनः॥५९॥पशवःपरिकीर्त्ततेसं
सारपरिवर्त्तिनः॥तेषांपतित्वाद्देवेशोत्ययंपशुपतिंस्मृतः॥६०॥मलमायादिभिःपाशैर्बध्नातिसपशून्पतिः॥ ॥२॥

सएवमोचकस्तेषां भक्त्यासम्यगुपासितः॥६१॥ चतुर्विंशतितत्वानिमायाकर्मगुणाअपि॥ विषयाइतिकथ्यं
तेपाशाजीवनिबंधनात्॥६२॥ ब्रह्मादिस्तंभपर्यंतान् पशून्बध्वामहेश्वरी॥ पाशैरेतैः पतिश्चाहं कार्यंकरयतिः
स्वकं॥६३॥ इंद्रियाण्यपितस्यैव मदाज्ञावशगानितु॥ कार्येतिनरकं कार्यंवसंच स्वच्छया पशून्॥६४॥ तस्मा
शुपतिंमातुज्ञात्वालिंगार्चकःशिवे॥ शिलापाशानविद्योथान् परंनिर्वाणमछति॥६५॥ भुक्तिमुक्तिप्रदंदेविप
शुत्वविनिवर्तकः॥ पूजनीयसदाचाहं यथाश्रध्धंयथाविधिः॥६६॥ यःकुर्योदांतिकींदीक्षा मादेहांतमनाकुलः
॥ वीरशैवंप्रकुर्वीतसवैनैष्टेकउच्यते॥६७॥ सोंत्याश्रमीचविज्ञेयो माहामाहेश्वरःशिवः॥ सएवपतितांश्रेष्टासए
वहिमहाव्रती॥६८॥ नतेनसदृशःकश्चित्कृतकृत्योमुमुक्षुषु॥ अदेहांतमयंदीक्षामहापातकनाशनी॥६९॥ कृत
कृत्येवनिष्कामो यश्चरेद्वीरशैवगः॥ शिवार्पितात्मसततंनतेनसदृशःक्वचित्॥७०॥ यःपश्येद्वीरशैवस्थंब्रह्मह
त्यादिसंभवः॥ पापैर्विमुच्यतेसयो मुच्यतेचभवार्णवात्॥७१॥ शिवाग्रेर्यसरंवीर्यंतद्वीर्यंवीरशैविनः॥त॥

स्मात्सर्वेषुकालेषुवीर्यवांछिवमर्चयेत् ॥७२॥ वेदएवद्विजातीनांस्त्रीणांस्वपतिर्यथा ॥ संन्यासिनाज्ञानमेवं
शैवानांवीरशैवकं ॥७३॥ यथासर्वेषुदेवेषु अधिकोमेघवाहनः ॥ तस्यासीदधिकोब्रह्मासतस्मादधिकोह
रिः ॥७४॥ वेसवादीनांचसर्वेषां अधिकोहंपरःशिवे ॥ मतः परतरंनास्तितन्मतंतुतथैवहि ॥७५॥ कृमिकी
टकपतंगेभ्यः पशवः प्रज्ञयाधिकः ॥ पशुभ्योपिनराश्रेष्टास्तेषुश्रेष्टाद्विजातयः ॥७६॥ द्विजातीष्वधिका
विप्राविप्रेषुकृतबुध्धयः ॥ वकृतुबुध्धिषुकर्तारतेभ्यःसंन्यासिनोधिकाः ॥७७॥ तेषुविज्ञानिनश्रेष्टाः
स्तेषुशंकरपूजकाः ॥ तेषुश्रेष्टामहादेविममलिंगांगसंगिनः ॥७८॥ लिंगागसंगष्वधिकाममयोगरः
तानराः ॥ तेषुश्रेष्टामहावीरशैवदीक्षापरानराः ॥७९॥ तेषामप्यधिकोनास्तिस्मिंत्रिषुलोकेषुशैल
जे ॥ मतःपरतरंनास्तिमन्मतंतुतथैवहि ॥८०॥ अहमेवहिदेवेशिवीरमाहेश्वरोनराः ॥ शिवामहेश्व
रःशंभुः पिनाकीचपितामहः ॥८१॥ संसारवैद्यः सर्वज्ञः परमात्मत्यअमुंमनुं ॥ जपेन्नियमवान्नि ॥४॥

संयोनरः सहितेंद्रियः॥८२॥ सएवाहंमहादेविमन्नामस्मरणात्सदा॥ शिवःशंभुःशिवःशंभुःशि·
वःशंभुःसदाशिवः॥८३॥ इतिव्याहरतेनित्यं द्विनान्यायांतुयांतुमे॥ इदंमन्त्रंवदेदेविममलिंगांगसंगि
नः॥८४॥ शृणुदेविप्रवक्ष्यामितवस्नेहाद्वरानने॥ नकर्मणानतपसानजपैर्नसमाधिभिः॥८५॥ नदाने
ननचान्येनवश्योहंश्रध्धयाविना॥ यस्यश्रद्धास्तिदेवेशियेनकेनापिहेतुना॥८६॥ तस्यवश्योप्यहंदेवियो
गीनांवीरशैवविनां॥ वंद्यःस्पृश्यश्चदृश्यश्चपूज्यःसंभाव्यएवच॥८७॥ साध्यंतस्मात्सदाश्रद्धातस्यवश्यो
भवाम्यहं॥ श्रध्धाममतस्थस्यमयिभक्तिप्रजायते॥८८॥ तस्यैवभवतिश्रद्धामयिनान्यस्यकस्यचित्॥·
अन्नायसिद्धोनिखिलोधर्मआश्रमिणामिह॥८९॥ ब्रह्मणाकल्पितंपूर्वंतन्ममाज्ञापुरःसरं॥ सत्तुपैता·
महोधर्मोबहुभिश्चक्रियान्वितः॥९०॥ कर्मणामहताश्रद्धाप्राप्यशैवीसुदुर्लभा॥ महेश्वराप्रपद्यंतेदेवि·
मांभक्तिसंयुतां॥९१॥ तेषांसुखेनमार्गेणधर्मकामार्थमुक्तये॥ मयिभक्तिवतामेवलिंगिनांवीरशैवविनां·

॥९२॥ अधिकारोनचान्येषामित्याज्ञामामकीदृढा॥ हृदयेसततंशंभुंसर्वकारणकारणं॥९३॥ ध्यात्वाभाववि
धानेन पूजयेन्मां महेश्वरी॥ भक्तिः सुनिश्चयांकृत्वा मयिचानन्यभावतः॥९४॥ सर्वावस्थोपिमुच्येतयद्यपि
ब्रह्मभावनात्॥ सामान्यमपिवक्ष्यामिसदाचारंतुशैविनां॥९५॥ येनसर्वप्रपद्यंते भक्तिमव्यभिचारिणी
॥त्रिकालंभस्मनास्नानंलिंगार्चनमनुत्तमं॥९६॥ जपमीश्वरचिंताच हृयांसर्वत्रसर्वदा॥ सत्यंसंतोषमा
स्तिक्यमहिंसासर्वजंतुषु॥९७॥ ह्रीश्रद्धाध्ययनंयोगः सदापंचाक्षरीजपः॥ व्याख्यानंशिवशास्त्र
स्यश्रवणंचतपः क्षमा॥९८॥ निषिध्धवर्जनीयंच भस्मरुद्राक्षधारणं॥ सोमवारार्चनंदेवि प्रदोषेच
विशेषतः॥९९॥ असत्सागः क्रियाणांच श्रद्धानस्यविवर्जनं॥ तथापर्युषितान्नंच गणकान्नंचविशे
षतः॥१००॥ तथापर्युषितान्नंच॥ गणिकाशब्दस्यअर्थः॥ स्वगोत्रेरमतेयस्तुसविप्रोगणउच्यते॥ गर्भ
पातनशीलायासानारीगणिकास्मृता॥१०१॥ मध्यमध्यगंधस्यानैवेद्यस्यचवर्जनं॥ सामान्यः

५८ सर्ववर्णानां विशेषेणाचारशैवनां ॥१०२॥ क्षमाशांतिश्च संतोषः सत्यमस्तेयमेवच ॥ ब्रह्मचर्यंमम
१२ ज्ञानं वैराग्यंभस्मसेवनं ॥१०३॥ सर्वसंगनिवृत्तिश्च दशैतानि विशेषतः ॥ सर्वलिंगमयं ध्याये जगदे-
तच्चराचरं ॥१०४॥ कथितं तु मया देवि वीरमाहेश्वरागमं ॥ पंचाक्षरस्य माहात्म्यं सविधानसविस्तरं ।
॥१०५॥ कर्मयोगं ज्ञानचर्या ज्ञानयोगं मम प्रिये ॥ चर्या॰चर्यं मया प्रोक्तं किं भूयः श्रोतुमिच्छसि ॥१०
६॥ इतिश्री पारमेश्वरतंत्रे ज्ञानयोगस्वरूपनिरूपणं नाम द्वादशपटलः समाप्तं ॥ श्री सांबसदाशि-
वार्पणमस्तु ॥ शुभं भवतु ॥ श्रीरस्तु ॥ श्रीगुरुदेवदत्तात्रयार्पणमस्तु ॥ श्रीगोपालकृष्णार्पणमस्तु ॥
श्रीशंकर ॥ जयशंकर ॥ जै जयशंकर ॥ शिवहरशंकर ॥ शिवहरशंकर ॥ गौरीशंकर ॥ गौरीरमणं ॥ पा
र्वतिरमणं ॥ गिरिजारमणं ॥ श्रीशिव ॥ जयशिव ॥ जयजय ॥ शिवशिव ॥ जयहरशिव ॥ शिव ॥
॥७॥७॥७॥७॥७॥७॥७॥७॥७॥७॥७॥७॥७॥७॥७॥७॥७॥७॥

श्रीगणेशायनमः॥श्रीसरस्वत्यैनमः॥श्रीगुरुभ्योनमः॥श्रीगौरीशायनमः॥श्रीशांवंदे॥श्री॥
करुणामृतकालोलकटाक्षगणनायकः॥कैवल्यकलनाधारनमस्तेगिरिधन्वने॥१॥कथितंचरहस्यंतद्वीर
शैवाभिधंमतं॥श्रुतंचाधिगतंचैवमतभेदंसविस्तरं॥२॥तत्तद्कुलानुसारेणमतभेदनिरूपितः॥सर्वं
दासर्वयत्नेननित्यलिंगार्चनंत्विति॥३॥तस्यलिंगस्यभगवन्पूजादिषुनिरंतरं॥स्थानभेदंममाचक्ष्व
करपीठादिलक्षणं॥४॥तारतम्येनवाकिंतुफलंतत्तत्स्थलादिषु॥यदितर्हिसमंकिंवाविशेषस्तत्र
कथ्यतां॥५॥ईश्वरउवाच॥श्रृणुनान्यमनादेविरहस्यार्थमनाकुलं॥गोपनीयंप्रयत्नेनयत्स्नेहेनेर्यते
त्वयि॥६॥बहूनिसंतिपीठानिलिंगस्याराधनेमम॥तारतम्येनसर्वाणिफलदानिनसंशयः॥७॥भ
क्तस्यसकलंपीठंमत्तस्यममयोगिनः॥पाणिपीठमहंलिंगंजगदेतच्चराचरं॥८॥आरूढस्यैवदुश्चि
तंवीरशैवस्यलिंगिनः॥यथारुरुक्षोरीशानिहृदयंपीठमुच्यते॥९॥अथोच्यतेबहिःपीठंततोन्यूना

धिकारिणः॥लिंगस्यनित्यपूजायांकरपंकजमादृतः॥१०॥स्ववामहस्तंदेवेशि विभाव्यकमलाकृतिं॥लिंगं
तत्कर्णिकामध्ये प्रतिष्ठाप्यर्चयेत्सदा॥११॥तदेतत्करपीठाख्यंचतुर्वर्गफलप्रदं॥ततोन्यद्दारुजंशैलंलोहमा
र्त्तिकमेववा॥१२॥अजिनंकंबलंवासः पूर्णभूमित्तृणादिकं॥यत्रसंस्थाप्यतेलिंगंतत्पीठंतत्रभावयेत्॥
१३॥दारुपीठंदरिद्रायशैलंपुत्रधनाप्तये॥लोहंसर्वार्थसंसिध्यैमार्त्तिकंज्ञाननाशनं॥१४॥अजनंः
व्याधिपाडायैकंबलंदुःखसिध्यै॥वासःसर्वफलप्राप्त्यैपर्णस्वर्णफलाप्तये॥१५॥भूमिसर्वार्थनाशा
य तृणंविविधकारणं॥तत्रसर्वोत्तमंदेविपीठार्थंकरपंकजं॥१६॥तत्स्वरूपंविशेषेणह्याकर्णयवदामिते
॥स्ववामहस्तंकमलंध्यात्वापंचदलंशुभं॥१७॥पंचांगुलीपंचदलंकर्णिकरतलंतथा॥रेखाहस्तगताःस·
र्वाध्यायेत्कमलकेसरान्॥१८॥पंचांगुलीपुटेदेवेशि पंचब्रह्मानुवाकैः॥पंचब्रह्मात्मनोध्यायेत्कर्णि
कायांगिरींद्रजां॥१९॥अंगुष्ठादिकनिष्ठांतंप्रादक्षिण्येनसुंदरी॥गार्हपत्यंदक्षिणाग्निंमध्यमाह·

वनीयकं ॥२०॥ सव्यापसव्योक्रमशः पंचाग्नीनू भावयेतू सुधीः ॥ शिवस्य पंचवक्त्राणि ध्यायेत्संचांगुली

शिवे ॥२१॥ आरभ्य पूर्वमिंद्रादीनू ध्यायेदष्टसुदिक्ष्वपि ॥ दुर्गां माहेश्वरीं चंडीं भद्रकालीमितिक्रमातू

॥२२॥ प्राणादिषु चतुर्दिक्षु प्रदक्षिण्येन भावयेतू ॥ गणेशबटुकं वीर भद्रं चंडं तथार्चयेतू ॥२३॥ नंदी

शं रिटिनं भृंगि तंडु प्रमथ नायकं ॥ अग्निशासु खातेषु विदिक्षु च विभागवयेतू ॥२४॥ अंतरे द्वादशादि

त्यानू ग्रहान् वयोनिधानू ॥ श्रीशैलमुख्याश्च गिरीनू क्षेत्र काश्यादिकं तथा ॥२५॥ गंगाद्याः सरिताः

सर्वाः कल्पवृक्षादिकास्तरूनू ॥ चिंतामणिकामधेनुं नक्षत्राणि दिशो दश ॥२६॥ ऋग्यजुः सामवेदा

श्च चतुर्वर्णं च पुराणकं ॥ सयेतिहासं चिंतेघ द्वंद्वं सं च मोमतः ॥२७॥ मिमांसा द्वितीयं तर्कं सांख्यं यो

गो विशेषकं ॥ धर्मशास्त्राणि संचिंत्य तन्मध्ये लिंगमर्चयेतू ॥२८॥ आरभ्य कर्पुरंयावन्मणिबंधं कु

लेश्वरी ॥ नालं तत्पाणिपद्मस्य पंचपत्रस्य भावयेतू ॥२९॥ सर्ववेदात्मकं पद्मं सर्वक्षेत्रमयं शुभं ॥

॥ पार॰ तं॰ ॥ सर्वसौभाग्यजनकं यत्पीठं करपंकजं ॥ ३० ॥ यन्न्यूनमतिरिक्तं वा पूजायां मम योगिनः ॥ करपंकजपूजायां ॥ अध्या ॥
॥ ७१ ॥ तत्सर्वं सांगवमेवहि ॥ ३१ ॥ उद्धृत्य सज्जिकाद्वारात् करपंकजमध्यगं ॥ लिंगं कलार्चयेल्लिंगी दक्षिणेन च ॥ १३ ॥
पाणिना ॥ ३२ ॥ आदौ विभाव्य कमलं पाणि पंचदलं शिवे ॥ पूर्वोक्तलक्षणं योगी मध्ये मूलं जपेच्छतं ॥ ३
३ ॥ सहस्रं वा यथाशक्ति तत्रसिंहास्मरेत् ॥ सहस्रं वा यथाशक्ति ॥ तत्रांसुसुखासीनमभिध्याये ख
यासह ॥ ३४ ॥ ध्यानावाहनमारभ्य यावल्लिंगविसर्जनं ॥ तावत्करस्थितं कुर्यात्करपद्मार्चने विधिः ॥
३५ ॥ अभिषेके च पूजायां यावद्भक्ति यथाबलं ॥ यावद्विसर्जनं लिंगं न वसेत्करपंकजे ॥ ३६ ॥ प्रदक्षिण
नमस्कारौ नमस्येवाचरेत्सुधीः ॥ नोतिष्ठेन्न क्वचिद्गच्छेद्यावल्लिंगविसर्जनं ॥ ३७ ॥ निक्षिप्य सज्जिकामध्ये
बध्वा सावमर्गलं ॥ विधाय वसनं ग्रंथिं जह्यान्मूलं शतं पुनः ॥ ३८ ॥ न भवेद्या वद्देतावन्नोतिष्ठेत्तावदीश्व ॥ ७१ ॥
री ॥ श्रीगुरुवागते वापि दृश्यमानेपि वा गृहे ॥ ३९ ॥ यद्युत्तिष्ठति देवेमध्ये धृत्वा लिंगं करे मम ॥ सद्द्रोही म

मविज्ञेयो गुरुद्रोहीनसंशयः ॥ ४० ॥ तस्माद्द्विजनमाश्रित्य निराकुलमनासदा ॥ यथासंभवितांभ॰
त्तया घर्चेल्लिंगंकरांबुजे ॥ ४१ ॥ विभावयेदधः कूर्ममक्षाद्दिक्षष्टद्दिग्गजान् ॥ मध्ये शेषं महाहींद्रं सहस्रंफ
णिमंडलं ॥ ४२ ॥ लिंगंविश्वात्मकं ध्यायेदाद्दिमध्यांतवर्जितं ॥ ४३ ॥ भक्तिश्छावसतोभक्त पाणिपंकजसं
स्थितं ॥ सहस्रघटतोयेन स्वष्टोत्तरशतेनवा ॥ ४४ ॥ चतुःषष्टिघटेनापि यद्दिद्वात्रिंशता घटैः ॥ चतुर्वि
शतिभिर्वापिह्यष्टद्वादशाभिस्तुवा ॥ ४५ ॥ अष्टभिः पंचभिर्द्वाभ्यां मेकेनापिघटेनवा ॥ सहस्रघटतोयेन
शतमष्टघटे करं ॥ ४६ ॥ चुलकोदकमात्रं वालिंगस्योपरिनिक्षिपेत् ॥ यावच्छक्ति यथाभक्ति गंधवच्छुद्धः
तः तोयथा ॥ ४७ ॥ शोधितेनातिशीतेन लिंगंसमाभिषेचयेत् ॥ शंखेनखड्गपात्रेण स्वर्णमुक्तिकयापिवा ॥
४८ ॥ अपिलौहेन पात्रेण पर्णेनान्येन केनचित् ॥ सर्वभावे महादेवि दक्षिणेनैव पाणिना ॥ ४९ ॥ अभि
षिंचेद्यथाशक्ति घेष्टपात्रं विभावयन् ॥ सहस्रत्प्रसृतिर्देवि सहस्रघटसंमता ॥ ५० ॥ ममलिंगाभिषे

कार्थेपुनर्भावनयाब्धयः॥ यावतिः पयसांभक्तः स्वर्पयेत्मसृतिर्मम॥ ५१॥ तावदब्धिसहस्रौघैरभिषिक्तो
स्म्यहंशिवे॥ ५२॥ सर्वदेवात्मकं तोयंसर्वतीर्थमयंशुभं॥ ५३॥ तेनाभिषिच्यमांभक्त्या कोवाहंनभवे३
छिवे॥ शीतलंलघुसद्गंधंशातधावस्त्रशोधितं॥ ५३॥ तेनाभिषिच्यमांभक्त्यानशिवस्तत्रकोभवेत्॥
५४॥ भूमिष्टमुद्दतात्सुण्यंततः मश्रवणोदकः॥ ५५॥ ततस्तुसारसंतीर्थंमहानद्या स्ततोधिकं॥ ततो गं
गाजलंपुण्यं गंगासागरसंगजं॥ ५६॥ तत्रलब्धेनपयसाभिषिंचेन्मां प्रयत्नतः॥ ध्यानंचद्रोणबिल्वं
चविशेषः करपंकजं॥ ५७॥ घंटानादंचशंखंच प्रतिक्षिप्या म्यहंसदा॥ दशांगधूपकर्पूरंदीपंपल्लेन
चार्पयेत्॥ ५८॥ जपस्तोत्रंप्रणामादि पाणिलिंगंविसर्जनं॥ एवंहिनियमोदेवियदिछापाणिपंक
जं॥ ५९॥ पूर्वोक्तर्तुनिचात्तिष्टेद्यावल्लिंगविसर्जनं॥ एवंहिनियमोदेवियदिछापाणिपंकजं॥ ६०॥ यद्य ॥३॥
न्यत्रसमुत्तिष्ठे द्यथाविघ्नस्तदाशिवे॥ निरंतरायमासाद्यशेषंतत्रसमापयेत्॥ ६१॥ अन्यतः व्रतभंगस्या

द्रौरवंनरकंव्रजेत् ॥ आरभ्यपूजांलिंगस्य समासेरूपवंशाने ॥ ६२ ॥ अन्नात्कउच्छिनो मध्ये रौरवंनर
कंव्रजेत् ॥ सर्वसामग्र्यभावेपि विनिक्षिप्यकरेमम ॥ ६३ ॥ लिंगवामेदक्षिणेना भिषिंचेद्भक्तितोंभसा
॥ शक्तस्तुनियमंकृत्वा वर्षमेकं त्रिकालः ॥ ६४ ॥ नित्यमुक्तप्रकारेणा भिषिंचेत्पाणिनांभसा ॥ वि भा
व्यघटसाहस्रं सहस्रंप्रसृतीरपि ॥ ६५ ॥ अधःशायीब्रह्मचारी सः स्वप्नेर्मां विलोकयेत् ॥ सज्जिका
याः शतगुणामपनीतकवाटकं ॥ ६६ ॥ तत्सहस्रगुणंभूमौवस्त्रपीठादिपुक्रमात् ॥ ततःशतगुणंप्रो
क्तंपट्टवस्त्रार्चयेन्मम ॥ ६७ ॥ सतत्सहस्रंगुणं सर्वपीठे मणिमयेतथा ॥ अनंतगुणितंपाणिपंकजेम
मपूजनं ॥ ६८ ॥ ज्ञात्वागुरुमुखात्सम्यक् पाणिपद्मेसमर्चयेत् ॥ यद्यन्यथाप्रमादस्याद्वायुषस्यक्षयो
भवेत् ॥ ६९ ॥ नांगीकरोतितत्पूजां सर्वकृत्परमेश्वरः ॥ प्रवृत्तिमपि धर्मार्थे निवृत्तिमितरस्यच ॥ ७० ॥ ज्ञा
त्वागुरुमुखात्सम्यक् यथाशास्त्रमथाचरेत् ॥ यथायोग्यमुमेलिंगंयथापंचाक्षरीमनुः ॥ ७१ ॥ यथैवश्री

गुरोर्नामतथैवकरपंकजं॥स्वरूपंकरपद्मस्यज्ञात्वागुरुमुखात्सुधीः॥७२॥अभिषेकपरोनित्यमहमेवसई
श्वरी॥यद्राजन्मज्ञातांतेतुजानातिकरपंकजं॥७३॥तदेवचरमंविद्धियथामंतस्तथाकरः॥सन्निधावप्र
यत्नेनस्वदेहेवर्त्ततेकरः॥७४॥सर्वदेवमयंपीठंसर्वक्षेत्रमयंपरं॥करपंकजपीठस्यमध्येकाशीसदान्वि
ता॥७५॥अंगुष्ठमूलयोध्याख्यावंतिकातर्जनीमुखे॥मथुरामध्यमेमूलेमायाख्यानामिकामुखे॥७
६॥कांचीकनिष्ठिकामूलेद्वारकामणिबंधके॥अंगुष्ठमध्येगोकर्णंतर्जनीमध्यमेशिवे॥७७॥रामेश्वरंम
ध्यमध्येश्रीशैलंपर्वतोत्तमः॥अविनाशोनामिकामध्येकनिष्ठामध्यमेतथा॥७८॥वर्त्ततेहिसदाकालि
हस्तिक्षेत्रंमहत्तरं॥सप्तकोटिश्वरंपाणौविरूपाक्षंतुपृष्टतः॥७९॥गंगाचयमुनाकृष्णाकावेर्यंगुलीम
ध्यतः॥ब्रह्मेशंपंचलिंगेशंमार्कंडेशंचिदंबरं॥८०॥महाकालेश्वरंपंचस्वंगुल्यग्रेषुभावयेत्॥सर्वमंत्रमयं
पुण्यंसर्वपीठमयंपरं॥८१॥पवित्राणांपवित्रंतत्पाणिपंकजमर्चनं॥यथामंत्रेषुसर्वेषुममपंचाक्षरःपरः॥



॥५॥

॥८२॥ यथासर्वेषु देवेषु ब्रह्मादिष्वहमीश्वरः॥ यथा क्रियासु सर्वासु मम पूजा गरीयसि॥ ८३॥ यथालाप
न संगेषु श्रीगुरोर्नाममंगलं॥ यथा मोहेषु सर्वेषु भक्तिर्मयि पराशिवे॥ ८४॥ तथा मसूजनेश्रेष्ठं पीठे
षु करपंकजं॥ यथा पुष्पेषु च द्रोणं पत्रजातेषु बिल्वजं॥ ८५॥ तिलाक्षताद्रव्यजाले यथा दूर्वा स्तृणास्तु
॥ पूजोपकरणे देवि शक्ताशक्त समं सुखं॥ ८६॥ सर्वसामग्र्यभावेपि सर्वदं करपंकजं॥ कोटिकोटि घटैस्तो
ये पात्रस्थमभिषेचयेत्॥ ८७॥ करस्थं बिंदुमात्रेण सममेव फलं द्वयोः॥ यन्नूनमतिरेकं यज्ञानतोज्ञा
नतोपि वा॥ ८८॥ संपन्नः सर्वकुंभेनाभिषिंचेत् शतसंख्यया॥ अन्यश्चुलुकतोयेन सममेव फलं द्वयोः
॥ ८९॥ न तत्तन्यूनता किंचिन प्रायश्चित्तिकल्पना॥ सकलं सांगमेवं हि पूजनात्करपंकजे॥ ९०॥ अनुस्था
नं महादेवि पूजामध्ये तु लिंगिनः॥ यावल्लिंगं समुद्वासेत् करपीठविधिस्स्वयं॥ ९१॥ सांगं सर्वार्चना शा
क्तावभिषेकादिकं क्वचित्॥ यथा शास्त्रार्चने चापि ह्यर्चयेत्करपंकजे॥ ९२॥ सर्वसाधारणं चैतत्पूज-

नंकरपंकजे ॥ नकश्चित्तत्रदोषोस्तिलिंगसंस्थापनेर्चने ॥ ९३ ॥ नपाणिपीठसदृशंमेरुकैलास एववा ॥ शिव
लिंगस्यपूजायांकुत्रापिभवेच्छिवे ॥ ९४ ॥ तस्मात्सर्वप्रयत्नेनलिंगसंस्थापनेर्चने ॥ सर्वदेवमयिंपाणिः
पंमसर्वोत्तमोत्तमं ॥ ९५ ॥ सहस्रनामभिपूजांशतमष्टोत्तरंतुवा ॥ एकंवाप्यर्पयेत्पुष्पंसर्वदाकरपंकजे
॥ ९६ ॥ अस्तीर्यविमलंवस्त्रंमृदुपाणितलेशुभे ॥ वामेदक्षिणहस्तेनपूजयेसत्रपुष्पकैः ॥ ९७ ॥ ताभ्या
मेवहिपाणिभ्यांधत्तेशूलंकपालकं ॥ यत्रकंठेधृतंलिंगंतत्रस्यादृतिकालिमा ॥ ९८ ॥ तादृक्षहिसमंप
न्नमुद्रितंकरपंकजं ॥ रहस्यमपिदेवेशि किंभूयश्रोतुमिच्छसि ॥ ९९ ॥ इतिश्रीपारमेश्वरतंत्रेशिवाद्वै
तसिद्धांतेकरपंकजविधानंनामत्रयोदशापटलः समाप्तं ॥ १३ ॥ ७ ॥ श्रीशिवार्पणमस्तु ॥ ७ ॥
॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥

श्रीगणेशायनमः॥श्रीशंवंदे॥देव्युवाच॥विज्ञानघनविज्ञानमयिविज्ञानकारण॥नमोस्तुगुरवेतु
भ्यंशंभवेशशिमौलये॥१॥सरहस्यंचपूजादौकथितंकरपंकजं॥इदानींश्रोतुमिछामिलिंगलक्षणमी
श्वरी॥२॥सखंडलिंगेकिंपुण्यंपूजायांयदखंडके॥सखंडेशिथिलेमध्येकिंवाकार्यंहिलिंगिनां॥३॥एत
त्सर्वंममाचक्ष्वसविस्तरमुमापते॥यछ्रुत्वाजायतेतस्यमतिस्त्वयिपरमेश्वर॥४॥ईश्वरउवाच॥शृणु
देविप्रवक्ष्यामियन्मांत्वंपरिपृछसि॥रहस्यमपिगोप्यंवावक्ष्येस्नेहवशोनते॥५॥लिंगंतद्द्विधंप्रोक्तं
मखंडंचसखंडकं॥सखंडंद्विविधंदेविसखंडाखंडभेदतः॥६॥अखंडमाद्यंलिंगंमखंडाकारमंडलं॥
आद्यंतरहितंशून्यंनिराकारमनामयं॥७॥आरूढस्यहितल्लिंगंचिद्घनंदृघनंमहत्॥सखंडमारुरुक्षो
स्तुयदीशोहरिदैवतं॥८॥सखंडबाह्यलिंगस्याछलादिद्विविधंमतं॥पूर्वोक्तलक्षणंलिंगंसखंडाखं
डभेदतः॥९॥पाणिपीठंचलिंगंचयदेकंतदखंडकं॥पाणिपीठंचलिंगंचयद्भिन्नंतत्सखंडकं॥१०॥सर्वा

ण्येतानिलिंगानितारतम्यार्थदायिनी ॥ अधिकारानुसारेण भक्तिरेकाविशिष्यते ॥ ११ ॥ यावन्हि पाणिपी
ठस्यभागश्चोर्ध्वमधश्चसः ॥ आयामश्चापिविस्तारऔन्नस्यंतावदेवहि ॥ १२ ॥ यावत्पीठोर्ध्वभागंतद्विस्ता
रायाममानतः ॥ लिंगचतावदेवस्याद्विस्तारायाममानतः ॥ १३ ॥ यावानुपरिविस्तारआयामश्चापितादृ
शः ॥ तावत्प्रमाणेनसोमसूत्रस्यातावदेवहि ॥ १४ ॥ योवर्दंतर्गतंत्यक्तापीठादुपरितद्भवेत् ॥ अर्धार्ध
मंतरेस्थाप्यअष्टबंधार्थमीश्वरी ॥ १५ ॥ आदौविधायाष्टबंधंसंस्कृत्स्यैवार्थदीक्षयेत् ॥ लौकिकस्यैवलिं
गस्यपापिष्टस्यचोभयोः ॥ १६ ॥ नाष्टत्रोविगतेलिंगेदेवाद्वामानुषावपि ॥ प्रमादाद्वाविपत्यावापुनरन्य
श्चधारयेत् ॥ १७ ॥ दीक्षामुखेनगुरुणा बद्धलिंगः कुलेश्वरी ॥ यदिक्षणमलिंगस्याद्रौरवेनरकेवसेत् ॥ १८
लिंगस्यतुनचेधार्यंनपूज्यंलिंगयुग्मकं ॥ दिनैकंबहुनैवार्च्यमेकलिंगमहंयतः ॥ १९ ॥ लिंगंचपाणिपीठंचद्व
योरप्येकभावनं ॥ एकलिंगमयीकुर्यादेकोहंशंकरोयतः ॥ २० ॥ षट्सूत्रमानकोपीठेत्रिसूत्रपरिसंमतिं ॥ ॥१॥

संध्यायलिंगदाढर्यायह्यष्टबंधं समाचरेत् ॥ २१ ॥ पंचबंधंत्रिबंधंवा दृढयेदेनकेनवा ॥ द्रव्येण स्नेहयुक्तेन शै
थिल्येपुनराचरेत् ॥ २२ ॥ लिंगनाशे भवेदन्यत् पीठनाशे तथैवहि ॥ शैथिल्येचाष्टबंधस्य यथापूर्वं
समाचरेत् ॥ २३ ॥ लिंगनाशे भवेद्दीक्षा चैकरात्रविधानतः ॥ पीठनाशेतु लिंगस्य सद्योदीक्षा विधीय
ते ॥ २४ ॥ शैथिल्ये त्वष्टबंधस्य होमदीक्षामथाह्निकं ॥ शतमष्टोत्तरं शक्त्या भोजयेच्छिवयोगिनः ॥ २
५ ॥ जपेद्द्वादशसाहस्रं मम पंचाक्षरीमनुं ॥ अन्यथाविपदं याति रौरवं चाधिगच्छति ॥ २६ ॥ लिंगना
शे भवेल्लिंगं पीठं पीठस्यनाशने ॥ अष्टबंधोस्य बंधस्य यन्नष्टं तत्पुनश्चरेत् ॥ २७ ॥ लिंगाष्टबंधपीठना
मेकादीक्षा विधीयते ॥ सञ्जीवस्त्वगुणानां तु सञ्जीघस्तत्पुनराचरेत् ॥ २८ ॥ होमश्च दक्षिणादानं भोजनं
शिवयोगिनं ॥ जपश्च सममेवेस्यादष्टबंधादिकत्रये ॥ २९ ॥ जपोदानं यथाशक्ति भोजनं शिवयोगिनं ॥ सम
मेव महादेवि सञ्जादित्रयनाशने ॥ ३० ॥ शृणुतत्र विशेषं ते प्रवक्ष्यामि महेश्वरी ॥ जलार्चे न्मम नुर्लिंगमश

॥पा॰तं॰॥ क्तासर्वकर्मणि ॥३१॥ यद्यकाले ष्टबंधस्य दैवाछेतिल्यमागतं ॥ सद्यः संबंधयेल्लिंगं येनकेनापिवस्तुना ॥३ ॥अध्या॥

॥२॥॰ २॥ शनैः संपादयेदिष्टबंधनायद्रढायतु ॥ नोपेक्षांतत्रकुर्वीतविमुखोहं ततस्ततः ॥ ३३ ॥ अप्रमत्तः स ॥१४॥

दातिष्टेल्लिंगं संरक्षणे सुधीः ॥ यथा प्राणे यथा देहे नष्टे न्यस्तु नराचरेत् ॥ ३४ ॥ एकदेशे विभिन्नेतु यदि

प्रथमलिंगकं ॥ यावच्छिष्टंहितत्तावद्यावत्तावच्च रेच्छिवे ॥ ३५ ॥ द्वितीयादिषुलिंगेषु केवल्यान्यसमाचरे

त् ॥ लिंगानांशिवभक्तानां सद्योदीक्षां च भोजनं ॥ ३६ ॥ पात्रनाशे भवेसा शौत्रंयन्नष्टं स्तस्तु नश्चरेत् ॥ व

स्ये श्रृणु महादेवि प्रसंगात्पात्रलक्षणं ॥ ३७ ॥ सौवर्णं रजतं कांस्यं ताम्रं पैत्तलकं तु वा ॥ दारुजं मृण्मयं शैलं प॰

र्णजं नारिकेलजं ॥ ३८ ॥ अभिन्नं विपुलं लक्ष्णं वर्तुलं नवमुज्वलं ॥ निर्मलं पंकरहितं सुगंधिलघुशोभितं ॥ ३

९ ॥ तादृशानि पात्राणि नव सप्तापि पंच वा ॥ अथवा त्रीणि कुर्वीत नैकं न सम संख्यया ॥ ४० ॥ दरिद्रोपि न

कुर्वीत नसीसंनायसंत्रपु ॥ अपात्र बहु पात्राणि वर्जयेच्छिवपूजने ॥ ४१ ॥ शंखपात्रं सुरम्यं च सद्मपात्रं विशे ॥२॥

षतः॥ मृत्तिकानारिकेलादि पात्रं स्याच्छिवपूजने॥४२॥ संकल्पं साधितं पात्रं न निमित्तं विना तथा॥ चाल
येत्पूजने काले न स्कनं कारयेज्जलं॥४३॥ संभवे सति सौवर्णपात्रस्यादुत्तमोत्तमं॥ अभावे रजितं लोहं मृ
त्पूर्णादि तु राक्षितः॥४४॥ सर्वसाधारणं देवि नारिकेलं शिवार्चनं॥ आयुर्यशोबलकरमपमृत्युनिवार
कं॥४५॥ सम्यक्संक्षालयेन्नित्यं नान्यकर्मणि योजयेत्॥ विनैव पूजालिंगस्य शिवपात्रं तदुच्यते॥४६॥
पात्रेषु सागरान्सत्य गंगागोदावरी नदि॥ कृष्णावेणी तुंगभद्रा कावेरी च पिनाकिनी॥४७॥ ताम्रपर्णी
तथा रेवि यच्च पुष्करणात्रयं॥ मणिकर्णिकं धनुष्कोटिं भावयेत्पात्रमध्यगं॥४८॥ न भूमौ प्रक्षिपेत्पात्रं न चरि
तं कदाचन॥ नान्योन्यं ताडयित्वा तु जनयेद्ध्वनिमीश्वरि॥४९॥ संसाधयेत्प्रयत्नेन पात्राणामधुरं भुवि॥ अ
धाराणि सुयोग्यानि पात्रनिक्षेपणाय हि॥५०॥ अभिषेकाय लिंगस्य यद्दि स्याद्दुग्धतोयदिकं॥ तत्तोदुकुं
भमवनाधारं निक्षिपेद्धिना॥५१॥ यद्यंतराभवेच्छंका पाणिलिंगस्य लिंगिनः॥ पूजायां देहधर्मस्य त्रिाष्यपा

॥पार॰तं॰॥ णितलेक्षिपेत्॥५२॥शिष्याद्यं भावे देवेशि सज्जिकायां पुनः क्षिपेत्॥ निवर्तयित्वा निर्वर्त्य सचैलं स्नान ॥अध्या॥
माचरेत्॥५३॥पुनः कुर्याद्यथापूर्वं पूजाशेषं मम प्रिये॥अन्यथा पतितो याति दारुणं नरकार्णवं॥५४॥ना ॥१५५॥
॥३॥ शुची पूजयेल्लिंगं नाकाले नान्यविघनः॥ नानादरेण हस्तक्षे पूजायां विधिरुच्यते॥५५॥ धृतरुद्राक्षभस्मां
गः शिवनामपरायणः॥ गुरूक्तेन विधानेन प्रयतो लिंगमर्चयेत्॥५६॥ नान्यकार्यपरः क्वापि न प्रलापपरो
पिवा॥ नव्यग्रो वानत्वरया पूजयेल्लिंगमीश्वरी॥५७॥ संतुष्टमानसः शांतः शुचिमाल्यंबरावृता॥ सुवासित
मुखो भूत्वा पूजयेल्लिंगमीश्वरी॥५८॥ सदा पूर्वमुखः पूजां कुर्याल्लिंगस्य शांकरी॥ आयुः श्रियं यशो वर्चः त्रजं
पुष्टिं यदिच्छति॥५९॥ दक्षिणादिङ्मुखः कुर्यात् मरणादिषु सुंदरी॥ कामार्थी पश्चिममुखो ज्ञानार्थी स्याद् उ
दङ्मुखः॥६०॥ प्रातर्मध्यान्हयोः पूर्वमुखः पूजां समाचरेत्॥ रात्रौ उदङ्मुखः कुर्या द्विधिरेषा ममार्चने॥६१
॥व्यस्तस्तं नैव कुर्वीत विनैहिकफलं शिवे॥ यदि स्या ज्ञानमोक्षार्थी पूजयेदुत्तराननः॥६२॥ निस्पृहा सर्वेऽ ॥३॥

कामेषु मुमुक्षुर्विजितेंद्रियः॥ उक्तलक्षणवान्‌ज्ञानी सर्वस्य सर्वदा भवेत्‌॥६३॥ तेजस्काम्यग्निवद्दन प्रजाकामि
मुरुत्सुखः॥शत्रुक्षयादिश्वरास्या प्रजार्थी प्रत्यगुत्तरः॥६४॥ संध्यासु पूर्ववदन अभिचारक्रकर्मणि॥ अवे
न्निरतिदिग्वक्त्रः सर्वार्थी सर्वतोमुखः॥६५॥इत्यादिनियमोपेता आस्तिको भक्तिमान्मयि॥ गुरुदैवतये
रेकरूपं प्रत्ययवान्‌ भवेत्‌॥६६॥प्रायश्चित्तेपि कैवल्ये निषेधोपि विधावपि॥ कार्यप्यकार्य सर्वत्र गुरुरेव
हि कारणं॥६७॥सन्निधावपि दूरे वाप्यवधाने समक्षकं॥ गुरुरुक्त एव नियमो यतः सर्वात्मको गुरुः॥६८॥
ब्रह्मा विष्णुः शिवो रुद्रः ईशः शक्तिः पितामहः॥सूर्यचंद्राग्निमरुतो गुरुरेव न संशयः॥६९॥ उत्थाने शय
ने क्वापि प्रधान्ये चोपवेशने॥ निद्रादौ च तदंते च स्मरेत्सर्वत्र सद्गुरुं॥७०॥ वचनारंभसमयेक्षुतप्रस्खलनादि
षु॥ विकत्थने च कलहे स्मरेत्सर्वत्र सद्गुरू॥७१॥ सर्वपापविनाशाय सर्वसौख्यविवृद्धये॥ सर्वाभिष्टार्थसि
ध्यर्थं संस्मरेत्श्रीगुरुं सदा॥७२॥ब्रह्महत्यासहस्राणि गोहत्याकोटिकोटिशः॥ साधितान्यपि धीपूर्वं

श्रीगुरोःस्मरणंहहेतू॥७३॥ दुःस्वप्नेतिदुरालापेदुश्चिंतेदुर्भयेपिच॥दुर्निमित्तेचरूक्षेचसंस्मरेतुश्रीगुरुंसदा॥७४॥
॥पवित्रंपावनंपुण्यंशुध्धंपरममंगलं॥वेदवेदार्थसारार्थंश्रीगुरोर्नामसंस्मरेत्॥७५॥अशास्त्रेवापिशास्त्रेवा॰
नाचाराचारयोरपि॥सर्वदोषविनाशायश्रीगुरोःस्मरणंपरं॥७६॥विद्याज्ञानविवेकायसुखभोगार्थसिध्ध
ये॥जीवन्मुक्त्यर्थलाभायकुर्यात्संस्मरणंगुरोः॥७७॥कृतानांसर्वपापानांमनोवाकायकर्मभिः॥सद्यएवविना
शायसंस्मरेद्गुरुमादरात्॥७८॥नविनश्यंतिपापानिजाग्रदादिकृतान्यपि॥अनन्यामपिचान्यानिश्रीगुरुं
स्मरणंविना॥७९॥यद्यस्तिमयिसद्भक्तिसाधकस्यचलिंगिनः॥मद्रुपिणमुमेनिसंसंस्मरेतश्रीगुरुंसुधिः॥
॥८०॥उषसिब्रह्मसद्रूपंचिद्रूपंपरमामृतं॥चिदानंदंघनंदेवंसर्वदाश्रीगुरुंस्मरेत्॥८१॥सर्वेषामपिकार्याणां
मारभेयतमानसः॥अप्रमत्तस्मरेन्नित्यंश्रीगुरोर्नाममंगलं॥८२॥गुरुभक्तिविहीनस्यसमस्तानिष्फला॰ ॥६॥
क्रियाः॥अनुष्ठितामपिस्पृष्टंस्वैरिब्रलवद्भवेत्॥८३॥बहुनाकिमुनानार्येसर्वसारमिदंशृणु॥सर्वके

६ वल्यमाकल्यंपूर्त्तयेपरमंवच॥८४॥स्वस्थः परवशोवापितुष्टोवादुःखितोपिवा॥सर्वावस्थासुसर्वत्र
गतिःसद्गुरुसेवनं॥८५॥अशक्तः पूजनेभक्तः उक्तलक्षणकर्मणि॥सर्वसाकल्यसिध्यर्थंध्यायेद्गुरुपदांबु
जं॥८६॥मंत्रमूलंगुरोर्वाक्यंपूजामूलंगुरोःपदं॥ध्यानमूलंगुरोर्मूर्त्तिर्मोक्षमूलंगुरोःकृपा॥८७॥यस्त्व
शक्तोममध्यानेसध्यायेद्गुरुमीश्वरं॥जपन्मंत्रस्यमेदेविश्रीगुरोर्नामसंस्मरेत्॥८८॥सर्वमंत्रमयंदिव्यं
सर्वशास्त्रमयंशुभं॥सर्ववेदात्मकंपुण्यंश्रीगुरोर्नाममंगलं॥८९॥यदासाक्षाद्गुरोरूपंभक्तःपश्यतिपुण्य
वान्॥तदेवममदेवेशिसाक्षाद्दर्शनमुत्तमं॥९०॥तस्मात्स्वर्गापवर्गेच्छुरिहभोगाच्छुरास्तिकः॥सर्वदासर्व
यत्नेनगुरुदेवंसमाश्रयेत्॥९१॥सर्ववेदाश्चशास्त्राणिपुराणानिचसंस्थिता॥स्मृतयोधर्मशास्त्रा३
णिश्रीगुरोर्वचनंपरं॥९२॥गुकारोंधतमःप्रोक्तंरुकारोभास्करोदयः॥मोहांधकारहरणाद्गुरुरित्यभिधी
यते॥९३॥सप्तकोटिमहामंत्राश्चित्तविभ्रमकारकाः॥एकएवमहामंत्रोगुरुरित्यक्षरद्वयं॥९४॥द्वावे

वमंत्रो देवेशि सर्वेषामपि मुक्तये॥ सर्वक्लेशविनाशाय गुरोरिति शिवेति च॥९५॥ भावयेत्सततं धीमान्
जगदेतच्चराचरं॥ इंद्रियोपगतं यद्यत् श्रीगुरोरुपमेश्वरं॥९६॥ गुरोर्यात्रा सदा काशी यात्रा तस्य प्रदक्षिणं॥
॥भूमिप्रदक्षिणं साक्षाद्दर्शनं मम सुव्रते॥९७॥ इत्येतत्कथितं देवि सर्वसारमनुत्तमं॥ रहस्यमात्मरक्षार्थं
किं भूयः श्रोतुमिच्छसि॥९८॥ इति श्रीमत् पारमेश्वरतंत्रे अष्टबंधादिगुरुनिरूपणं नाम चतुर्दश पटलः॥
॥१४॥

श्रीगणेशायनमः॥ श्रीगौरीशंवंदे॥ देव्युवाच॥ सृष्ट्वातमेकं स्वात्मानमनेककुरुतेपुनः॥ एकीकृत्यग्रसति
यस्तस्मैरुद्रनमोस्तुते॥ १॥ सर्वदृक् सर्वकृत्स्वामिन् सर्वात्मन् सर्वपालक॥ शर्वसर्वज्ञविश्वेशशरण्यायनमो-
नमः॥ २॥ कृपयामयिवात्सल्यवशेनकथितंप्रभो॥ वीरशैवस्यविस्तारंवैभवंतुसविस्तरं॥ ३॥ इतःपरंमयावा-
च्यमल्पंवानास्तिमेमतिः॥ तथापिममचित्तस्यपर्याप्तिर्नैवजायते॥ ४॥ अस्तिचेदुपदेशंमेरहस्यवाप्रका-
शिकं॥ गूढंवाप्रकटंवापिदयांमयिनदर्शय॥ ५॥ यदिदास्यस्यनुक्रामेपृछाम्यात्मगतंस्पृहां॥ पृष्टव्यमस्तेव-
ममवर्ततेहृदिसंशयः॥ ६॥ ईश्वरउवाच॥ साधुसाध्विवरारोहेपृछत्वमपिशंकिता॥ नवावाच्यमितिःकीरे-
त्वतःकिमधिकंमम॥ ७॥ यदिछसिमतःश्रोतुइनिगुह्यमतंतुवः॥ तवस्नेहेनवक्ष्यामिश्रुत्वाधारयगोपय॥
८॥ श्रीदेव्युवाच॥ सरहस्यमुपादिष्टंवीरशैवाभिदंमतं॥ अन्यानिचादिशैवादिह्यानुपूर्वेणमेप्रभुः॥ ९॥
इयानेवविशेषोयेनेदुक्तंपूर्वमध्यमे॥ ययस्तिवाविशेषोत्रतारतम्येनवाकवित्॥ १०॥ अस्तिचेदपिभे

॥पार॰तं॰॥ दोवातारतम्येनवासमः॥तत्रतत्रविशेषोवाकोवावदमहेश्वर॥११॥अथैषांकोनुवाचारोवीरशैवेपिना: ॥अध्या॥
॥१॥ न्यतः॥वीरशैवेषुवादेव।२विशेषोममकथ्यतां॥१२॥वीरशैवविभेदेषुस्थितानामधिकारणं॥दैवाद्वाबु ॥१५॥
द्धितोवापिलिंगादीनांविनाशने॥१३॥पूर्वोक्तएवमानीषांविभीदेषुविशेषतः॥लिंगादिनाशेपी
ठानांवीराणांवदमेहर॥१४॥ईश्वरउवाच॥साधुसाध्विसमीचीनःप्रश्नोस्तिभुवनेश्वरी॥लोकोपका
रायकृतःशृणुवक्ष्यामिकृत्स्नशः॥१५॥यद्दित्वयात्वंदेवेशिनकृतःप्रश्नईदृशः॥अन्येषुवीरशैवऽ
स्थासरहस्यविवेकृतः॥१६॥रहस्यंविदितंदेवित्वयापरममंगले॥अद्यत्वयाधृतोसर्वेवीरशैवम॰
तेश्वरः॥१७॥अन्येदैवांधकूपेषुपतंतिकुधियःशिवे॥अज्ञानत्वामन्मतेसारंरहस्यंपरमार्थतः॥
१८॥वीरशैवमहाशूलंखातेनपतिताअपि॥देवित्वत्प्रश्नविभ्रोण्यामोधृतासुखमद्यते॥१९॥यदा
जालगतःपक्षीनिर्गतंजलसूत्रतः॥बहिर्द्वारमजानानोभ्रियतेचयथाशिवे॥२०॥वीरभेदानवि॰ ॥१॥

ज्ञेयाहवाद्घोरमहाह्रदे॥ निपत्यदुःखक्लिश्यंतिशून्यकूपगताइव॥ २१॥ नसाधुबहुसेवंतेगुरुंमद्रूपि-
णंशिवे॥ नजानंतितासाधुपृष्ट्वामतरहस्यकिं॥ २२॥ नाल्पज्ञःपारमन्वेतिनाल्पज्ञःसुखमेधते॥ नल
ज्जेद्गुरुसेवायांनाल्पश्चाप्यपृछ्छसः॥ २३॥ प्राणार्थमानवसुभिःगुरुशुश्रूषणेसुखः॥ साधयेदात्मनोभि
ष्टंगुरोरेवमहात्मनः॥ २४॥ किंचिज्ज्ञादांभिकाभ्रष्टागुरुसेवाभिमानिनः॥ वीरशैवनजानंतिशठाःपंडि-
तमानिनः॥ २५॥ अन्यस्मैबोधयंतिस्मसर्वज्ञत्वंपरंखलाः॥ नाचरंतिस्वयंकिंचिदधस्तेनिपतंतिहि॥ २६
ततःसम्यग्गुरुमुखात्शास्त्रमूलंविचारयेत्॥ नविशेदप्रमत्तोथह्यवीक्ष्यात्मबलाबले॥ २७॥ अथशृणु
महादेविवीरशैवमतेमम॥ विशेषमपिचाचारंयथावत्कथयामिते॥ २८॥ यदुक्तमादिशैवादिवीरशैवांत
मीश्वरः॥ नतत्तथाविशेषोत्रभेदषट्कोपिपूर्वकं॥ २९॥ वीरशैवविशेषोस्तिसावधानमतिःशृणु॥ यस्य
विज्ञानमात्रेणजायतेयःसदाशिवः॥ ३०॥ त्रिविधंवीरशैवाख्यमधिकारिविभेदतः॥ कृथोमथापुरा-

॥पार॰तं॰॥ देविभक्तोध्धरणहेतवे॥३१॥समान्यवीरशैवंचविशेषंचततःपरं॥निराभारंवीरशैवंततताधिकमीश्व· ॥अध्या॥
॥२॥ री॥३२॥मतेफलंविशेषोवाभेदोवावीरशैवके॥अत्रोच्यतेमयायोर्थपरमार्थसवेशिवे॥३३॥सामा· ॥१५॥
न्यवीरशैवंचतत्रदेविपुरोदितं॥आचारश्चविधिर्देविपूर्वमेवोदितंमया॥३४॥सत्यंभूतदयाहिंसा·
शमोदमउदाहृताः॥विविक्तानापेक्षभक्षीरहंहंममपूजनं॥३५॥स्मरणंकीर्त्तनंध्यानंमद्भावपरिशी
लनं॥मद्भक्तेपरराभक्तिर्मदेकालममाश्रया॥३६॥इत्यादीनिपुरोक्तानिपराण्यंगानितस्यतत्॥सामान्य
वीरशैवस्थलिंगीनोवीरयोगिनः॥३७॥गुरोःशुश्रूषणंभक्त्यामतभेदेनसर्वदा॥त्रिकालंमर्चयेलिंगं·
स्याहिंसयाभक्ष्यजीवनं॥३८॥भिक्षाटनमेकगृहेभिक्षावाभक्तितोयदि॥ददातिप्रार्थयन्भक्तंभुंजीया
तदनुग्रहात्॥३९॥यामेवायदिवारण्येमनोयत्रप्रसीदति॥तत्रैवचस्फुरंध्यायेत्मद्रूपंमपिवागुरुं॥
॥४०॥लिंगादिनाशादेवाद्वाधारयेद्विविधःपुनः॥तथैवव्रतलोपस्यात्तथासाध्यंमतंमम॥४१॥सामा· ॥२॥

न्यवीरशैवस्यमतोस्यागतईश्वरी॥ अथवक्ष्येधिकारायवीरशैवमतंपरं॥४२॥ वीरशैवमतस्थस्यग्रा
माद्बहिरवास्थितिः॥ भक्षार्थंप्रविशेद्ग्रामेग्रामेनिद्रांनचाचरेत्॥४३॥ नसेवेतस्त्रियंक्वापिनस्त्रीसं
गीषुसंगमं॥ नग्रामवार्त्तांशृण्वीतनसंगंप्रकृतंचरेत्॥४४॥ प्रवेशनेपिनासानंभिक्षार्थंसमयेगृहे॥
प्रकाशयेत्स्वयंमौनीशंखघंटादिभिस्फुटं॥४५॥ भैक्षार्थंगृहमाविश्ययदिभैक्ष्यंनलभ्यते॥ ननिर्विंनो
रोद्धिनिर्गत्यद्विवारंतद्गृहेपुनः॥४६॥ मौनीनियतचेष्टस्याद्दृनिरोधजन्तुष्मतां॥ नात्मनःकुलजननाम
चरेद्व्यर्थविश्रमात्॥४७॥ पूजाध्यानंतुमत्स्मरणामानिद्राकामलोभतः॥ व्रतानिवीरशैवस्यसत्यंप्रा
णिदयाशिवे॥४८॥ लिंगादिनाशादेवेनधारयेद्विधतःपुनः॥ यद्यशक्तोधिकारस्यतदूर्ध्वंगतधर्मणः
॥४९॥ भक्तस्यनष्टलिंगस्यवीरवीरव्रतात्मनः॥ विभावयेत्स्वकंदेहंलिंगरूपंमहात्मकं॥५०॥ भैक्ष्येणव
र्ततेनित्यंसंग्रहंनहिलिंगिनः॥ मौनिध्यानपरस्तिष्ठेदेकांतनर्जनेंविके॥५१॥ विशेषवीरशैवस्थसा

मधायमनोमुनिः॥प्राप्याधिकारानिर्विश्शोदूरवीरमते मम॥५२॥अनेनैथा भवदयं तेदेवि दुष्करखान्महासनः
॥वीरवीरमतस्यास्य भक्तस्यममशंकरी॥५३॥अथाधिकारीगच्छेत मतंममममहत्तरं॥तुर्यवीरमहाव्रतो
वमप्रमत्तोवशोस्सदा॥५४॥वनएववसेन्नित्यंमजनंग्रामसंगतिः॥नविशोन्नरंग्रामंगृहंवागृहमेधिनां॥
॥५५॥यदिभक्तिसमानीययद्योद्दैक्ष्यंमहेश्वरी॥नरुचिंनापि वासोरक्ष्यंचिंतयेन्नहितादहिजे॥५६॥न
पूजामवमानंवाननिंदामपिसंस्तुतिः॥निवसेध्याननिरताश्चेतायेद्बालकोयथा॥५७॥नस्त्रीणांवी
क्षयेदास्यं नकर्मश्रृणुयाद्वचः॥नसमाजेजनैरन्यैर्नर्मभासंचारमीश्वरी॥५८॥नतरेदापगांपूर्णांजलेन
स्पृष्टभूतले॥नचर्मपात्रमारोहेत्सहेवालिंगिभिस्त्वपि॥५९॥गच्छन्नपिपदान्नद्यांनातीतेस्तनमंडला
त्॥जलेनाशीतथापाथेयंनकुर्यात्स्वगृहंक्वचित्॥६०॥शयीतभूतलेखट्वांवर्जयेच्छयनेशिवे॥वसी
तवासःशिथिलंविवर्णंयद्यदीक्षति॥६१॥मुंडीजटीशिखीवापिकिर्णकेशोपिवाभवेत्॥यदिमुंडि

शिखीवास्याद्भ्यंगंस्वछयायदि॥६१॥जटायदि न कुर्वंति तैलाभ्यंगमपिक्वचित्॥ यदिपूर्वंजटाधारि न
पुनक्षौरमाचरेत्॥६३॥शिखियदिशिवेलिंगीकुर्यादभ्यंगमैछिकं॥नचर्मपात्रसंस्पृष्टंतैलंस्पृश्येन्महा
त्मकः॥६४॥नागस्योधर्त्तनंकुर्यात्नचग्रामंविशेदपि॥ननर्त्तनादिकंचित्रंमीक्ष्यदेकांततोवशेत्॥६५॥तु
र्यवीरमताविष्टोनिवसेदेवमीश्वरी॥अन्यथाभ्रश्यतेभूयोप्यंधःकूपेनसंशयः॥६६॥नतूर्यवीरशैवस्थः
कपटानृतवंचनं॥दंभंक्रोधंप्रणिपीडांकुर्यान्नेछककामनां॥६७॥नसंग्राहानभोगेछुर्नदेहेममतामपि॥
पूजांजनोद्वेजनंचमनसापिस्मयेक्वचित्॥६८॥तस्यैववर्त्तमानस्यतुर्यवीरमथार्थिनः॥यदिदैवेननश्येत
लिंगतस्यविधिंशृणु॥६९॥यत्नात्पुनःप्रामयंदियत्नेनसर्वशः॥तदेवहिपुनर्ह्यायंतत्राक्रमउच्यते॥७०॥स
हस्रंतुर्यवीरस्थलिंगिनोयोगिनोमम॥तदेवहिनिराभारंवीरशैवममांबिकः॥७१॥षड्रसैरन्नपानाद्यै
र्भोजयेत्प्रीतयेमम॥उपोष्यत्रिदिनंभक्त्याहोमंपूर्वोक्तमाचरेत्॥७२॥गुरवेदक्षिणांदत्वाततएनंचरेद्विधं

॥ मृगयि लापितं लिंगं लभ्यते न यदीश्वरी ॥ ७३ ॥ तदालाभं विनिश्चित्य त्यजेद्देहमतंद्रितः ॥ खड्गेनानशनेनापि
करीषेण भृगोगिरे ॥ ७४ ॥ प्रायोपवेशनीश्वासा सरोदनांबुनिपातनैः ॥ न तदूर्ध्वं क्षणं जीवेद्भ्रष्टलिंगी नष्टलिं
गिकः ॥ ७५ ॥ न खादेन्नपि बेद्वीक्षेन्निश्वासमपि धीमतः ॥ न संभाषेत्स वाक्कूरो स्य देहमोहेन मूढधीः ॥ ७६
॥ ध्यायन्हृदि पदांभोजे मद्रूपं स्याद्धुरोः शिवे ॥ कारयंति तथान्येयं साहाय्ये नापि लिंगिनः ॥ ७७ ॥ ते पियां
ति सुखाधारं पदं सर्वोत्तमोत्तमं ॥ तथा त्यक्त तनूतुर्य वीरशैवस्य योगिनः ॥ ७८ ॥ मद्रूपा एव जायंते यतः शं
भूरहं शिवः ॥ नादृशं पदमारुह्य तु तुर्य वीरव्रतात्मकं ॥ ७९ ॥ यदन्यथा चरेल्लिंगी भ्रष्टो भवति सूकरः ॥ न क्षेये तं
दुराचारं त्यक्तलिंगमतं व्रतं ॥ ८० ॥ विनिहन्युर्बलाद्न्ये ते समेयुः पदं मम ॥ न तस्य पुनरावृत्तिर्भ्रष्टस्य शिव
योगिनः ॥ ८१ ॥ रौरवान्नरकात्घोराद्यावदाभूतसंप्लवः ॥ तद्विधानेन संत्यज्य शरीरं तु तुर्यवीरकं ॥ ८२ ॥ तत्स्व
रूपं मथा प्राप्य मादृत्ते सतयो सदा ॥ अतो विचार्य मत्वेन तुर्यवीरमतस्थितं ॥ ८३ ॥ शालयेवा शयेद्देवि न शा

क्तो नैव संवदेत्॥ इदं रहस्य मज्ञात्वा वीरवीरादिषु स्थितं॥ ८४॥ मोहेन संत्यजेद्देहं दुर्मतेफलमश्नुते॥ अ
विषह्यनेकदुःखानि मत्स्वदं परमं सुखं॥ ८५॥ नशक्यते जनैर्यातुं देहमोहाभिमानिभिः॥ यावद्दुःखमिहा
भुंक्ते तावत्स सुखमेष्यते॥ ८६॥ मत्सेवाश्रमपुण्येन प्राप्यते मत्परं सुखं॥ देहं विनश्वरं नित्यं मृत्युवक्त्रगतं बुधः
॥ ८७॥ विज्ञाय तत्स्पृहां भक्त्या विधिमेव समुपाचरेत्॥ घ्राणं संतर्पणं गंधं समुपाजिघ्रनकंचन॥ ८८॥ भस्मानुले
पनं भस्मशायी स्याद्विजितेंद्रियः॥ तैलपुष्पान्नपानादि पक्वापक्वं यदिच्छति॥ ८९॥ स्पृशेद्द लिंगसंस्पृष्टेन
पक्वं सुतरं प्रिये॥ चित्ते बहिर्गते लिंगं पूजायां कालमुत्क्रमेत्॥ ९०॥ अन्यथांतर्गतो ध्यानमत्सराभ्यां न मामवहं॥
इति धिक् महेशानि विशेषो भेद एव वा॥ ९१॥ वीरशैवमते किंचि नास्ति नास्ति न संशयः॥ भक्त्यनस्माद्वै
राग्यतुर्यवीर्यमता खलः॥ ९२॥ न पूजयेत्पुनः क्वापि तुर्यवीरमते विशेत्॥ तत्र सिध्धस्य मद्भक्त्या सा मुक्ति
रखिलासका॥ ९३॥ ततः श्रुतस्य मूढस्य न कोपस एव हि॥ देहाभिमानमन्यस्य पीडनं देहिनं प्रियं॥ ९४॥ ए

कीकस्यविनिश्चिस्यमायश्चिलंशोतेरपि ॥ शास्त्रदृष्टिंगुरोर्वाक्यमात्मानोनिश्चियंत्वयि ॥ ९५ ॥ आत्मनोपिपरि
त्यज्यमद्भक्त्यामामुपाव्रजेत्तू ॥ इतितेकथितंदेविसर्वसारमनुत्तमं ॥ ९६ ॥ तुर्यवीरमतंसम्यक्किंभूयश्रोतुः
मिछसि ॥ ९७ ॥ इतिश्री पारमेश्वरतंत्रे ॥ वीरशैवभेदनिरूपणंनाम ॥ पंचदशपटलः ॥ १५ ॥ ॐ ॥ ॐ ॥
॥ ॐ ॥ ॐ ॥ ॐ ॥ ॐ ॥ ॐ ॥ ॐ ॥ ॐ ॥ ॐ ॥ ॐ ॥ ॐ ॥ ॐ ॥ ॐ ॥ ॐ ॥ ॐ ॥ ॐ ॥ ॐ ॥ ॐ ॥ ॐ ॥ ॐ ॥ ॐ ॥ ॐ ॥

श्रीगणेशायनमः॥श्रीसांबसदाशिवायनमः॥देव्युवाच॥जयशंकरविश्वेशजयशाश्वतविग्रहे॥
जनादिनिधनानंतनमस्तेहरशंभवे॥१॥उक्तंमेसकलंवीरशैवभेदागतंमम॥तद्देवांतरभेदश्चकथि
तोभवतानघ॥२॥नतत्रमेस्तिवक्ष्यांशसंशयोवामहेश्वर॥इतपृच्छाम्यहंप्रभ्वस्वसंदेहापनुत्तये॥३॥पा
रदादीनिलिंगानितत्प्रमाणंविकल्पकं॥तत्प्रमाणेनकथितंलक्षणंलिंगमानकं॥४॥यद्देहेछकंप्रमाणं
स्यात्तस्यमेकथयेश्वर॥शैलादिसर्वलिंगानामियदेवान्यदस्तिवा॥५॥ईश्वरउवाच॥साधुसाध्विसिभो
साध्वीसाधुरेषत्वयाकृतः॥प्रश्नोलोकोपकारायकथयामिशृणुप्रिये॥६॥मयिप्रियानसिश्रीमानु
भक्त्याशिष्यस्यहंतव॥तत्पृछामिप्रवक्तव्यमद्यमेपरमेश्वर॥७॥स्थिरंचरंस्थिरंचरंचरस्थिरमथां
बिके॥स्थिरंस्थिरंस्थिरचरंषड्विधंलिंगलक्षणं॥८॥क्रमेणलक्षणंतेषांवक्ष्यामिशृणुपार्वति॥यज्ज्ञा
त्वामुच्यतेसद्यःशिवयोगीशिवोभवेत्॥९॥देवालयेपाणिपीठेसंविधायाष्टबंधनं॥प्रतिष्ठितंशिला

लिंगंस्थिरंलिंगंतदुच्यते॥१०॥ पूजादर्शनसंसेवा ध्यानार्चाधिकसाधनं॥ स्थिरतत्सर्वभूतानांउत्तमंलिं-
गमीश्वरी॥११॥अथयच्चरमंन्येषामात्मानांधृतलिंगिनां॥ पंचभिःसहस्रंपूज्यमर्कोबगणपाच्युतैः॥१२॥गृ
हस्थितंभवेतेषांस्फाटिकंमरकतोद्भवं॥ शिलादिजंततोन्यद्वाप्रमाणंयत्तदेवहि॥१३॥लिंगंभवेस्थिरंचरंय
न्मद्भक्ततनूधृतं॥इच्छाप्रमाणंतल्लिंगंलक्षणंचतदेवहि॥१४॥यदानाद्यादिसामान्यज्ञानशैवांतवर्त्तिनां॥
त्रिभेदविरसंस्थानांविशेषंवाततःशृणु॥१५॥लिंगंसामान्यवीराणांचरस्थिरमनुत्तमं॥शारीरमेवलिंगं
यंलिगिनांतदुदाहृतं॥१६॥यदात्मनिधृतंलिंगंयच्छरीरमहात्मनः॥नतत्रभेदंकुरुते भक्तोलिंगात्मकंम
म॥१७॥यदस्तिलक्षणंदेहेयत्प्रमाणंच यादृशं॥ लिंगस्यलक्षणंचापिप्रमाणंचतदेवहि॥१८॥यद्वीर-
वीरशैवाख्येमतेममविवर्त्तिनां॥लिंगंचराचरंप्रोक्तं यश्चविश्वात्मकंमम॥१९॥चराचरमयंविश्वंलिंगंवि
श्वात्मकंमम॥वीरवीरमताविष्टमतंलिंगंसमाचरेत्॥२०॥सर्वलिंगमयंचेतत्सर्वलिंगेप्रतिष्ठितं॥तस्मा ॥ १ ॥

लिंगिभिर्वयेद्देमां पञ्चक्चनशाश्वतं॥२१॥प्रपंचलिंगदेहेषु नभेदंकुरुतेसुधीः॥वीरवीरमताविष्टोमद्भक्तःपर
मेश्वरी॥२२॥जगच्छरीरंलिंगस्यजगतोलिंगमात्मनः॥लिंगस्यजगतोदेहशरीरंविद्धिमन्मते॥२३॥तदेक
भावनायत्तं सेवेत्मामखिलेश्वरं॥जगल्लिंगात्मदेहेषु वीरवीरमतस्थिताः॥२४॥तुर्यवीरमतस्थस्यतुर्योहंप
रमेश्वरः॥लिंगमस्मिन्महेशानि सोहंभावेनभावयेत्॥२५॥अहंसर्वमयंलिंगंसर्वात्मासर्वदृक्शिवः॥धृतः
लिंगशरीराभ्यांसहतुर्यप्रवर्त्तिनः॥२६॥जगद्विसुक्ष्मणंमत्तःपश्येन्ममममहेश्वरी॥ममात्मानंहिजगतःसर्वमे
कंहिविभावयेत्॥२७॥यत्रयत्रमनोयातिगोचरीकुरुतोचयेत्॥तत्रसर्वत्रतत्सर्वंमद्रूपमुपधारयेत्॥२८॥न
भेदबुद्धिंकुर्वीतसमाधमगुरुष्वपि॥स्पर्धासूयातिरस्कारान्नकुत्रापिस्मरेध्रुवं॥२९॥नतस्यपात्रनियमःसं
कल्पार्पणमेववा॥नदेशकालनियमोनान्यपेक्षास्तिपूजने॥३०॥स्वयंनपूजयेत्पुष्पैर्हिरर्चयेद्दात्मनात्मनि
॥आत्मानमखिलात्मानमात्मानंमामहेश्वरी॥३१॥यद्दिपात्राणिचास्वाद्यपूजितंमांसमीहते॥लिंगांकिता

निपात्राणि पीठं वस्त्रादिकं तथा ॥ ३२ ॥ अलिंगं विन्हितं पात्रमलिंगीस्पृष्टमेव च ॥ अलिंगिनोपनीतं यद्वर्जे
येन्मम पूजने ॥ ३३ ॥ पूजाकाले मम श्रीवे लिंगपूजनमर्चनं ॥ पूजोपकरणं चापि नैव लिंगी विलोकयेत् ॥ ३४
॥ विहाय पारहंसालग्रामजं लिंगयुग्मकं ॥ तथा स्वयंभुलिंगं च बाणलिंगं तथैव च ॥ ३५ ॥ रत्नादिनिर्मितं·
लिंगं मृण्मयं तु तथैव च ॥ अन्यस्य लक्षणं वक्ष्ये प्रमाणं च शृणु प्रिये ॥ ३६ ॥ पंचसूत्रप्रमाणेन विमानितम
कल्मषं ॥ अभिन्नं कांतिमल्लिंगं पूजार्थं मम कल्पयेत् ॥ ३७ ॥ यावत्प्रमाणिकं पाणिपीठमादौ ससूत्रतः ॥
तावद्देवोपरि भवेत्तदर्धं मध्यतो भवेत् ॥ ३८ ॥ औन्नत्यं तावद्देवस्यादौन्नत्यादर्धमानकं ॥ लिंगं च सामसूत्रं च·
दैर्घ्याहै पुण्यमीश्वरी ॥ ३९ ॥ ज्ञानप्रदं शुक्लवर्णं रक्तवर्णं तु वश्यकं ॥ नीलं शत्रुविनाशाय पीतमिष्टार्थसि
द्धये ॥ ४० ॥ श्यामं सर्वार्थदं प्रोक्तं मम लिंगं महत्तरं ॥ देहविश्वासलिंगानां न प्रमाणं न लक्षणं ॥ ४१ ॥ सर्व·
नाशाय दुःखाय लिंगमेयच्छिकालने ॥ धृतं त्विह परिन्नापि ह्यप्रमाणमलक्षणं ॥ ४२ ॥ इत्थं विचार्य लिंगस्य

मतस्यचपरस्परं॥लक्षणंचप्रमाणंचशास्त्रश्चैवन्यविशेन्मम॥४३॥सतुतेनैवदेहेन विशेन्मयिभक्तिमान्॥
॥अन्यथास्वार्थविभ्रष्टो निपतेद्घोरखेर्णवे॥४४॥नयथेच्छं चरेद्भूमौ न किंचित्स्वार्थयेत्हृदि॥नासनिष्ठांस्त
जेत्क्वापि प्राणेःकंठगतैरपि॥४५॥नलोलुपः स्याद्विषयेनसेवेद्विषयंक्कचित्॥नस्त्रियंमानसापीहेन्न
वमन्यंतकंचन॥४६॥नजानातिभेदमन्विष्येन्नतद्वेषसमाचरेत्॥ननिंदिनेस्तुनेक्वापिगुणदोषौतुकुत्रचि
त्॥४७॥अपक्कामपिपक्कंवा नालिंगीस्पृष्टमाचरेत्॥सर्वलिंगासमानीत मुपकल्पतन्तु स्थिता॥४८॥प्रमा
दालस्यनिद्राभिनातिक्रामेद्दिनेहसे॥क्षणेवापिभ्रमत्तस्यानवीरशिवसंमतः॥४९॥नाधीयितानिशास्त्रा
णिवेसवादीनिसुंदरी॥समन्मतोचितंशास्त्रमवबोध्यंगुरोर्मुखात्॥५०॥नेहामुत्रफलंकांक्षेन्नाहंमतिमुप
श्रयेत्॥निजगुप्तां भयंलोभंवीरशैवमतेस्थितः॥५१॥नत्रापिवीरतुर्यस्थदेहिनामहमेवहि॥तन्नाममान्यं
नद्वेष्यंयदहंसकलंजपेत्॥५२॥सर्वत्रसर्वदासर्वात्मनोभेदमाश्रितः॥वीक्ष्येन्ममस्यबहितोबहिरेवंव्रतो॥

भवेत्॥५३॥एकांतेनिवसेनित्यमर्चाध्यानसमाधिभिः॥योगज्ञानानुचिताभि रादरान्मांसमर्चयेत्॥५४
॥नवासंकुरुतेग्रामेनपाषांडीभवेत्क्वचित्॥नबह्वाहारमिछेत्तुर्यवीरव्रतस्थितः॥५५॥नक्रोधंनचमात्स
र्यंनवैषम्यंनवैरं॥नबहिःकुरुतेतस्थप्राणेषूच्यावचेष्वपि॥५६॥यावन्नस्त्यभिमानोमेलिंगेदेहेमते·
मम॥तावानेवभवेदेवि जगत्यपिचराचरे॥५७॥सदालिंगीभवेन्मौनीतुर्यवीरव्रतस्थितः॥नवीक्ष्ययेः
द्रूतःक्रूरेपतिपक्षेपिदुर्जने॥५८॥इत्थमुक्ताधिरुद्दिष्टोतुर्यवीरप्रवर्त्तिनः॥लिंगनाशेसहेतेनदेहत्यागे॥
विशेषतः॥५९॥इत्थमुक्तोधिकारीयेस्तुर्यवीरव्रतंश्रयेत्॥वंशोन्नचान्यथाक्वापिसुखदुःखस्यचक्षयः॥
६०॥अज्ञात्वेतन्माहाशास्त्ररहस्यंश्रीगुरोर्मुखात्॥अबोधयित्वाशिष्यंयःभ्रष्टोतावत्सुभौशिवे॥६
१॥अनादिशैवमारभ्यवीरवीरमतांतरे॥लिंगनाशेपुनर्धार्यंतुवीरस्यजेत्तनुं॥६२॥अन्यसंसज्यनरके
शरीरेनिपतेध्रुवं॥असंसज्यतुरीयोपिप्रपतेन्नरकेध्रुवं॥६३॥अज्ञाननीतिबोधायहंतिशिष्यायतो

गुरुः॥ शिष्योपेतं निहंत्येते द्रहस्यं श्रीगुरोर्गुरुं॥ ६४॥ शास्त्रेण गुरुवाक्येन यथावत्सं प्रवर्तिनो॥ मम लोके निव
सितः स शिष्यः स गुरुः शिवे॥ ६५॥ तादृशं तु तुर्यवीरस्थं मद्रूपं शिवयोगिनं॥ प्रणवेत्सु परे सर्वे तेष्वयं नैव कंच
न॥ ६६॥ नोतिष्ठेन्नाभिवंदेत तुर्यवीरव्रतस्थितः॥ यतः स्तुरीयः सर्वेभ्यो भक्तोमत्तोपि चाधिकः॥ ६७॥ विन
याभवतुर्यस्थः प्रणवेन्न परस्परं॥ गुरुं मम अखिलाधीशमन्यकं चन लिंगिनं॥ ६८॥ नावमन्येत तं मूढं तु
र्यवीरव्रते स्थितः॥ अतऊर्ध्वंगतिर्भ्रष्टः प्रपतेत्स्यात् परे रवे॥ ६९॥ यदि भक्तिर्भवेछक्ति रर्चयेत्क्षणमेदपि॥
कुर्याच्छुश्रूषणं तस्य स्वयं मुक्तो भवेद्ध्रुवः॥ ७०॥ दर्शनस्पर्शनालोपसेवापूजादिभिः प्रिये॥ स्वयं च संचरेत्क
ष्टं तुर्यवीरस्थलिंगकः॥ ७१॥ जीर्णखर्परकंथाद्यमपि पश्यं दिगंबरं॥ यदृच्छया वतुर्यस्थो भक्तो मुच्येत कि
ल्बिषात्॥ ७२॥ उदासीनत्वात्तुर्यस्थमनुत्थायमनं शठः॥ शतवंशास्समोपेत प्रपतेद्घोरवार्णवे॥ ७३॥ यदृ
छेन्ममसायुज्यमनयासेन बुद्धिमान्॥ यथाशक्त्या र्चयेत्तुर्यवीरशैवव्रतेश्वरं॥ ७४॥ पत्रं पुष्पं फलं तोयं

॥पार·तं·॥ मन्नपानांशुकादिकं॥भक्तानिवेद्य।तुर्यस्थेस्वल्पमक्षयतांव्रजेत्॥७५॥निमिषंनिमिषार्धंवायत्रोपविशतेः ॥अध्या॥·
॥४॥· क्वचित्॥तुर्यवीरव्रतोविद्धितन्ममालयमीश्वरी॥७६॥तद्दृष्टिपथगंसर्वमनवद्यंनसंशयः॥अशुध्धमपित· ॥१६॥·
शुद्धं यत्तुतुर्यास्यहंशिवः॥७७॥मौनंभिक्षाटनंभक्तिपूजाध्यानमनुस्मृतिः॥अकिंचनत्वंनिर्बाधोवास·
श्चविजनेवने॥७८॥अलक्ष्यत्वंयथागारेअन्याहिंसनमादरः॥विरक्तिःशांतिरन्विताकामलोभादिवर्जनं
॥७९॥अग्रामावेशनंशत्त्याचासंचासंग्रहउदारता॥समाधिरासनंनिष्ठंसमत्वंप्रियविप्रिये॥यच्छेयाधैर्यं·
संत्यागमोधृत्यमपिसंपदि॥८०॥इत्यादिलक्षणोपेतंसनाराभारवीरगं॥मानवामानयोरेकरूपमाल्यविव
र्जितं॥८१॥स्तुतिस्मरणपूजाचध्यानादौममतत्परं॥यदृच्छयोपिपन्नेचनिरपेक्षमतंद्रितः॥८२॥भावयं·
तमिदंविश्वंअथभेदेनचात्मना॥तादृशंतुर्यवीरस्थमर्चमित्वात्स्वशक्तितः॥८३॥भक्त्यासंतोषमतिमा
नूममलोकेचिरंवसेत्॥आगच्छंतंसमालोक्यगृहणागृहमेधिनां॥८४॥शिवेतद्दृढंराजासर्वेचीरशेव- ॥८॥·

स्थलिंगिनः॥मुह्यान्त्यंतिगायंतिवयंधन्यतमाइति॥८५॥यदास्मद्रंश्या भवनमियदेकोर्चयेत्कचित्॥
करिष्यसवलोकंवा पतेत्सादरंजोगणे॥८६॥इतिप्रमुदितादेविभवंतिपितरोखिलः॥वीरसामान्यशैवस्थ
पूजनातस्ययस्फलं॥८७॥यदर्चयेद्भक्त्याचतुर्यवीरव्रतंसमं॥समुध्दृत्यान्ववंशातंदुःखासूर्वापरानपि॥८
८॥सर्वक्लेशाविनिर्मुक्तोममलोकेमहातले॥यदिभक्त्याविधानेनतुरीयंवीरशैवगं॥८९॥यथाशक्त्या
र्चयेदन्नापानाद्यैरपिसुंदरी॥प्रत्युत्थानाभिगमनंवंदनंप्रियभाषणैः॥९०॥पदसंवाहनैःशांतिवि
श्रामैर्व्यजनादिभिः॥शुश्रूषणंतदुक्तार्थकरणंपरमायया॥९१॥अनीयतप्रियंदद्यात्इत्याद्यैर्गृहमेधि
नः॥पशुपुत्रासुखायाश्रीसत्ततेजोबलान्विताः॥९२॥भुक्त्वेहसकलान्भोगान्अंतेमद्भावनालया॥योनिं
दत्यवजानंतितुरीयंवीरशैवगं॥९३॥निर्दहत्यवंशात्सहस्रंपच्यंतेनरकार्णवे॥सुखेनसुखभोगेछा
यद्यस्तिगृहमेधिनां॥९४॥लिंगिनांशिवभक्तानांमर्चयत्तुर्यवीरगं॥निष्ठेलिंगेप्रमादेनतुर्यवीरव्रत

वा

स्थित:॥९५॥ सजेत्तत्क्षणमात्मानंतस्यात्मामुक्तिरीरिता॥ यद्यन्येलिंगिनोमूढवीरवीरादिपूर्वका:॥९६॥
इमंविधिमविज्ञायत्यक्त्वात्मानंपतंतिते॥ विचार्यस्वगुरोर्वक्त्राधीमताहितमंत्रित:॥९७॥ गुरुशास्त्रो
क्तविधिनाचरन्सुखमुपैतिस:॥ सर्वोपिनियमोदेवितुर्यवीरव्रतस्यहि॥९८॥ सर्वस्यागोपतस्यैवंद्यंगत्व
मविशेषत:॥ किंवर्णितेनबहुनाशृणुमेनिश्चितंप्रिये॥९९॥ सिध्धांतमंत्रवक्ष्यामिसारंममव्रतोद्भवं॥ नतु
र्यवीरव्रतधर्मत: परंव्रतंतपोयोगसमाधयेपिवा॥१००॥ सुखेनमत्प्राप्यएतदन्युत्तरधोधदु:खागतये
नचेतरेत्॥ इतितेकथितंदेविवीरशैवमतांतरं॥१०१॥ अपिरहस्यंनभीत्येकिंभूय:श्रोतुमिच्छसि॥१०२॥
इतिश्रीपारमेश्वरतंत्रेवीरशैवभेदनिरताभारवीरशैवाचारषड्विधलिंगनिरूपणंनामषोडशपटल:॥१०
॥१६॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥

श्रीगणेशायनमः॥ देव्युवाच॥ सर्वज्ञसकलाधारकामारेकरुणार्द्धव॥ पाहिशंकरपापारे भक्तार्त्तिभय त्ति
नाशन॥ १॥ वंदे लोकोपकारायवीरशैवविशेषकं॥ इतःपरतरंकिंवा चास्तिचेद्ब्रूहिमेविभो॥ २॥ ईश्वरउवा
च॥ साधुसाध्विमहाभागेवक्ष्यामिशृणुसुव्रते॥ रहस्यं गोपनीयंहितवस्नेहेनसुंदरी॥ ३॥ शुध्धशैवंमिश्र॰
शैवंमार्गशैवंतृतीयकं॥ चतुर्थंवीरशैवंचपंचमोवांतरस्तथा॥ ४॥ तत्रतत्रविभेदेनजातिभेदेनकेनचित्॥
वर्ततेलिंगिनोदेविजातिकर्मसमाश्रिताः॥ ५॥ ब्राह्मणावीरशैवस्थाशिखायज्ञोपवीतिनः॥ लिंगरु॰
द्राक्षभस्मांकाब्रह्मकर्मसमाश्रिताः॥ ६॥ शिवाचाररतानित्यंलिंगपूजापरायणाः॥ शिवाराध्याःस॰
दादेविममातिप्रियकारिणः॥ ७॥ शुध्धशैवासमाख्यातागृहस्तागृहणीयुताः॥ मिश्रशैवामहादेवि॰
क्षत्रियावैश्यशूद्रजाः॥ ८॥ सुशीलाचारसंपन्नाशीलवंतश्चलिंगिनः॥ लिंगार्चनपरानित्यमन्नदानप
रायणः॥ ९॥ अन्नदेवानमरूस्यतीर्थयात्रादयस्तथा॥ तंतंकुलाचाररतागुरुभक्तिरताशिवे॥ १०॥ शू तत्तकु

॥पा॰तं॰॥ द्रा दिभेदजातीनां जाति कर्मानुवर्त्तिनः॥ एते वै मित्रसेवाश्च मिश्रकर्मसमासुतः॥११॥ मार्गसेवानुप्रवः ॥अध्या॥
॥१॥ क्ष्यामि सामासाच्छृणु॰ पार्वति॥ पुत्रमित्रकलत्रादि सहितावि भवान्विताः॥१२॥ द्विधैवाराधन ॥१७॥
परा राजानो लिंगिनः परा॥ रक्षणं सर्ववर्णानां युध्धे शत्रुवधस्तथा॥१३॥ दुष्टपक्षिमृगाणां च दुष्टानां
शासनं नृणां॥ अविश्वासश्च सर्वत्र विश्वासः शिवयोगिषु॥१४॥ स्त्री संसर्गादि कालेषु च मूरक्षण॰
मेव च॥ सदा संसारिते चारे लौकवृत्तांतवर्हनं॥१५॥ सदा स्त्रभरणं चैव भस्मकंचुकधारणं॥ गजाश्वरो
हणं देवि देवब्राह्मणपूजनं॥१६॥ दानानि शिवभक्तेभ्यो ब्राह्मणेभ्यो विशेषतः॥ राज्ञां शिवागमा ३
स्थानामेष धर्मः सनातनः॥१७॥ बहवो मार्गशैवाश्च वीरशैवानुवर्त्तिनः॥ शैवभेदेषु चान्येषु वीरशै
वोत्तमोत्तमः॥१८॥ तत्रापि बहवो देवि भेदाः संति निशामय॥ केचिद्भजंत्यन्यदेवं केचिन्नेच्छति पार्व॰
ति॥१९॥ केचिद्विवाहमिच्छंति केचिन्नेच्छंति शैवजे॥ स्त्रियस्तु लिंगधारिण्यः पुरुषा विष्णुसेवकाः ॥१॥

॥२०॥पुरुषालिंगिनः केचिद्वैष्णव्यस्तुस्त्रियस्तथा॥तयोरहंगतिश्चैवमस्त्रीतिरुभयोःसमाः॥२१॥
शिरोमुंडस्कखेमंत्रःकंठेरुद्राक्षधारणं॥काषायांबरधारीचभस्मोध्धूलनसंयुतः॥२२॥लिंगपूजा-
सदादेवितेचैवांतरसेविनः॥अलिंगीस्पृष्टमन्नंचभुंजतेलिंगधारिणः॥२३॥जलपानंचसर्वत्रमहा
शैवाहिपार्वति॥लिंगार्चनसदादेवि भस्मरुद्राक्षधारिणः॥२४॥षडक्षरजपंतेषांह्यनुशैवाप्रकीर्ति
ताः॥नापिकारजिकावेश्याकुलालास्तिलघातकाः॥२५॥वेश्याद्याश्चांत्यजस्यंतास्ते वैचांतरसेविनः शै
॥ज्ञानिनःकामरहिताःनित्यभिक्षान्नजीविनः॥२६॥किमत्रबहुनोक्तेनतुर्यवीरोत्तमोत्तमाः॥वि-
रक्ताश्चविरागाश्चतेसर्वेवीरशैविनः॥२७॥येचरंतिसदादेवितेवचरगणास्मृताः॥विरक्ताज्ञानसंप-
न्नास्तुशीलाचारशीलिनः॥२८॥तेविरक्तासमाख्यातलिंगिनःसंगवर्जिताः॥अथवक्ष्यामिगि-
रिजेशिवतत्वानिवैशृणु॥२९॥पंचभूतानितन्मात्रापंचकर्मेंद्रियाणिच॥ज्ञानकर्मविभागेनपंचपंच

विभागशः॥३०॥खगादिधातवः सप्त पंचप्राणादि वायवः॥मनश्चाहंकृतिः ख्यातिर्गुणाः प्रकृति पूरु
षाः॥३१॥रागो विद्याकलाचैव नियतं काल एव च॥ मायाच शुध्ध विद्याच महेश्वरसदाशिवौ॥३२॥
शक्तिश्च शिवतत्वानि प्रोक्तानि क्रमशः शिवे॥क्षमाशांतिश्च संतोषः सत्यमास्तेय एव च॥३३॥ब्र
ह्मचर्यं शिवज्ञानं वैराग्य भस्मसेवनं॥सर्वसंगनिवृत्तिश्च दशैतानि विशेषतः॥३४॥विरक्तानां च स
र्वेषां विधिरेष उदाहृतः॥श्रीदेव्युवाच॥भगवन् श्रोतुमिच्छामि शिवाश्रमनिषेविनां॥३५॥शिवशा
स्त्रोदितं कर्म नित्यं नैमित्तिकं शिवं॥ईश्वर उवाच॥प्रातरुत्थाय शयनात् ध्यात्वा देवं सहांबया॥३६॥
विचार्य कार्यं निर्गच्छन् मदाद्भुदिते रुणे॥अबाधे विजने देशे कुर्यादावश्यकं ततः॥३७॥कृत्वा शौचं वि
धानेन दंतधावनमाचरेत्॥अलाभे दंतकाष्ठानि जंबुनिंबाम्रपल्लवैः॥३८॥कुर्याद्द्वादशगंडूषैर
पामार्गविशोधनं॥मुखमाकर्णपर्यंतं हस्तयोरलिमात्रकं॥३९॥पादमाजानुपर्यंतं मुखं प्रक्षालनं

स्मृतं॥ अस्संतमलिनेदेहेवारुणंस्नानमाचरेत्॥ ४०॥ नद्यांवादेवखातेवाह्रदेवाथमठेपिवा॥ आर्द्र
वस्त्रेणवाभस्मस्नानमीश्वरचिंतनं॥ ४१॥ पूर्ववस्त्रंपरित्यज्यशुद्धवस्त्रंधरेत्ततः॥ अथचेद्वारुणं
कर्तुमशक्तःशुद्धवाससा॥ ४२॥ आर्द्रेणशोधयेद्देहमापादतलमस्तकं॥ शिवचिंतापरंस्नानंयस्य
स्यात्सोयमुच्यते॥ ४३॥ शिवाग्निभस्मसंगृह्यपरार्ककशुचिगंधिच॥ कपिलापरारूच्छस्तंगृहीतं
गनेपतत्॥ ४४॥ निक्लिन्ननातिकठिनंनदुर्गंधनचोपितं॥ उपर्यधपरित्यज्यगृह्णीयात्पतितंशि
वे॥ ४५॥ पिंडीकृत्यशिवाग्नादौतत्क्षिपेत्मूलमंत्रतः॥ अपक्कमपिपक्वंचसंत्यज्यभसितंशितं॥
४६॥ आदायावसिसालोड्यभदेविविनिक्षिपेत्॥ तमेदंशोशुभेशुध्धेधनवद्भस्मविक्षिपेत्॥ ४
७॥ तेजसंदारवंवापिमृण्मयंमेंकाल्सजे॥ विन्यसेत्मूलमंत्रेणपात्रेभस्मविनिक्षिपेत्॥ ४८॥ अ
न्यद्वाशोभनंशुध्धंभस्मपात्रंप्रकल्पयेत्॥ तैजसंदारवंवापिमृण्मयंमेनकाल्सजे॥ ४९॥ प्रस्थितोभ

न

स्म गृण्हीयात् स्वयंवानुचरोपिवा॥ नचाशुक्ककरेद्यान्नेवाशुचिकरेक्षिपेत्॥५०॥ नजस्पृशेतनीचा
नैर्नापेक्षितनलंघयेत्॥ एवंशिवागमरुतो भस्मसाधनमाचरेत्॥५१॥ सकलीकृत्यतद्भस्मशिवपं
चाक्षराजपेत्॥ अग्निरित्यादिकैर्मंत्रैः षड्भिराथर्वणोदितैः॥५२॥ क्रमात्समृज्यचांगानिमूर्धादिचर॰
णावधि॥ ततः पूर्वक्रमेणैवसमूद्धुल्यचभस्मना॥५३॥ सर्वांगोधूलनंकुर्यात्प्रणवेनशिवेनवा॥ तत
स्त्रिपुंड्रं देवेशिअर्चयेन्मूलमंत्रतः॥५४॥ शिवभावंसमभ्येत्यशिवयोगमथाचरेत्॥ कृत्यमित्येवनिष्का
मो यश्चरेद्धीरशेविनः॥५५॥ शिवार्पितात्ससततंनतेनसदृशंक्कचित्॥ भस्मछन्नंसएवाहं महापात॰
किकोपिवा॥५६॥ पापैर्विमुच्यते सद्योमुच्यतेचभवार्णवात्॥ रुद्राग्नेर्यस्सरंवीर्यंतद्भस्म परिकीर्तितं॥
५७॥ तस्मात्सर्वेषुकालेषुवीर्यवान्भस्मसंयुतः॥ भस्मसंदिग्धसर्वांगो भस्मदीप्तत्रिपुंड्रकः॥५८॥ भ
स्मशाईचपुरुषो भस्मनिष्ठइतिस्मृतः॥ भूतप्रेतपिशाचाद्यारोगाश्चातिविदुःसहा॥५९॥ भस्मनिष्ठस्य

सान्नि ध्यद्दिशावंतिदिशोदृशा॥भासिकं भासितं प्रोक्तं भस्मकल्मषभक्षणात्॥६०॥भूतिर्भूति-
करंयस्माद्रक्षाद्रक्षकरीयतः॥किमत्रबहुनोक्तेन भस्ममाहात्म्यकारणात्॥६१॥व्रतीचभस्म-
ना स्नाति सोहमेवनसंशयः॥परमास्त्रंचदेवानां भस्मैतदहमेवहि॥६२॥रुद्राक्षमालाभ-
रणे भाले भस्म त्रिपुंड्रकं॥मुखेमंत्रोगलेलिंगंवीरमाहेश्वरःशिवः॥६३॥जटिमुंडीशिखीवा-
पिकीर्णकेशो दिगंबरः॥भाले भस्मगलेलिंगंरुद्राक्षाभरणान्वितः॥६४॥शिव पंचाक्ष-
रीयुक्तः सोहमेवमहेश्वरं॥विन्यकाषायवसना निर्लज्जश्चदिगंबरः॥६५॥वल्कलीवाभ-
वेदंडीकुंडीकोपीन पात्रवान्॥यत्रयत्रमनोवापिसतत्रविहरेत्सुखं॥६६॥यत्र यत्र मनोर-
म्य मठे वामंडपेथवा॥वनेवासुखस्वासीनः शुध्धवस्त्रसमावृतः॥६७॥पाणौलिंगप्रति-
ष्ठाप्य पाणिमंत्रेण मंत्रितं॥लिंगंशुध्धजलैस्नाप्यशिव पंचाक्षरंजपेत्॥६८॥हस्ते पद्मंच-

संभाव्यतन्मध्ये पूजयेच्छिवं॥देवीचलिंगनालेतु ध्यात्वापुष्पाक्षतादिभिः॥६९॥पूजयेद्योगिनः
सम्यक्षोडशैरुपचारकैः॥पूर्वोक्तनैवसंपूज्यक्षीरतोयाशनैरपि॥७०॥निवेद्यभक्तिसंयुक्ता
विरक्तावीरशैविनः॥त्रियंबकेनमंत्रेण धारयेद्भक्तिपूर्वकं॥७१॥एवंपूजार्चनिर्वृत्यभिक्षाट॰
नमथाचरेत्॥भिक्षाहारीनिराहारीभिक्षान्नंनप्रतिग्रहः॥७२॥नित्यभिक्षान्नभोजीचउपवा
सफलंलभेत्॥प्रत्यहंचंद्रवारेवाकर्थंहंडंसमन्विता॥७३॥वीरक्रमागतंज्ञात्वा गृहीत्वान्नज
लादिभिः॥नमस्कृत्यादरादद्याच्छिवएवगतास्वयं॥७४॥घटोवाजयघंटोवा हंड घंटादिसंयु
तः॥प्रेरयित्वारवैर्भक्तमेनकेनापिशङ्कितः॥७६॥तस्यान्नंभक्तिसंयुक्तोदद्याछंकररूपिणः।
॥एवंपूर्वाण्हकालेतुविचरेद्वीरशैविनः॥७५॥वीरशैवमतंदेविदेहपातांतमाचरेत्॥कृत्यमि
त्येवनिष्कामयश्चरेद्वीरशैवकः॥७७॥ममार्पितात्मसततंनतेनसदृशःक्वचित्॥हित्वाभिक्षा ॥४॥

ज्ञानं चैव सदा लिंगार्चनं तथा ॥७८॥ वीरमाहेश्वराणां तु इदमेव विशिष्यते ॥ सायान्हे लिंगपूजां
च शिवपंचाक्षरीजपः ॥७९॥ शिवलीलाकथालापसहवै माहेश्वरो जनः ॥ शिवार्थदेह संतोषस्त
पः कृच्छ्रादि मानवः ॥८०॥ शिवार्चाकर्मविज्ञेयं बाह्यं यागादिनोच्यते ॥ जपः पंचाक्षराभ्या
सः प्रणवाभ्यास एव वा ॥८१॥ रुद्राध्यायादिकाभ्यासो न चान्मध्ययनादिकं ॥ ध्यानं शिव
स्यरूपादि चिंतनात्मादि चिंतनं ॥८२॥ य एवं वर्त्तते योगी स वै माहेश्वरोत्तमः ॥ अष्टधा लक्ष
णं देवि शिवधर्माधिकारिणः ॥८३॥ शिवभक्तेषु वात्सल्यं पूजायां चानुमोदनं ॥ स्वयमभ्य
र्चनं चैव तदर्थं चांगचेष्टनं ॥८४॥ तत्कथाश्रवणे भक्तिः स्वरनेत्रांगविक्रिया ॥ शिवानुस्मर
णं नित्यं सर्वदा तदेकेतवं ॥८५॥ एतदष्टगुणं चिन्हं यस्मिन्म्लेछेपि दृश्यते ॥ स एवातिप्रियो भ
क्तो मम योगी स एव हि ॥८६॥ इति तेकथितं देवि कार्यकर्मानुवर्त्तिनां ॥ शिवाश्रमयुतानां च

किं भूयश्श्रोतुमिच्छसि॥८७॥इतिश्रीपारमेश्वरतंत्रेशिवाद्वैतसिध्धांतेवीरशैवब्राह्मणनिरूपणं
नामसप्तदशपटलःसमाप्तं॥१७॥श्रीसांबसदाशिवार्पणमस्तु॥श्रीरस्तु॥श्रीशिव॥श्रीशंकर॥

श्रीगणेशायनमः॥श्रीशं वंदे॥अथामृतयागविधिवृत्तः॥राजेशेकरायदेवराजएवधारिणे॥तेजसेसु
खायसच्चिदेनपावृतात्मने॥नेजतेपरात्परायनिर्मलायचेतसावाजिनेसदोंनमःशिवायशंकरायते॥१॥
देव्युवाच॥चंद्रशेखरविश्वात्मन्सर्वदृक्सर्वदृगीश्वरः॥उक्तवानसिसर्वंमेवीरशैवमतक्रमं॥२॥श्रुतंत्व
धिगतंदेवमहत्स्यंमतसंभवं॥इदानींश्रोतुमिच्छामियागंनिर्याणसंज्ञितं॥३॥नृषुलिंगीषुजीवत्सुकर्त्तव्य
मुदितंत्वया॥तेषांनिर्याणसमयेप्राणिनांक्रियतेनुकिं॥४॥तेनवान्येनविश्वेशभक्तिशिष्यसुतादिना
॥निर्यातेलिंगिनोदेहंकिंवाकार्यमतःपरं॥५॥एतन्मेश्रद्धानायश्रोतुमादरतोवद॥यथत्वालिंगिनःस
र्वेभवध्यानपरास्तथा॥६॥ईश्वरउवाच॥शृणुदेविप्रवक्ष्यामियागंनिर्यागसंज्ञकं॥लिंगिनाममभक्तानां
मसदप्राप्तिसाधनं॥७॥रोगेनपीड्यतेदेविजगस्यप्राणसंशये॥लक्षणेरात्मबुध्यावानिश्चित्यभिषजा
मृतं॥८॥विहायलौकिकींदृष्टिंदेहपुत्रधनादिषु॥भोगशांचपरित्यज्यध्यायेन्मामेकमीश्वरं॥९॥यदिदे

हबलंतस्यचोपविष्टुंस्कखासने॥पूर्ववस्त्रादिसंत्यज्य धारयेत्शुद्दमंबरं॥१०॥ भस्मोध्दूलितसर्वांगं धृतरुद्रा॰
क्षमालिकः॥भक्त्यासंपूजयेलिंगं पूर्ववत्प्रियतःशिवे॥११॥ मौनध्यानसमायुक्तोनिविश्यस्वस्तिकास॰
ने॥हस्तांबुसंगअध्याय नासाग्रेन्यस्तवीक्षणः॥१२॥ श्रृंगाटकेभ्रुवोर्मध्येहृद्दलांबुहृजेोत्तमे॥ध्याय
न्मासंस्मरन्नाम मनसावचसाहृदं॥१३॥लिंगंनिक्षिप्यवदनेयहनोछिष्टभावना॥सज्जिकादियथा
नेचधृत्वलिंगकरेणवा॥१४॥ यदिहस्तेनधृत्वातु ध्यायेनमामेकमीश्वरं॥चतुर्भुजमुदारंगंशांतंसर्वात्मकं
शिवं॥१५॥वराभयत्रिशूलेनपोतभास्तकरांबुजं॥ध्यानाशक्तौतुगिरिजे स्मरेच्छिवस्मरेतिमां॥१६॥शायि॰
त्वापिस्मरेच्चित्तेत्वशक्ताउपवेशने॥किमत्रबहुनादेवि भक्त्याभक्त्याधियाधिया॥१७॥ देहनिर्याणसमये
स्मरन्नामेतिमांमम॥ततोविनिर्गतेलिंगंशरीरेचलिंगधारिणां॥१८॥ भक्तःशिष्योपिपुत्रोवाकुर्यात॰
स्योर्ध्वदैहिकं॥स्नात्वाभूमिजलेदेविसचेलकमतंद्रितः॥१९॥ स्वयंविधायलिंगस्यपूजांपूर्ववदाचरेत्॥वि

भूतिछिन्नसर्वांगोरुद्राक्षमणिधारकः ॥२०॥ बहुदकेनशुध्धेन स्नापयेल्लिंगिनस्तनुं ॥ पंचाक्षरेणमंत्रेणत्र्या
तरुद्रानुकाकतः ॥२१॥ रोद्रैरन्यैर्महास्तोत्रैर्महतोलिंगिनः परे ॥ चतुःपंचारशाष्टौवा यथाबंधुसमृध्धितः ॥
२२॥ एकमाद्दिसहस्रांतैरभिषिच्य घटोदकैः ॥ गुरोर्वधस्य वाज्ञस्य भक्तस्यसुधयोमम ॥२३॥ पादोदकेन
शुध्धेन देहं समभिषेचयेत् ॥ उध्धर्यभस्मनो धूल्य चोपविश्यशुचिस्थले ॥२४॥ अलंकुर्वीततंदेहं रुद्राक्षै
रथशक्तितः ॥ गंधैःसु गंधिसंयुक्तै रालिप्यततुमादरात् ॥२५॥ पुष्पैः स्रकगंधिमालाभिर्वस्त्रैश्चानांबराद्दि
भिः ॥ समलंकृत्यतद्देहं धूपाद्यैधूपयेद्बहुः ॥२६॥ संपूजयेन्मतंदेहंलिंगिनंलिंगवत्प्रियं ॥ अथतद्वाहनार्थाय
विमानंकारयेद्दृढः ॥२७॥ चतुर्द्वारसमायुक्तंत्रयमेकंतु वाशिवे ॥ चतुःपादं चतुस्तंभमुन्नतंचारुवरान्वितं ॥२८
अलंकृतंसुवस्त्राद्यैयथाविभवविस्तरं ॥ मालिकाभिसुगंधीभिर्दर्पणैर्मणिचासरैः ॥२९॥ केतुभिश्चपता
काभिरलंकुर्याद्विमानकं ॥ तद्विमानष्टहस्तानूकर्त्ताजपेत्पंचाक्षरंशुभं ॥३०॥ सहस्रमष्टोत्तरशतंवाशतमेः

कादृशापिवा॥मूलेनोकारयुक्तेन विमानेस्थापयेच्छिवं॥३१॥यथासमाधौनिविशेत्तथैवस्वस्तिकासने॥
करावत्सुगयोः कौरक्षि त्वाबध्नीयादृक्षुभिदृढं॥३२॥चत्वारोलिंगिनोवृद्धाः ज्ञान भक्तितपोव्रतैः॥वाहेयु
भुजशिष्येषुविमानंशिवसंयुतं॥३३॥चत्वारोलिंगिनोवृध्धा॥मूलमंत्रंजपंतस्तु यानीयुरवटंप्रति॥अं
दोलिकादिर्विभवैः शिवपंचाक्षरंस्मरन्॥३४॥मंगलार्थनिविद्यानि वादयंतस्तनेकशः॥भेरीतुर्यमृ
दंगादियथाविभवविस्तरं॥३५॥संगीतस्तोत्रनृत्यानिजपन्पंचाक्षराहिकान्॥वाचयेच्छतरुद्रीयंउत्स
वंसाधयेद्बहुः॥३६॥लिंगिभिर्बहुभिर्जुष्टंगजस्यंदनपंक्तिभिः॥ग्रामामात्माचीमुदीचींवादिशांसमुपः
नीयतत्॥३७॥पुण्यदेशेनदीतीरेबहुवृक्षवनेपिवा॥गिरावारामभूभागेबिल्वमूलेमठेपिवा॥३८॥शि
वालयोपकंठेवाजीर्णगोष्टे चतुष्पथे॥संकरंलभ्यते यत्रचाश्रमेवातपस्विनः॥३९॥खातयित्वावटं
भूमौश्लक्ष्णं व्यायामविस्तृतं॥रहितंशर्करायावकंटकाशुचिबाधकैः॥४०॥ मृतदेहप्रमाणेन गर्त्तागां

धाविधीयते॥ नववासप्तपादं वा गतप्राणस्य देहिनः॥ ४१॥ तत्पूर्नमधिकं वा चेत्कर्तुरायुष्यसंक्षयः॥
गर्तः स्यात्तः पूर्वभागे दक्षिणे चोत्तरेपि वा॥ ४२॥ पंचपादप्रमाणेन विस्तारं चतुरस्रकं॥ पंचपादप्रमाणे
न सूक्ष्मांतरवटं चरेत्॥ ४३॥ तन्मध्ये वेदिकां कृत्वा त्रिपादं चतुरस्रकं॥ प्रथमं स्यायतं दीर्घं सोपानस्यैक
पादकं॥ ४४॥ कुर्याद्दीर्घं द्वितीयस्य द्विपादं चायतं तथा॥ तृतीयं स्यायतं दीर्घं सोपानस्यैकपादकं॥ ४५
॥ भित्तिं त्रिकोणसंयुक्तं दीपमालासमन्वितं॥ नवाद्यातं त्रिकोणं च व्यायामं च त्रिपादकं॥ ४६॥ एकमेव व
टं कृत्वा देहं तत्र प्रनिक्षिपेत्॥ संप्रेक्ष्य मूलमंत्रेण मूले नैवावटांतरे॥ ४७॥ प्रवेशोयेत्सुरनुसुगुरुज्येष्ठाद्
यः परैः॥ पुनः संपूजयेद्दत्तैर्धूपाक्षैरुपचारकैः॥ ४८॥ यथा संपूजयेल्लिंगं तथैव परमेश्वरी॥ केचिद्
दंति शिरसि नारिकेलफलं तथा॥ ४९॥ केचिन्नेछंति तद्युक्तमुभयं मम संमतं॥ ५०॥ नामप्यायेशाये
द्वर्ते वामे वा सुमुखे वपि वा॥ यदन्या दक्षिणे चेष्टबाह्ये चेत्सा पृथक् पृथक्॥ ५१॥ एतास्मिन्वटे सर्वाणि ख·

नेतादृशं वटं॥ यथासंस्था च भोगार्थाअवटेषु पृथक् पृथक्॥५२॥ निखनेद्रंतुमिच्छेरनू इति शास्त्रवि
निश्चयः॥ गर्भिणी यदि सा चेतु यथा पुत्रवती सती॥५३॥ न म्रीयेत तथा देवि मृता चेद्भ्रूणहा भवे
त्॥ उन्मत्ता पतिता भ्रष्टा रुग्णा भीता च जारिणी॥५४॥ दूरस्था सूतिवेश्या च पतिदुष्टा रजस्वला
॥ बालपुत्रवती बाला बहुपुत्रवती जडा॥५५॥ ईदृग्विधास्तेरुण्यश्च न म्रीयेत कदाचन॥ तासां व
क्षुलिंगानि तत्तद्देहे गतानि च॥५६॥ रहितेषु च तांबूलं निक्षिप्यो निखनेद्दृढं॥ सैंधवेन समापूर्य
लवणेनाशिकां ततः॥५७॥ संघट्य पद्भ्यां स्फुट्ं दृढं शेषमापूरयेन्मृदा॥ भस्मना बिल्वपत्रैर्वा मु
खमाछाद्य यत्नतः॥५८॥ यद्यल्पां पूरयेद्देवि लवणेन वटांतरं॥ संदेहपूतिगंधस्यात्तेन वंशोक्षयो
भवेत्॥५९॥ यदि क्लिद्येत कृमिभिः जंबुकादिभिराखुभिः॥ खन्यंते तेगंधलोभेन कर्त्तृगोत्रक्षयो भ
वेत्॥६०॥ पादैः संघट्टयेः संघट्य दृढं भूमिवदाचरेत्॥ न पूरयेछिलाद्यस्तु हृदि मृत्तिकयेव हि॥६१

यदि न्यूनो भवेद्भूमेर्गतः पूर्त्तिप्रमाणतः॥ कतुभवेन्महारोगः संतानं नैव संभवेत्॥ ६२॥ भूम्या
संमितमापूर्य कुर्यादुपरिवादिका॥ पौरुषेण प्रमाणेन तदर्धार्धमथापिवा॥ ६३॥ गर्त्तद्वि
गुणमानेन पितरः पृथिवीतले॥ चतुरस्रां वर्तुलं वा मेखलात्रितयान्विता॥ ६४॥ श्लक्ष्णे·
कुर्यालेपनाद्यैरलंकुर्यात्तथापरि॥ तोरणं पितरो बध्वा यथासच्छायसीतलं॥ ६५॥ काकादि
विनिवृत्त्यर्थं पताकाध्वजकेतुभिः॥ वेदेरुपरि कुर्वीत मध्ये लिंगसमन्वयं॥ ६६॥ तं लिंगं प्रेत
लिंगस्यान्नपूजा न च वंदनं॥ लिंगं तात्कालिकं देवि दीक्षांते पुनरन्यतत्॥ ६७॥ समाद्येर्वाभिभा
भैः तु लिंगं पाषाणसंभवं॥ संस्थाप्य पूजयेन्नित्यं वृषभं मंत्रोल्लिजे॥ ६८॥ लिंगाभिषेकती·
र्थेन तु पाणिपीठात्समाधिकं॥ एवं संस्थाप्य देवेशि तत्र कुर्यात्शिवालयं॥ ६९॥ यथा लिंगं तथा
कुर्यात् पाणिपीठ यथा तथा॥ यथा पूजा तथा पूजा नियमस्थो यथा तथा॥ ७०॥ धूपदीपोपहा·

रादिनित्यकर्म्मवदेवतत्‌॥प्राणान्मंत्रेण संस्थाप्यलिंगेमूलेनमंत्रितः॥७१॥जपेसंचानुवाकांश्चहृ
षडंक्मूलमंत्रतः॥शतरुद्रीयमावृत्यपयोभिसंभवेयदि॥७२॥शुद्धेस्वच्छजलेर्वापिरात्र्यालिं
गेभिषेचयेत्‌॥दोषायेशतरुद्रीय॥दोषायैवमहेशानिमुख्यशक्तोगुणाश्रयः॥७३॥ततच्छ
न्यानुसारेणविधिरेषविकल्पितः॥गीतवादित्रनृत्यादिविभवेसतिकारयेत्‌॥७४॥दीपा
नुभज्वालयेद्देहिमिखिलन्नितयेपिच॥चणकान्नारिकेलानिकदालान्येक्षवानपि॥७५॥ता
लाश्चक्षालितानुशुध्धानुसश्रीकुसससमर्पयेत्‌॥पंचभक्षमपूपादियथाविभववित्तरं॥७६॥
अन्नैवेद्यातम्याकल्प्यपूजयेद्देदिकांततः॥सद्योजातादिभिः पंचमंत्रेरीशानमादितः॥७७॥
चतुर्दिक्षुचतुर्भिश्चउपर्यंतेनपूजयेत्‌॥दिग्पालानष्टदिक्ष्वष्टपुरतोनंदिकेश्वरं॥७८॥दुर्गाविं
नायकंवीरभद्रापश्चिमपार्श्वयोः॥हुडंतुहुडमार्तंडभर्चंडचंडमेवच॥७९॥महाबलंबलंचैव

नै

मबलं रुद्र पार्श्वगान्॥ अष्टदिक्ष्वर्चयेद् ष्टा सध्यमायां यथाक्रमं॥८०॥ नंदिं भृंगिरिटं धुंडिं मो-
दामोदप्रमोदकाः॥ पूजयेद्धारि मेवृत्ते मूलमंत्रेण सर्वतः॥८१॥ समाप्य पूजां लिंगस्य भूरि दानानि
कारयेत्॥ नैवेद्यशेषतांबूलं वस्त्रद्रव्यादिभिः शिवे॥८२॥ नवि भज्य दद्यादेकत्र चागता भक्ति लिं-
गिनः॥ विचारयेत्तदा देवि लिंग्य लिंगी विभेदनं॥८३॥ ते सर्वे ईश्वरा सत्यं विभवे सतदीयतां
॥ विशेषेणार्चयेत्तत्र शिवभक्तं च लिंगिनं॥८४॥ दक्षिणे वस्त्र पूजाद्यै र्भोजयेल्लिंगिनां शतं॥ न
स्नायात् न स्मरेत् स्पृष्टिं न शौचं नाशुभं तु वा॥८५॥ अमंगलं न कर्तव्यं यतो लिंगी शिवास्य हं
॥ दद्यैकमपि वा शक्ति विभवे भूरि भोजनं॥८६॥ गोदानानि प्रकुर्वीत भूहिरण्यादि शक्तितः॥
कंन्यादानानि वा द्रव्य दद्याद्योगयथार्चयेत्॥८७॥ विसर्जयेच्च वृषभान् लिंगमुद्रांकितान् छ
भान्॥ प्रत्यहं चार्चयेद्देवि मासमेकं निरंतरं॥८८॥ पक्षं च दशरात्रं वा त्रिरात्रं चानु पूजयेत्॥ न

दीक्षानियमः कर्त्तो ब्रह्मचर्यादि सुंदरी ॥ ८९ ॥ स्त्रिसंगमात्रमुत्सृज्य सर्वपूर्ववदाचरेत् ॥ अभ्यंगं मै
छिकं देवि तांबूलं सर्वसंमतं ॥ ९० ॥ लौकिकं गंधपुष्पादि यथायोग्यं समाचरेत् ॥ आवतीक्रियते दी
क्षा यागे निर्याणसंज्ञिते ॥ ९१ ॥ तावत्संतर्पयेद्देव्यै रत्नातीर्थसमागतः ॥ नजातिभेदविभ्रंशो दाचां
डालांतमीश्वरी ॥ ९२ ॥ अगोश्वराश्वकाकानां दद्याद्देवान्नदमुत्तमं ॥ वृषभेभ्यो यथाशक्ति दद्याद
न्नरसादिकं ॥ ९३ ॥ दीक्षांते भोजयेत्सम्यक् शतमष्टोत्तरं परं ॥ सर्वदाद्दशशक्तो वा दीक्षांते सर्व
दाचरेत् ॥ ९४ ॥ अथवा यद्यदा शक्ति चैकं वा प्रेतलिंगिने ॥ द्रोणपुष्पैश्च दुर्वाभिर्बिल्वा पामार्गः
पाटलैः ॥ ९५ ॥ करवीरैरुत्पलैः पद्मैः यथासंभवमार्चयेत् ॥ मत्संबद्ध मार्गतो सिद्धि र्हि वसेत्तु वि
शेषतः ॥ ९६ ॥ पूजयेद्देदिकां भक्त्या लिंगवल्लिंगवद्धिया ॥ मासर्तुपक्षवारादौ यथाशक्ति सम
र्चयेत् ॥ ९७ ॥ शक्त्याश्चप्रत्यहं देवि पूजनं तु तरोत्तरं ॥ स्वशक्त्या भूमिमाक्रम्य भित्यवाकंटकादि

भिः॥९८॥कृत्वा रामं यथाशक्ति पूजयेत्पुष्पवादिभिः॥द्रोणि रुद्रजटी बिल्वी करवीरं चमारवं॥९
९॥अन्यानि गंधपुष्पाणि तत्र सं पादयेत् शिवे॥वेदित्व पूजये नित्य मन्यलिंगार्थ माहरेत्॥१००॥
स्वयं चक्षिति पालाय द्घादिष्टं तथाखिलं॥यथाशक्त्यार्पयेद्देहं विशेषेण च पर्वसु॥१०१॥उ-
त्सवं नृत्यगीतादि जागरादि स्वभक्तितः॥निर्याणयोगिनासिद्धिं गतदेहं च लिंगिनां॥२॥अ
नुगछे जनो याव ताव त्कालेसवासरं॥ये पश्यंति विमानाग्रं लिंगिनिर्याणसाधनं॥३॥साक्षात्
कैलास शिखरं किंतु लिंगी शिवो स्म्यहं॥प्रदर्शयंति ये दीपान् धूपान् घंटाध्वनीनपि॥४॥वे-
दिग्रं दक्षिणी कृत्य त्रीण्येकादश शक्तितः॥प्राप्नायजलजा भक्त्या कैलासे च निवासिनः॥१०५॥
प्रसुष्टायनरः प्रेत्य चाभिष्टाय प्रशस्यच॥देहेन शिवतादात्म्यमासना सहयांति ते॥१०६॥वेदीं
प्रदक्षिणीकृत्य त्रीण्येकादशशक्तितः॥भूमिं प्रदक्षिणीकृत्य यत्फलं तदवाप्नुयात्॥१०७॥सु-

।।पार.तं.।। ।।९९।।

क्कातद्देहिनेवेद्यंभक्षाहिक्षुफलादियत्॥भक्ष्यत्वासदेहांतेजायतेचंद्रशेखरः॥१०८॥अत्रवक्ष्यामिते
देविरहस्यंनमकाशाय॥नंदिस्कंदगजास्याद्दिनपिबोधव्यवल्लुभो॥१०९॥कार्तीकमाससंप्राप्तेन·
क्कारीनियतव्रतः॥प्रत्यहंपूजयेद्देविद्रोणबिल्वैस्तिलाक्षतैः॥११०॥सहस्रनामभिर्मूलमं·
त्रेणयद्विवार्चयेत्॥जपेद्विषट्सहस्रांतेशैवंपंचाक्षरंमनुं॥१११॥पंचवक्त्रंचतुर्वक्त्रंएकवक्त्रं
सएवहि॥यद्दिचेद्धेतकैलासंअपितेनतृणाईते॥११२॥किंमूर्खादिपुत्रादियदल्पंभोदभोति·
कं॥यद्यत्साधयितुंचेछछुध्वंसेत्तंहिवैदिकं॥११३॥संपादयेजलंयलाद्वापीकूपनिपातनं॥·
रात्स्यासंतर्पयेसंथान्जलेनान्नेनविह्वलान्॥११४॥लिंगस्यसन्निधौनिसंरात्रौपूजनका·
लतः॥आज्येनज्वालयेदीपान्अखंडान्माहतैलतः॥११५॥जयघंटीचघंटाचशंखश्चशृं·
गिकाहलः॥एतानिपंचवाद्यानिशस्तानिशिवपूजने॥११६॥दर्पणंदर्शयेनित्यंत्रिकालंभक्ति

।।अध्या.।। ।।१८।। य ।।९९।।

पूर्वकं॥ समार्जनोपलेपादि पंचांगंश्रावयेत्तदा॥११७॥ एवंभक्त्यार्चयेल्लिंगं वेदिनिर्याणयोगि
नः॥ देहांतेममसायूज्यंयातिकैवल्यमीश्वरी॥११८॥ एतन्निर्वाणयोगस्य लक्षणं कथितंमया॥
कर्तव्यमखिलंदेवि किंभूयः श्रोतुमिच्छसि॥११९॥ इतिश्री पारमेश्वरतंत्रेवीरशैवमतयागवि
धिर्नाम अष्टदशपटलः समाप्तं॥१८॥ श्रीशिवार्पणमस्तु॥ शिव॥ हर॥ शिव॥ हर॥ शिव॥
॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

श्रीगणेशायनमः॥श्रीगौरीशायनमः॥जयजयशिवशंभोशांतचंद्रार्कमौलेभयवरमृगपो-
ताभीतिशूलाखिलासन्॥स्वयमपिसुखरूपः सच्चिदानंदमूर्तिर्भवममहृदिनित्यंपाहिमांपा
र्वतीशः॥१॥नवैकादशपंचैकत्रिभागमयिशंकर॥सर्वानुगतविश्वेशाखंडरूपायतेनमः॥२॥
उपदिष्टंमहादेवसांगसलक्षणान्वितं॥दिक्षाप्रभृतिनिर्याणंयागांतेयोगलिंगिनां॥३॥मतेवां
तरभेदाश्चअधिकारस्तत्रतत्रतु॥आचारश्चविधिर्देवसर्वमुक्तस्त्वयाममा॥४॥उक्तंनिर्याणयागांते
भक्तशिष्यास्मजन्मनां॥यदोर्ध्वंदहिकंरूयंरहस्यंचसविस्तरं॥५॥एतावदेवनोकिंतुविशेषोयद्दि-
वात्रतु॥गृहवेधिनृपाधीमांयोगीभक्तंविरागिणां॥६॥सस्त्रीकास्त्रीकधर्माणांदरिद्रधनिनाम
पि॥प्रत्यब्धमथकिंकार्यंपुण्यकालादिषुप्रभो॥७॥यथाशाक्तेकृतेधर्मेवेदिकायामथान्यथा॥ग-
तिर्मृतस्यकावास्यात्कर्तृणामपिकिंफलं॥८॥व्यर्थंवासफलंतद्धिधर्मेवेदितलेकृतं॥एतदाख्या

॥पार॰तं॥ ह्सर्वेमेईश्वरेणमहेश्वरः॥९॥ईश्वरउवाच॥अत्रपरस्यमहादेविप्रमाणंवाचयेमिते॥सुखेनैवेद्य ॥अध्या॥
॥२॥ संदेहंतस्यममविक्रमं॥१०॥साधुसाधुकुलेशानिप्रश्नःसम्यक्कृतस्त्वया॥सर्वस्यचापिशा ३ ॥१९॥
स्त्रस्ययेनसाफल्यमाप्यते॥११॥गुरुस्तवमतःकोवागलेयेनाववध्यते॥लिंगंपंचाक्षरीमंत्रो
यस्येष्टउपदिश्यते॥१२॥सगुरुस्तस्यनिर्णीतस्तस्यशिष्यस्यवैसच॥एवंपरतरःसर्वेसर्वेषांगुरु
र्वोमताः॥१३॥तस्यतस्यमतेसर्वलिंगीनांशांखरात्मनां॥गुरुःसर्वोपिविभेशासर्वव्यापिनसं
शयः॥१४॥एवंसतिगजह्वाग्निकोपिलिंगेनईज्यते॥तस्मादेकस्यसर्वोपिगुरुरेवमहात्मकः॥१५॥
घु अत्राहोखलुतेनास्तिसंशयोथेदुहाशिते॥श्रृण्वतःपरमंसारंयत्नस्नेहेनकथ्यते॥१६॥वेदिकाक्षेत्र
माहात्म्यंप्रभावमेमतस्यच॥निर्णयंपरमार्थस्यहृतचित्ताभवप्रिये॥१७॥साध्यएवमहाधर्मशास्त्र
ल्पोतियथामतिः॥मृतानांतेनधर्मेणगतिभेदइहोच्यते॥१८॥गृहभेदीभवेल्लिंगीयदिसालोकय ॥१॥

मश्नुते॥ भक्तलिंगी तु सामीप्यं सारूप्यं त्यक्तसंसृतिः॥१९॥ ध्यानलिंगी तु सायुज्यं कैवल्यं ज्ञानयोगि
नः॥ तारतम्येन विश्वेशि मद्भक्तानामियं गतिः॥२०॥ योगिनो ज्ञाननिष्ठस्य सिध्येदैश्वरता स्वतः॥ भक्ति
मात्रकृतधर्मे स्वस्यातादृक्प्रदं प्रदं॥२१॥ गुरोः शिष्यस्य विहितां विद्यां धर्मस्वनुष्ठितिः॥ स्वस्यानृण्येभ
वेतेन चोभयोः सा गतिः समा॥२२॥ गृहीणः पुत्रिणो वक्ष्ये कर्तव्यमपि तत्फलं॥ निक्षिप्य वेदिकाक्षेत्रे म
द्ध्यायद्दिव्यास्तिकः॥२३॥ मंडपं कारयेद्यत्न्याच्छिलातृणादिभिः॥ यदि शोध्या भवेद्भूमिस्तत्रायं
० विहितो विधिः॥२४॥ मृतो यदि सपत्नीकस्तच सानुगता यदि॥ यद्यस्ति मणिकर्णादिक्षेपेणेद्वा
कृतः क्वचित्॥२५॥ तदा संशोधयेद्भूमिमाबलां तां सगर्तकां॥ समुद्धृत्यास्थिचितयोरेमात्रं विसर्जये
त्॥२६॥ कुर्यादेवं कुलस्त्रीणां मन्यासां तु यथारुचिः॥ विरक्तस्य च भक्तस्य देहमात्रं विसर्जयेत्॥२७॥
योगिनो ज्ञाननिष्ठस्य यावद्वृत्तं विसर्जयेत्॥ सर्वलिंगमयं विद्धि देहाविज्ञानयोगिनः॥२८॥ समुद्ध

॥पार॰तं॰॥ रेयद्दिशिवेतद्धर्त्तमविवेकतः॥ लिंगमुत्सादितंविधिस्मृतोयातिरौरवं॥२९॥ विशोध्यपरितो ॥अध्या॥
॥२॥ भूमिगुणवर्त्तनमाचरेत्॥ कारयेन्मंडपमथशीलादारुतृणादिभिः॥३०॥ गर्भगेहंचशिखरंस्व ॥१९॥
र्णकुंभादिसंयुतं॥ प्राकारगोपुरयुतंयथाविभवविस्तरः॥३१॥ परितःकारयेद्रम्याधुनानि
महीरुहैः॥ वापीकूपतडागादिप्रपायापुष्पवाटिका॥३२॥ गोशालारोग्यशालादिस्नानार्थ
शायनार्थकं॥ रुग्याणांदुर्बलानांचवासार्थंपशुपक्षिणां॥३३॥ क्षेत्रापणपुरग्रामवृत्तिर्वसति
कादिकान्॥ धर्मान्समाचरेत्तत्रस्वल्पमप्यक्षयंध्रुवं॥३४॥ गृहाणिविधिरूपेणकारयित्वास
मेभुवि॥ रथोत्सवादिकुर्वीततथाहर्षासनादिकं॥३५॥ सेवकानांभृतिंदत्वासर्वयात्रोत्सवादि ८
कान्॥ छत्रव्यजनदीपादिवाद्यघंटादिदापयेत्॥३६॥ सत्रंविधायभूतेभ्यःप्राणिभ्यःक्षुन्निवा
रणं॥ यथाशक्तिरसैरन्नंदापयेद्यथतान्वहं॥३७॥ दीपस्तंभध्वजस्तंभसूर्यादिप्रमथाधिपान्॥ ॥२॥

बोध

परितः परिवारांश्च स्थापितः पूजयेच्छिवे ॥ ३८ ॥ अश्वत्थ बिल्वीमल्क तुलसी द्रोणवाटिकाः ॥ रयम्य·
पामार्ग दूर्वादि करवीरादिकान् बहून् ॥ ३९ ॥ सधूपदीपनैवेद्य पूजासेवादिकृत्स्नशः ॥ संपादयेन्म
हादेवि लिंगपूजादिमादरात् ॥ ४० ॥ पूजादीनां प्रवाहार्थं क्षेत्रापणपुरादिकं ॥ दत्वा संसाधयेद्देवि
तदानंत्याय कल्पते ॥ ४१ ॥ आर्त्तिनः संतिये भूमौ दीनांधानू रूपणान् बहून् ॥ तर्पयेदर्पितान्सर्वान्
कामिनः प्राणिमात्रकं ॥ ४२ ॥ न अत्र जातिभेदोस्ति वेदिकाक्षेत्रमंडले ॥ न लिंग्यलिंगि संभेद सर्वई
षाहमीश्वरी ॥ ४३ ॥ तर्पयेदर्त्तिनः सर्वान् अन्नवस्त्रजलादिभिः ॥ कृपणान्बलहीनादीन् लिंगिनस्तु वि
शेषतः ॥ ४४ ॥ वर्षाशनादिकं दत्वा स्वस्थायावसथादिकान् ॥ धेन्वादि शाश्वतं पूर्णं लिंगिनस्थापये
द्बहून् ॥ ४५ ॥ प्रवाचयेदभिज्ञेन यास्त्रं मत्त्रमतसूचकं ॥ अन्याश्च भोजयेद्भक्त्या नन्यान् शक्ति विवृद्ध
ये ॥ ४६ ॥ ऐकैकोत्र महादेवि धर्मश्शत्यानुसारतः ॥ अक्षय्यफलदः सर्ववंशानामुत्तरोत्तरं ॥ ४७ ॥ शक्तोध

र्भवतां धर्मएषउद्दिष्टईदृशः॥ अशक्तो भक्तिसद्भावे साध्यो धर्मस्तनुश्रमे:॥४८॥ अन्येनस्थापिता·
॥३॥ न्वृक्षान्लतादीन्पुष्पवाटिकान्॥ सेचयेद्भक्तितस्तोयैः कर्तुः समफलं भवेत्॥४९॥ सुजीर्णवैदिकां से ॥१९॥
त्रंपुनरुध्धार्यपोषयेत्॥ कर्तुर्द्विगुणमाप्नोति फलं देवि न संशयः॥५०॥ यदि पुत्रवती नारी देवास्या
न्मृतभर्तृका॥ वेदिकामर्चयेद्भर्तुः शिवबुध्याशिवामये॥५१॥ प्रत्यब्दं सिध्धिदिवसकोटिसूर्य·
ग्रहोपमे॥ विशेषेणार्पयेद्भक्तान् अन्नवासोधनादिकैः॥५२॥ लिंगानि सन्निकाशानि लिंगव
स्त्रगुणादिकान्॥ दद्याल्लिंगिभ्यईशानि यदि कैवल्यकांक्षिभिः॥५३॥ अशक्तेभ्योपि लिंगिभ्यः
प्रदद्याद्वृषभान्दृढान्॥ भूत्वाशिवोवृषारूढश्चरेद्देवि यथेच्छया॥५४॥ उपरागरवेरिंदोर्व्यतीपातेच
॥५५॥ वैधृतौ॥ अर्धोदयेचसंक्रांतावयनेचमहोदये॥ पुण्यकालेषुचान्येषु धर्मंशक्त्या समाचरेत्॥ कु·
लकोटिसमायुक्तो मम लोके महीयते॥५६॥ पुराणं वाचयेत्तत्र दत्वाजीवनहेतवे॥ दत्वा धनादि ॥३॥

कं पूर्णं शिवचारित्रवाचकं ॥ ५७ ॥ कार्त्तिके मासि संप्राप्ते प्रत्यहं सोमवासरे ॥ शक्तितः पौर्णिमास्यां

वाह्यर्चेद्बिल्वादिभिः शिवं ॥ ५८ ॥ यथात्मनि तथा लिंगे मतेमयि मदर्चने ॥ विरक्तलिंगिनां ज्ञानमि

ष्टशास्त्रमिति नृणां ॥ ५९ ॥ भक्त्या तादृशया देवि शास्त्याशादय मदर्शनं ॥ वेदिकामंडले धर्ममाचा

रेन्मृधियात्तथा ॥ ६० ॥ सर्वत्र भक्तिरेकैव भक्तानां मुख्यसाधनं ॥ गुरौ मते च शास्त्रे च मल्लैवल्यासये

शिवे ॥ ६१ ॥ दया च सर्वभूतेषु प्राणिषु द्वेषवर्जनं ॥ समत्वमीश्वरान्वीक्ष्य सर्वत्र समया धिया ॥ ६२

प्राणिं द्रोणे षु वेसुख्यं वेदिकार्चनमादरः ॥ एषा भक्तिमतां भक्ति पूजा सलक्षणा मम ॥ ६३ ॥ भक्त्या

संतारयेत्सर्वमासान्नंवशमात्मनः ॥ भित्वा चराचरं विश्वं शिवो भूत्वा सुखी भवेत् ॥ ६४ ॥ कृत्वाग्र

हां रविप्राणां भक्तानां योगिनामपि ॥ संस्थाप्य वेदिकाक्षेत्रे कुंडं याग्रा ममादिशेत् ॥ ६५ ॥ यद्ब्रह्मसा

धितं ब्रह्म लक्षणं कर्म सत्कृतं ॥ कर्त्ता तत्सर्वमाप्नोति देहांते च पदं मम ॥ ६६ ॥ कर्त्ता कारयिता चैव प्रेरक

य

दु

श्चानुमोदनः॥सुकृतेदुष्कृतेचैवचत्वारसमभागिनः॥६७॥रुग्णान्दरिद्रिणोशक्तांछिवभक्तांकु 
टुंबिनः॥स्थाप्यैकमपिलिंगस्यप्रतिष्ठाफलमश्नुते॥६८॥धर्मस्यवेदिकाक्षेत्रेतारतम्यंनसाधने॥
प्राणिमात्रंयदापात्रंलिंगीतप्रविशिष्यते॥६९॥भस्मरुद्राक्षमात्रेणशिवनामस्मृतेरपि॥लिंगा॰
र्चनेनमद्भक्ताकिंपुनर्लिंगधारणात्॥७०॥तस्मात्संतर्पयेद्देविभक्त्याशक्त्याशिवार्चकान्॥लिंगरु
द्राक्षभस्मांकानेकंवापिममाश्रये॥७१॥विरक्तानर्चयेदन्यान्वेदिकापूजनोज्झितान्॥सकृदभ्यर्च्य
लिंगस्ययावत्पूजामुपैतुसः॥७२॥माघमासेर्चयेन्नित्यंत्रिकालंसायमेववा॥स्वशक्त्यावेदिकाक्षेत्रं
शिवरात्रौविशेषतः॥७३॥शिवरात्रौमहालिंगंवेदिकाक्षेत्रमध्यगं॥बिल्वादिभिःसमभ्यर्च्यम
कैवल्यमुपैतिसः॥७४॥दानंचशिवभक्तानांलिंगानांचविशेषतः॥भक्त्याशक्त्याशिवेदत्वास्वल्प 
मक्षयमश्नुते॥७५॥वैशाखमासेमहतिछायांतनसुशीतलां॥संपाद्यवेदिकाक्षेत्रेशक्त्याधर्मस

माचरेत्॥७६॥पानकं पादुकां छत्रं व्यजनादिनुपानहौ॥शीतलोदकदध्यान्नं गंधं पुष्पादिशक्तितः॥७७॥प्रदाय शिवभक्तेभ्यः शिवकैवल्यमश्नुते॥लिंगिभ्यो ज्ञानसाध्येभ्यो यतिभ्यः शिवसाधिया॥७८
प्रसूतिरहितां धेनुं कर्षणादिषु योजितां॥विसर्जयित्वा भारोहि मुपेयाच्छिवरूपतां॥७९॥वृषभं लिं
गमुद्रांकं भारवाहे च कर्षणे॥दृष्ट्वा नियोजितं सम्यक् मोचयेच्छक्तितः शिवे॥८०॥तेन तद्देहपातांते कु
लकोटि समन्वितः॥स्थित्वा लोके ममचिरं मंते मत्कैवल्यो भवेत्॥८१॥ऋणदारिद्र्यरोगादि पीडितं लिं
गधारिणं॥विमोचयेत्स्वशक्त्याय पूज्यते हमिव प्रिये॥८२॥सकुलं दक्षिणं रुत्वा नमस्कृत्वा पिवास
कृत्॥वेदिकालिंगक्षेत्रस्य तेन दत्ताखिला च भूः॥८३॥संपूज्य पितरौ पुत्रः स्ताभ्यां मल्लोकमश्नुते॥गु
रोः शिष्यो नृणां भूयः भक्त्या मत्कैवल्यो ध्रुवं॥८४॥अनाथानां तु संस्कारो लिंगिनां शिवरूपिणां॥
जित्वा मल्लोकमखिलं शिवः संजायते स्वयं॥८५॥परितो वेदिका क्षेत्र वेदिनि ष्टां च्छिवप्रियात्॥धृत

रुद्राक्षभस्मोंकान्तद्धर्मं सर्वमश्नुते॥८६॥ विशेषनाद्दिजान्तत्रस्थाप्यषण्मंतसंमतान्॥तत्तत्कृतम ॥अध्या॥
वाप्नोति धर्मं सर्वमपीश्वरी॥८७॥अन्येचशिवभक्ताय साधवोलिंगधारिणः॥संस्थाप्यतांशिवो ॥१९॥
भूत्वा सत्यं सर्वमयो भवेत्॥८८॥ योनोद्यतोमृतोलिंगाविमानाहोलिकावना॥ तंदत्वालिंगिनेने
पमत्स्यंवाशिवएवसः॥८९॥ पूजयेद्गुरुपूजावआदराद्देहिकामयं॥लिंगंलिंगधियासाक्षात्लिं
गमेवभवत्यसौ॥९०॥ प्रतिसंवत्सरेवेदिंप्रदोषभक्तितोर्चयेत्॥यद्दैवाभ्यर्चमांदेविशिवएवभ
वेत्तदा॥९१॥ किमत्रबहुनोक्तेनशृणुतत्त्वमुमेमम॥सर्वंसारंप्रवक्ष्यामिकृतप्रश्नस्यचोत्तरं॥९२॥
यथाशक्तियथाभक्तिपूज्यवेदिंमहात्मिकां॥मृतंचमन्मयंकृत्वामन्मयोभवतिस्वयं॥९३॥अशः
क्तः स्वयमन्येषांप्रबोध्यधनलिंगिनां॥कारयेत्पूजनंवेदेः सर्वशंकररूपिणः॥९४॥आकालप्यां
नरायंयस्तद्द्वेषेण।विधातयेत्॥सजीवन्नेवचांडालोमृतोधविशालेतमः॥९५॥ शतजन्मसुच ॥५॥

श्वास्याद्दिष्टा याक्रमिकोभवेत्॥९६॥अशक्तानांचबालानांविधिवावृध्धयोषितां॥समार्जनो
पलेपाद्येर्वेदिसुश्रूषणंगतिः॥९७॥सेचयेद्ग्रीष्मकालेतु यथाशीतंभवेस्थलं॥जलेनवेदेः परितो
यदिसालोक्यमिछति॥९८॥उपलिप्यत यावेदिं विधवा गोमयेनच॥नवैधव्यमवाप्नोतिजन्मकोटि
शतेष्वपि॥९९॥भूत्वापुमानतभवेछिवभक्तोनसंशयः॥नदरिद्रोनवैरागीसर्वकल्याणभाग्भ
वेत्॥१००॥दरिद्रः पूजयेद्वेदिंभक्त्यासंवत्सरावधि॥अचंद्रार्कंभवेल्लक्ष्मिंउत्तरोत्तरमुत्तमा॥१॥
स्त्रीणांचभर्तृशुश्रूषाधर्मोनान्योमहीश्वरी॥शिवार्चनंचसततंमृतेभर्तरिभामिनी॥२॥यानारी
भर्तृशुश्रूषाविहायव्रततत्परा॥सानारीनरकंयातिइत्याज्ञाचमयाकृता॥३॥वीरशैवागमास्थाय
भर्तुरेवपरःशिवे॥मृतोभर्तरिसासाध्वीतस्याशुमीयतेनगा॥४॥यदिपुत्रवतीसाचनम्रीयेतत
दासति॥सानारीलिंगपूजाचशिवार्चिंतापरायणा॥५॥विरक्तानालिंगवतामन्नदानपरायणाः॥

भूशाय्या नक्तभोजी च एकाहारी जितेंद्रियः ॥ ६ ॥ त्रिकालभस्मना स्नानं काषायांबरधारिणी ॥ क्षमा द-
या सदा मौनं पुरुषालापवर्जनं ॥ ७ ॥ इंदुवारे च विधिवत् उपवासः शिवार्चनं ॥ शिवपंचाक्षरी जाप्यं सत्क-
थाश्रवणं मुदा ॥ ८ ॥ शिवभक्तेषु वात्सल्यं भूतिरुद्राक्षधारणं ॥ शिवतीर्थानुगमनं शिष्यभक्तिपरा-
वरोत् ॥ ९ ॥ पतिमन्यं न गंतव्यं गता चेन्नरकं व्रजेत् ॥ इति संक्षेपतः प्रोक्तो गुह्यं पापप्रणाशनं ॥ १० ॥
शिवो ध्येयः सदा देवि जप्यं चापि षडक्षरं ॥ इदमेव मया देवि गुह्यं पापप्रणाशनं ॥ ११ ॥ अंत्येष्टे मोक्ष-
दीपाख्यं वक्ष्यामि शृणु वल्लभे ॥ १२ ॥ इति श्रीपारमेश्वरतंत्रे एकोनविंशति पटलः समाप्तं ॥ १९ ॥
॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ०

श्रीगणेशायनमः॥श्रीमत्सार्वतीवल्लभायनमोनमः॥वेदवेदांतसंवेद्यवेदांतार्थप्रवर्त्तकः॥सच्चि
न्मयसदानंदशिववक्रोभोनमोस्तुते॥१॥देव्युवाच॥नमःकंथानिसंगायनमस्तेत्वष्टमूर्त्तये॥हृदि
स्थंसंशयंछिंधिशिष्यामम ते प्रभो॥२॥शिवदीक्षाप्रकारोमेभवत्येवनिरूपितः॥तद्वांतरभेदा
श्च विधानंलक्षणादिकं॥३॥दीक्षाभेदांश्चसर्वेपितारतम्यंफलंत्वपि॥श्रुतंत्वधिगतंप्रष्टमयादेवत्व
पाखिला॥४॥अतुर्शेवादिभेदानांषण्णावीरानवर्त्मनां॥एकएवोदितांदीक्षाभेदस्तरनमत्वतः॥
५॥संभवेद्यदि चैवंवाविशेषंतत्रमेवद॥समयानांतुदीक्षायांलिंगनाशोत्यनुंत्यजेत॥६॥विधिरेक
स्यकथितः कथंवैषम्यमीश्वर॥तस्यापिपूर्वमुदितोपंथायानिर्विशेषतः॥७॥रूपांकुरुमयास्वा
मिन्भक्तोध्धारणदीक्षित॥भक्तायेचानुरक्तायेप्रपन्नायेनिरूपया॥८॥ईश्वरउवाच॥साधुपृष्टंत्व
यादेविलोकोध्धारणदीक्षित॥श्रवणेकुशलासीत्वंदीक्षाभेदविधेरहो॥९॥कर्त्तुंशैवमतोधारंप्रश्नो

यमचलासजे॥ भजेयुरखिलालोकास्सया यदिनृपोच्यते॥१०॥ ज्ञात्वैतन्मानभेदं तु शिवदीक्षव्रतेयदि॥ प्र
विश्येत्सुच्यतेलिंगीन चेदंधत्तमस्फुटं॥११॥ महानास्ति विशेषोत्र संवेद्यः शृणुवक्ष्यते॥ गोपनीयं प्रय
त्नेन यथाविधि रकिंचनैः॥१२॥ वदेद्धनधिकाराय न कार्या कांक्षिणाशिवे॥ नापरिक्षाविषद्वर्षनदत्वा
र्थाभीममानने॥१३॥ ज्ञानं विरक्तिं वैद्धध्याना चारं शांति चित्तसां॥ नैस्पृह्यमपरिक्ष्यासुनिश्चिष्यना
नुग्रहेद्गुरुः॥१४॥ दीक्षाभेदविधानातं नोपदेशं विशारदैः॥ वदेत्पूर्णाधिकाराय ज्ञानाय गुरुमानिनेः
॥१५॥ अस्तिकाय विशुद्धाय मद्भक्ताय मुमुक्षये॥ जितेंद्रियाय मद्देवे सर्वत्रेश्वरभाविने॥१६॥ याऽ
चोक्ता प्रथमं दीक्षा सैवैककलशान्विता॥ अनुशैवादिभेदानां षण्णामेका विधीयते॥१७॥१॰त्रिवि
धस्याय भेदस्य दीक्षाभेदो विधीयते॥ वीरशैवमतस्येशि क्रमेण शृणु पार्वती॥१८॥ निवृत्त्यषड्वि
धं भेदमाहितः क्रमशास्ततः॥ प्रकृष्टपुण्योपचया यांति कैवल्यमिच्छति॥१९॥ प्रविशो द्वीरशैवारव्ये

मतेममममहत्तरे॥ज्ञात्वागुरुमुखात्सम्यक् अधिकारंचलक्षणं॥२०॥ शास्त्रदृष्टिंगुरोर्वाक्यं तृतीयंचात्म
निश्चयं॥लब्ध्वात्रस्थानसमतां मनीषेमनसोभवेत्॥२१॥संत्यजे पशुवित्तांस्त्यां देहप्राणादिषुस्पृहं॥
निर्वाणोबंधनाद्भीतोयदामुष्मिकमैहिकं॥२२॥ नित्यानित्यविवेकज्ञः षट्मयादिगुणान्वितः॥मो
क्षायत्नपुरंबुध्वाशिवमामखिलंप्रभुं॥२३॥सर्वभूतदयोपेतः सर्वप्राणिष्वहिंसकः॥कर्मणामन
सावाचासर्वमात्मवशीक्षयेत्॥२४॥त्यजेद्यत्नेननेहेतपापंचापियदृच्छया॥नेजितेंद्रियसंतृप्तिंनभ
वेत्सुखलंपटः॥२५॥सहेतदुःखदुर्धर्षशीतवातोष्णसंभवं॥सहेतमानवामानौधियादेहात्मवादि
नां॥२६॥नात्मस्वभावंकुत्रापिपरस्मैसंप्रकाशयेत्॥नानादोषगणानूक्कापिनिंदेदपिचसंशयेत्॥
॥२७॥देहात्मानांसक्छेपिनतत्परिहरंस्मरेत्॥अपिहस्तागतंभोगंसर्वातिशायतंत्यजेत्॥२८॥
विविक्तदेशमाश्रित्यसर्वभूतात्मभूतहृत्॥ध्यायन्मांमनशंयत्नदंतबर्हिनिरंतरं॥२९॥संगंनकुर्या

दसतांशिश्नोत्तरतृषाकवित्॥स्त्रीणांस्त्रीसंगिनांसंगंत्यजेदूरतआत्मवान्॥३०॥जीवेत्तनिरसाने
नभैक्षणेवयदृछया॥इछेवचैहिकांप्रीतिंनचस्वर्गेपिकृछ्रगः॥३१॥संग्रहंनैवकुर्वीतदेहेपोषणहेतु॰
वे॥वृत्याजीवेतवैदेवाधीनयादृढनिश्चयः॥३२॥इत्यादिसद्गुणोपेतउक्तलक्षणलक्षितः॥संप्राप्तनि
श्चयोधैर्याद्गुरुशाखात्मनिश्चयैः॥३३॥प्रवेष्टुमिछेतततौवीरशैवमतव्रते॥तत्रभेदविशेषोस्तिदी
क्षाकर्मणिपार्वति॥३४॥सामान्यवीरतुर्याख्यंत्रिविधंतन्मतंविदुः॥तत्राद्ययोर्द्वयोर्दीक्षाकलशाभि
तयान्विता॥३५॥पंचब्रह्मानुवाकश्चमनःपंचाक्षरैध्रुवं॥इतरौमध्यकुंभस्यदक्षिणोत्तरयोर्न्यसेत्॥३
६॥शतरुद्रीयसूक्तेनविधिनेत्यनुवाकतः॥पंचानुवाकपंचार्णप्रणवैरभिषेचयेत्॥३७॥सज्जिकागु
णवस्त्रादिनाशेन्यत्सद्गुराचरेत्॥कुर्यात्तस्यगुरुःपंचकलशैर्देसतंविधिं॥३८॥शतरुद्रीयपंचार्णानु
वाकःप्रणवोमनुः॥पूजानुवाकस्तोत्रादिसर्वत्रैवविधिस्मृतः॥३९॥पूजायांशतरुद्रीयैरनुवाकैर्निषे

चनं॥सहतारेण मूलेन पट्टबंधस्तु लिंगिनः॥४०॥सहतारेण मूलेन होमकर्म समापयेत्॥दीक्षाभिषेकं नि
र्वृत्य पट्टबंधादनंतरं॥४१॥जपेदष्टोत्तरशतं मूलमंत्रं सतारकः॥गुरुपूजां च तेनैव यदि नित्यार्चनं त्वयि
त्रि ॥४२॥नैमित्यकं च वै कार्यं नाकर्माहिकतापि वा॥न प्रायश्चित्तमौनित्यं तु यं शैवस्यालिंगिनः॥४४॥वि
विक्तदेशमाश्रित्य त्यक्तभोगपरिग्रहः॥त्यक्ताशो निर्भयो शांतो मौनवान् विजितेंद्रियः॥४५॥स्मर
णं ध्यानसंपन्नश्चाभ्यसेन्नित्यमानसं॥साधयेत्संग्रहं चैतच्छक्तश्चेच्छासधारणं॥४६॥यदिच्छापूजयेः
लिंगं चामिताहरणायत्तु॥भक्त्याशास्त्रगुरोः प्राप्तमथ पूर्णं विचारयेत्॥४७॥संस्तवीत गुरुं वा तं त्रि
कालं मामहेश्वरं॥सर्वमात्मतथा पश्येत् उत्तमध्यमनीचकं॥४८॥मयीक्षिताखिलं देवि समात्मनि वि
भावयेत्॥मदात्मजगतां भेदे प्यभेदेन विनिश्चयेत्॥४९॥नातर्ग्रामविशो लिंगातुर्यशैवमतो स्मः
॥नवमेव वसेन्नित्यं स्त्रीणां मुखमीक्षयेत्॥५०॥नात्मनं दर्शयेत्स्त्रीणां न भावं च प्रकल्पयेत्॥नोद्विजेत्तूज

पार. तं. ॥ नानूलिंगी जनं चोद्वेजयेन्नतु ॥ ५१ ॥ हर्षमर्षभयोद्वेगविमुक्तः समदृक्शुचिः ॥ तुर्यवीरमतं प्राप्य संभ ॥ अध्या. ॥
॥ ३ ॥ वेदहमेवहि ॥ ५२ ॥ एतादृशाधिकारस्य तुर्यवीरस्य लिंगिनः ॥ प्रमादाल्लिंगनाशे तु सहतेनतनुंत्यजे· ॥ २० ॥
तू ॥ ५३ ॥ नित्यं सम भवेत्कर्म निद्रास्नानविसर्जनं ॥ मामेव चिंतयेन्नूनं जडान्धबधिरोपमा ॥ ५४ ॥
स्मरणं कीर्तनं केली प्रेक्षणं गुह्यभाषणं ॥ संकल्पो ध्यवसायश्च क्रियानिर्वृतिरेव च ॥ ५५ ॥ एते मैथुन·
मष्टांगं प्रवदंति मनीषिणः ॥ विपरीतं ब्रह्मचर्यमेतदेवामष्टलक्षणं ॥ ५६ ॥ अन्विक्षितासनो बं
धुमोक्षं मदनुचिंतया ॥ बध्यइंद्रियविक्षेपो मोक्षएषां प्रसंयमः ॥ ५७ ॥ न कुर्यात्प्राणिनो दुःखं स्वयं
दुःखी नैवान्यतः ॥ नोतिष्ठेत न वंदेत न स्तुवीतापि चोनमं ॥ ५८ ॥ न दद्यान्न च गृह्णीयात्तुर्यशैवव्र·
तोत्तमः ॥ मध्ये दिक्षुं च संस्थाप्य कलशानां च पंचकं ॥ ५९ ॥ अविछिन्नर्त्विजस्तोकानुवाकशतरुद्रि·
यैः ॥ मूलेन क्रमशोनेन मध्यमादिप्रदक्षिणं ॥ ६० ॥ पूजयित्वा यथापूर्वं विशेषो होमकर्मणि ॥ शि ॥ ३ ॥

वाग्निजननंकुंडमेखलादेवतार्चनं॥६१॥ऋत्विजःपंचकुर्वीतःमूलेनैवसतारतः॥नगुरुर्दैक्षिकंकर्म
क्वचिदप्याचरेद्धिया॥६२॥मध्यदक्षिणमार्गेणप्रादक्षिण्येनपूजयेत्॥आचार्यःस्वात्मनःकुंभंगु-
रोस्तस्यनियोजयेत्॥६३॥कारयेदुपवेष्टित्वादक्षिरपिपंचभिः॥गुरुर्वाचर्याभोकुंभावात्मवाइतिपं-
चकं॥६४॥उपकुंभेततःशिष्यंलिंगिनंत्वभिषेचयेत्॥नस्त्रीकुर्याद्गुरुःशिष्याद्दक्षिणार्थंवसुक्वचित्॥
६५॥अस्तिचेद्भूतिविश्राण्यत्यक्तसंगसुखीभवेत्॥यदिभ्रमाद्दाद्विषयेतुर्यलिंगाविशिष्यते॥६
६॥आरूढपतितंमूढंधिक्कंमानुषगर्दभं॥एवंव्रतधरस्तुर्यश्शैवलिंगीमहत्तरः॥६७॥दीक्षावि-
षमारभ्यविचारत्सर्वतःसुखी॥नतस्यकर्त्तृताकर्मकरणीयंचतत्फलं॥६८॥तद्भोगस्तनुषंगोवा
किंचिदस्तिमहात्मनः॥विचारेतयथाकामंकामिनीकामकंटकैः॥६९॥दुर्गेविवेकवैराग्यपादरक्षा-
न्वितःपथि॥मदनुग्रहसद्धर्मतनुत्रपरिरक्षितः॥७०॥प्रबुध्येदचिरादेवमतस्मात्यामतंत्यजेत्॥यदि

॥पार·तं·॥ बुध्यासमारूढः पतेद्विषयआतुरः॥७१॥ तद्दूराद्धंधमासाद्याद्दुःखादुःखसउत्तरेत्॥आणिमाद्यखि ॥अध्या॥
॥४॥ लाभोगातवलीलाविजृंभितः॥७२॥ षड्भिह्लाविकृतिभिरतोमामेवसंश्रये॥राजसेनविकारेण· ॥२०॥
भिन्नाअमृतवद्विषा॥७३॥ मयासंपाद्यमानस्यकालक्षेपणहेतवः॥स्यक्त्वाविलोक्यविरमेद्दिहामू·
त्रचिकीर्षतात्॥७४॥ स्वस्तसंकल्पविज्ञानः सर्वात्मानमवीक्षयेत्॥निर्विघ्नेनवरारोहेममलोक·
यहिच्छति॥७५॥ सखेनकर्तुमलसोभवेन्मदनुचिंतने॥मनोवाक्कायकर्येषुजाग्रत्स्वप्नसुषुप्तिषु
॥७६॥ मदनंस्मरणंमुक्त्वानयेत्कालमपिक्षणं॥उशीरितंमार्गमिमंसमाश्रयेनान्योस्यपंथाअ·
नायवीक्ष्यते॥७७॥ मदनंस्मरणमुक्त्वानयेत्कालमपिक्षणं॥समाहितोदुरगतःश्रमःसुखीनि
रस्तसर्वैषणआसानिश्चयः॥७८॥ देव्युवाच॥स्वसृष्टयवनसंहारहारदेहावभासिने॥सांख्य·
भासायसांख्यायभासयेसनमोस्तुते॥७९॥ विधानमुदितंसर्वंतुर्यत्रौवस्यलिंगिनः॥इतरेः ॥४॥

षांचविश्वेशाविशेषस्तत्रपृछति॥८०॥भवेन्मतेप्रतिष्ठस्यनादिशैववक्रमेणवै॥तुर्यशैवप्रनिष्ठ
स्यनान्यथामुक्तिराप्यते॥८१॥यद्युक्तक्रमतोवापिगछतस्तन्मतेप्रभो॥मुक्तिर्वापतनंबंधउत्तरो
त्तरवर्त्मनां॥८२॥भेदकल्पनमासाद्यतारतम्येनचेश्वर॥दीक्षासामान्यमाहिश्यत्वदभिप्रायउच्य
तां॥८३॥ईश्वरउवाच॥श्रृणुदेविप्रवक्ष्यामिप्रश्नःसाधुकृतास्त्वया॥शक्ताशक्तानुसारेणतारत
म्येनपार्वति॥८४॥तस्माप्यस्यापिचैकत्वेमतभेदउदाहृतः॥क्रमोविवक्षाक्षितोनैवधारस्यमन्वे
तसः॥८५॥शक्तश्चेद्युक्तमेणापिशाक्ष्यतेगतमीश्वरी॥मनोधैर्यविरक्तिश्चज्ञानभक्तिश्चपूजनं॥
८६॥श्रद्धांसत्यंप्रियोक्त्यादिसर्वेषांसममेवहि॥मनसोधैर्यमात्रेणदीक्षाभेदोकृतोभवेत्॥८७॥
तुर्यस्यलिंगीनाशेतुदेहत्यागोविशेषतः॥अनादिशैवनिष्ठस्यस्वपुण्योपक्षयायदि॥८८॥श्रद्धा च
दानदयाभक्तिदार्ढ्यैतत्रैवमुच्यते॥आद्यादिमतभेदास्तुतत्रार्थायकल्पितः॥८९॥शक्त्याप्युक्रम

तश्चापि यश्शक्तः क्रमतो व्रजेत् ॥ अन्यथा प्युत्क्रमाद्गत्वा सतेलिंगी महाभये ॥ ९० ॥ सदाश्रयेद्गुरुं नि
त्यं मत्कैवल्यं यदिच्छति ॥ ज्ञानकर्मानुसारेण विधिरेषउदाहृतः ॥ ९१ ॥ लिंगसज्ञादिनाशेतु दीक्षात
त्पुनः कृतिः ॥ लिंगार्चनं जपस्तोत्रं गुरुपादापसेवनं ॥ ९२ ॥ स्मरणं मत्कृतिध्यानं प्रायश्चित्तमुदा
हृतं ॥ तुर्यस्य लिंगनाशेतु देहत्यागो हितत्क्षणं ॥ ९३ ॥ मत्कैवल्यमवाप्नोति नान्यतार्थाभिलाषि
णः ॥ त्वत्पृष्टमीरितसर्वं भवतापरमेश्वरी ॥ ९४ ॥ दीक्षाभेदादिकं स्पष्टं किं भूयः श्रोतुमिच्छसि ॥
॥ ९५ ॥ इति श्री पारमेश्वरतंत्रे विंशतिपटलः ॥ २० ॥

श्रीगणेशायनमः।।श्रीमत्कैलासवासिनेनमः।।पंचवक्त्रायपंचायपंचकृततनुभृते।।प्रपंचसाक्षि
णेतुभ्यमीश्वरायनमोनमः।।१।।देव्युवाच।।तिरस्कृतानिमायाद्यअष्टैश्वर्यप्रदायिने।।त्रिपुटाभोगतुष्टा
यपुष्टानांपतयेनमः।।२।।जगद्वंद्यजगन्नाथजयसर्वोत्तमोत्तमं।।जगदाश्रजगन्मूलजान्हवीजटलप्र
भो।।३।।दयाकुरुमहादेवत्त्रिव्यायामयिशंकर।।वात्सल्यंदर्शयन्स्वामिन्त्वदनुग्रहणोत्रतः।।४।।त्व पा
यानिरूपितंसर्ववीरशैवमतंमहत्।।महदन्वायनादीनिभृत्यान्याधिगतानिमे।।५।।कर्माधिकारणं
तानिसूचितानिस्फुटंमहत्।।इदानींश्रोतुमिच्छामिस्वरूपंज्ञानयोगिनो।।६।।निरूपयसविस्तारं
सर्वलोकोपकारकं।।वेत्तात्पस्वरूपस्यत्वदन्योनास्तिकश्चन।।७।।त्वंब्रह्मपरमंसाक्षात्आद्यंतमवा
प्यच।।तन्मायाजालनिहितापरेकस्मादयोखिलाः।।८।।ईश्वरउवाच।।साधुसाधुकुलेशानिसमु
ध्धर्तुमिहेच्छसि।।भक्तानुमत्करुणापात्रान्यपत्यानीवनिश्चितं।।९।।इदानींतववक्ष्यामिसंयोगस्तान॰

॥पा॰र॰तं॰॥ मुत्तमं॥स्वयोनिरिवकल्याणि गोपनीयंकुलस्त्रिया॥१०॥ नैवजानंतियद्रूपंहरिब्रह्ममहर्षयः॥गजा ॥अध्या॥
॥२॥ ननोपिस्कंदोनिविनामह्यक्यमुत्तमं॥११॥भवत्याचप्रवक्तव्यनाशिकायैवसाधवे॥गुरुभक्ताय ॥२१॥
शांतायसर्वप्राणिदयालवे॥१२॥ गुरुगुर्वेसत्यानवदेत्कार्यवादिने॥एवमेवपुरोहेविप्रलये॰
हिनसंक्षये॥१३॥वटपत्रशायाकृष्णोवेधसोमामपृछत॥उपासबहुधाशास्त्याशायितोहरि॰
मांपरं॥१४॥स्तुत्वासंपूज्यमज्ञानंयोगरूपंसविस्तरं॥उपदिष्टंमयातस्मैज्ञानंयोगस्वरूपतः
॥१५॥तदेतदेववक्ष्यामिशृणुदत्तामनाशिवे॥नवैकादशपंचत्रीन्भावान्भूतेषुयेनमे॥१६॥ज्ञा
नेनानुगतान्पश्यन्तस्मान्नमद्विवेकनः॥शास्त्राद्गुरुमुखात्सम्यक्निश्चितामतिरात्मनः॥
१७॥अहंसर्वोत्तमइतिकेवलःशिवएवहि॥आदिमध्यांतरहितादित्यवर्णतमःपरं॥१८॥स
र्वसन्निधिसंस्थानंसर्वसाक्षिणमीश्वरं॥पालकंचनियंतारंकारणंकारणात्मनां॥१९॥अनादि॰ ॥२॥

माहिमन्यस्यानंतमंतं जनुष्मतां ॥ आरूपं सर्वरूपाढ्यंमप्रमेयमणोरणं ॥ २० ॥ महतोपि महांतं मां-
महाब्दं शब्दकारणं ॥ अमूलमेकमव्यक्तं व्यक्ताधारं वियत्परं ॥ २१ ॥ सर्वांतर्यामिणं देवं सच्चिद्घनमयं-
विभुं ॥ ज्योतिर्विज्ञानसन्मात्रमाहिमध्यांतवर्जितं ॥ २२ ॥ षडूर्मिरहितं शंभुं षड्विकारविवर्जितं ॥ षड्गु-
णैश्वर्यसंपन्नंनतिरस्ताणिमादिकं ॥ २३ ॥ प्रमाणातीतमचलं हेतुदृष्टांतवर्जितं ॥ स्वप्रकाशं स्वः-
दृक्दृश्यं सर्वाधिष्ठानमद्भुतं ॥ २४ ॥ केवलं गगनाकारं दुःखातीतं निरामयं ॥ नखमस्यादिलक्ष्या-
र्थं एकनित्यामनाकुलं ॥ २५ ॥ अमलं भावनातीतं गुणत्रयविवर्जितं ॥ अवस्थात्रितयातीतम-
संगं सर्वसंगिनं ॥ २६ ॥ भोजस्य भोजिकं भोक्तं सर्वदेहाभिमानिनं ॥ न संदृशे तिष्ठरूपं मस्य न च-
क्षुषा पश्यति कश्चनैनं ॥ २७ ॥ हृदामनीषा मनसातिक्लृप्तो एवं विदुरमृतास्ते भवंति ॥ अपाणिपा-
दजविनमदृशं सर्वदर्शनं ॥ २८ ॥ अश्रोत्रमखिलंश्रोत्रं सर्वज्ञानं समंपरं ॥ भोक्तारमक्षरं शुध्धं निर्वि-

पा॰ते॰ कल्पं निरंजनं ॥२९॥ नित्यं बध्धं नित्यमुक्तं निरूपद्रवमव्ययं ॥ बीजं निर्बिजमनघं पूर्णं व्याप्तिमखंडकं ॥३ अध्या
॥२॥ ०॥ ज्ञात्वैवमादिभिर्दिव्यैर्विलक्षणैममधीश्वरं ॥ निश्चितं मनसस्थैर्यं ज्ञानं ज्ञानविहो विदुः ॥३१॥ सोहंस्व ॥२९॥
यंज्योतिरजो प्रमयो महानुभूपतिसकलानुभूतिः ॥ एकोद्वितीयो वचसां विरामे येनेषितावाम
नवश्चरंति ॥३२॥ सर्वोत्राय समावर्त्तिसर्वभूतान्यहं शिवे ॥ सर्वेश्वरोहं सर्वज्ञः सर्वव्यापि सनातनः ॥३३
॥ शिवोहमीश्वरो रुद्रः सदाशिवहरिर्विधिः ॥ कालोजीवाभिधो व्यक्तं गुणाबुध्धिरहंकृतिः ॥३४॥ म
नश्चित्तमहं व्योमवायुरग्निजलान्विभुः ॥ गंधस्पर्शौ रसस्पर्शौ रूपमित्यहमेव हि ॥३५॥ सवनत्रि
तियंचाहं कालाश्च मातरादिकाः ॥ हविर्यज्ञक्रतुरहं देवा दानकादयोप्यहं ॥३६॥ राक्षसा यक्षरक्षां
सि मनुष्याः पशवः खगाः ॥ कृमिकीटपतंगाद्या अहमेव वरानने ॥३७॥ सूर्योदयागृहा भानि कृत्ति
कादीन्यंशिवे ॥ कालभेदाश्चतुष्पाया मेषाद्या राशयोप्यहं ॥३८॥ ज्योत्स्ना प्रकाशास्तिमिरमुसत्ति ॥२॥

श्वयस्थितिः॥लोकाश्चस्थावरंदेविजंगमंचाहमेवहि॥३९॥ज्ञातयश्चपुराणानिस्मृतयोधर्मसंहिताः
॥आलयोजातयाःसर्वा अहमेवपरंशिवः॥४०॥धर्माधर्मौसुखंदुःखंहृद्योगस्त्वफलंत्वहं॥भूतंभवंभ
विष्यच्च सर्वमप्याहमीश्वरी॥४१॥संसारिचापिसंसारोप्यहंसंसारिणंशिवे॥भोक्तारंप्रियकरंभोज्यं
मांविज्ञायविमुच्यते॥४२॥विद्धितानंमद्विवेकोयोमत्सामिरीश्वरी॥ताभ्यामुपाभ्यासंसिध्धिः
सोहमेवशिवःशिवे॥४३॥देव्युवाच॥निरीश्वरनिरालंकनिराहारनिरंतरं॥नमस्तुभ्यंनिरंतरं
संशयंछिंधिमेशिवे॥४४॥अनंतमव्ययंशुध्धंसच्चिज्योतिसुखोद्भवः॥पूर्णमेवाप्तकामत्वंपरंब्र
ह्मपरायणं॥४५॥भोक्ताविकारीनिर्बधः शरीरसुखदुःखयोः॥जायतेम्रीयतेजीवःकथंजीव
त्वमीश्वरं॥४६॥लोकालोकंप्रयासेषअर्थवांश्चद्रिद्रवत्॥नैवसंगच्छतेदेवमनसोममशंकर॥४७॥
॥ईश्वरउवाच॥अहमेववरारोहेनिर्विकल्पादिलक्षणः॥भवत्साममशास्त्रैवंविक्रीडामियथासुखं

॥४८॥ शिवोहं त्वमुमे शक्तिस्त्वमेवाहमहत्त्वमु॥ स्थ्यात्मा त्वंवैउमा साहं शिवश्चात्मा सकं जगत्॥४९॥
त्वयि दर्पणभूतायां बुध्धो जीवोहमीश्वरः॥ असंगप्रतिबिंबोस्मि न भोक्ता केवलः शिवः॥५०॥ शो
कहर्षभयक्रोधलोभमोहस्पृहादयः॥ अहंकारस्य दृश्यंते जन्ममृत्युश्च नात्मनः॥५१॥ जीवो ह्ययोगुण
शुध्धः स्वयंज्योतिरपावृतः॥ अग्निवध्धातुवद्देवि न भोक्ता जीवईश्वरः॥५२॥ सुखत्वमपि दुःखत्वं का
र्यस्थौल्याद्यनेकदा॥ भावा अहंमते धर्म जीवो ध्यासाद्भूतनुः॥५३॥ यथा स्वप्नगता धर्मा आरोप्यं
ते स्वआत्मनि॥ अज्ञेन देहतादात्म्यात्तथैवास्य शरीरिणः॥५४॥ न जायते म्रियते वा कदाचिन्नायं भू
त्वा भविता वा न भूयः॥ अजो नित्यः शाश्वतोयं पुराणो न हन्यते हन्यमाने शरीरे॥५५॥ निर्लेपोहं यथा
देवि निःसंगश्चात्मकामनः॥ तथैव जीवो मद्बिंबो निर्बिंबप्रतिबिंबयोः॥५६॥ भेदप्रसाद एवासौ दृश्य
ते गिरिनंदिनि॥ मन्मायामोहितो जीवः पश्यत्यात्मानमन्यथा॥५७॥ नश्यतो गायतः पश्यन् अद्वैवान ॥२॥

करोतितान्॥एवंबुध्दिगुणान्पश्यन् ननिहोप्यतुकार्यते॥५८॥कल्पितेयंव्यवहृतिः पुरुषस्यार्थसिध्ध
ये॥आत्मतत्वे प्रतिज्ञातेनैकोभोक्तापिलक्ष्यते॥५९॥तिष्ठत्सुपैतिसंजाताबहुधाबुध्दिरेवमे॥शक्ति
र्मवद्विभूतिः समुपान् भात्केवदृश्यते॥६०॥शुध्धोविस्फटिकोदेविजपाकुसुमसंन्निभैः॥रक्तस्फटिक
वद्भातितद्वद्दोषोधिकीभूतिः॥६१॥गुणोरगःभ्रमाद्भीतोगुणंज्ञात्वाभयंत्यजेत्॥मामंतव्यापिनं ज्ञा॰
त्वाजीवामुच्येतबंधनात्॥६२॥अनावृतास्यापरस्य पारिछेद्यंकुतोभवेत्॥भूमाविवगृहाविल्याबु
ध्याकल्पीतमीश्वरी॥६४॥अनाद्यविद्यायुक्तस्यपुरुषस्यात्मवेदनं॥स्वतोनसंभवादन्यस्तत्वज्ञोज्ञान
दोभवेत्॥६४॥पुरुषेश्वरयोरत्रनवैलक्षण्यमण्वपि॥तदन्यकल्पनाज्ञानमज्ञानप्रकृतेर्गुणः॥६५॥दे
व्युवाच॥अनावृतस्यनंतस्यांनंतरस्यचिरात्मनः॥लोका लोकगतिर्देवतवांतर्यामिणःकथं॥६६॥॰
अविद्यावसतःस्याच्चेद्खंडायास्तदात्मनः॥तस्याश्चापिकथंदेवपूर्वदेशास्यव्यक्रमः॥६७॥तन्मेसं

॥पा०सं०॥ शयंशंभोछेत्तुमर्हस्यशेषतः॥त्वदन्यः संशयस्यास्यभेत्तामेनोपपद्यते॥६८॥दयालुरखिला- ॥अध्या॥
॥१४॥ धारआत्मधिष्ठानमीश्वरः॥मत्प्राणवल्लभः स्वामिन् निरूपयमहेश्वर॥६९॥ईश्वरउवाच॥अना- ॥२१॥
वृत्तोस्म्यनंतोस्मिपरिपूर्णोस्म्यसंशयः॥तादृश्येवहिमिछातिसमस्यापिशृणुप्रिये॥७०॥नपू-
र्वदेशसंस्त्यागोस्वाविद्यायाअपिक्वचित्॥तद्विभूतेरवंशायाविलासस्ताकुरुंनतः॥७१॥मद्विंब-
स्यास्यजीवदर्शनस्यचमत्कृतिः॥तत्रतत्रगताविद्यातत्कार्यंसृजत्यलं॥७२॥महांबुधिरिवाभा-
सितरंगायतएकधा॥उत्पद्यतेव्रजत्यन्येदशांयांतिलयंत्वपि॥७३॥तत्रतत्रगतोहेविमम्मासाप्र-
तिबिंबतः॥जीवत्वमेसमछास्त्वात् प्रकृतिंवानुगछति॥७४॥ईश्वुवाच॥यन्नेत्रात्रितयंशंभोरवि-
चंद्रकृशानवः॥नमस्तस्मैमहेशायगुरवेपरमेष्ठिने॥७५॥अत्रोपविश्यविश्वात्मन् संशयंग्रंथि-
भेदनं॥अध्यासःकथमीशानतत्वसत्यविहालनः॥७६॥ईश्वरउवाच॥अभासस्वपणोभोक्तुर्नमे ॥१४॥

साक्षाच्चिदात्मनः॥ परिच्छिन्नत्वमायात मायातस्य विकारिता॥ ७७॥ अस्ति हि द्विमुखं वैषम्यं निर्वि
बप्रतिबिंबयोः॥ हृप्येकरूपता पार्थक्यभेदो बिंबयोः शिवे॥ ७८॥ जीवो मदंशो शो ज्ञानात्मा सोऽस्य
ज्ञानी वदृश्यते॥ मदिच्छया स्यजगतः स्वहमेवाखिलं शिवे॥ ७९॥ देव्युवाच॥ नारकब्रह्मणे तुभ्य
मषाढायमहस्यते॥ नमः पंचाक्षरीशाय गुरवे स्तुकपर्दिने॥ ८०॥ सुसुखो भवविश्वेश्वा निर्भेदो मे व
पद्यता॥ निरूप्यात्रा विश्वात्मन् संशयेच्छेदनं वचः॥ ८१॥ निस्तरंगसुखांभोधेरनंतस्य चिदात्म
नः॥ निमित्ततो विच्छया वा दुःखिलमणुताकथं॥ ८२॥ प्राबल्यं यदि मायायाः ईश्वरत्वं कुतस्तव॥ न
च स्वाधीनज्या ज्येच्छा निरीहस्य जगत्सते॥ ८३॥ ईश्वर उवाच॥ तस्यमेतदहं भद्रे निरिहत्वादिलक्षण:
॥ ममशक्तिर्विभूतस्तेन टसैवमनेकधा॥ ८४॥ नस्वातंत्र्यमदीनाय व्यवहारार्थमीश्वरी॥ नाधानता
नियंतुस्ते विटनं सायथेच्छया॥ ८५॥ सुखदुःखेधिकावातुनटनां तरचारिणी॥ तिस्रणां मम शक्ति

नांनामरूपक्रियात्मनां॥८६॥यद्दृष्ट्वातेस्वकेतत्वेभज्यतेसानसंशयः॥यावन्नजानात्यात्मानमा
त्मानात्ममहात्मकं॥८७॥विध्येतद्वृत्तिवैचित्र्यमनंतायाअहंमते॥मतः साक्षिप्रमोवायुनामा:
घानंतरूपिणी॥८८॥तिष्ठतीहंममतनौमच्छरीरमिहंजगत॥जगदित्यहमित्यन्यइतिभेदोन
कश्चन॥८९॥उत्पत्याहिस्वरूपेणमदन्यस्याविलोकनः॥तिष्ठतिस्थितयेतत्त्वंव्यवहारःसदेहि
नः॥९०॥नादुःखिनसुखंप्रीतिरनीशमीतिकारिणी॥तदीयरुचलाभायदुःखवंनटनंधियः॥
९१॥दुष्टस्वप्नस्यनिद्रालोरारिभीत्यापलायनं॥प्रबुध्धास्यनवैतस्यतथेयंसंसृतिश्चतः॥९२॥त
थैवंदेहिनामिष्टोहोमंततौहुताशनः॥ग्रीमेषुशीतलाश्चापएवंहिसुखदुःखयोः॥९३॥एकाप्य
नंतभेदेननामरूपक्रियात्मना॥नटसीलंकुलेशानीविचित्रास्तववैभवः॥९४॥शृण्वितःपरमंगुह्यंव
क्ष्यामितवपार्वति॥भक्तायाअनसूयायाहृतचित्ताभवप्रिये॥९५॥इतिश्रीपारमे·एकविंशतिप·
॥२१॥

श्रीगणेशायनमः॥ श्रीमद्गौरीरमणायनमः॥ नसाधयतिमांयोगः सांख्यांधर्मस्त्वनुष्ठितः॥ स्वाध्याः
योपितपस्तीर्थक्षेत्राणिनियमाश्चयः॥१॥ व्रतानियज्ञछंदांसिजातयश्चाश्रमाअपि॥ विनाभक्त्यासु
हृदयामय्येवनिरपेक्षया॥२॥ सदाचाररतंधीरंसहयंधर्मतत्परं॥ मनस्विनंवाविद्वांसमपिनोरक्ष-
येप्रिये॥३॥ ज्ञानंध्यायंचशुश्रूषायत्नसर्वापिसाधितः॥ यदिमद्भक्तिरहितंनपुनात्यपिवाक्कचित्॥३
४॥ अनाचारोपिवाचारवृत्तिशुध्धापिवानवा॥ स्वजनोदुर्जनोवापिमद्भक्त्यापदमुध्धरेत्॥५॥ भक्तःस न
र्वोत्तमोदेविनिरपेक्षात्स्यकिंचन॥ अप्युत्कृटेभ्यः कर्मेभ्योमहदादिभ्यएवच॥६॥ यथानदीषुमंदाकिन्यमरे
षुशचीपतिः॥ भगवतीगिरिजास्त्रीषुपुरुषेष्वममीश्वरः॥७॥ सर्वासांमद्विभूतीनांभक्तएवतथावरः
॥ तंबिभेमिकुतश्चापियथाभक्तोरहंप्रिये॥८॥ आखणिविहस्ती॥ अनिर्विप्राणिविहस्तंवाह्यतिपातक
कारणं॥ अतिनिंदितकर्माणंममभक्तिंपुनाहितिं॥९॥ भक्त्यादेवमनपायिन्यानिहामप्यमईमया॥ प्री-

॥पार॰तं॰॥ तिमय्या भवांबोधिं को वा नावान संतरेत् ॥१०॥ भक्तिर्माता पिता वित्तं बंधुरापरिसोदरः ॥ गुरुर्मित्रं ॥अध्या॥
॥१॥ सुहृद्भोगो मोक्षश्च पुरुषार्थराट् ॥११॥ पत्रं पुष्पं फलं वन्यं ग्राम्यं वा दुर्बलोचितं ॥ समर्पितं स मानीः ॥२२॥
य भक्तेन मम तत्प्रियं ॥१२॥ सुगंधिवाप्यगंधं वा तुलसीकुसुमादिकं ॥ समर्पितं भवेत्तस्य भक्ते
नाकांक्षितेन मे ॥१३॥ मतस्त्वत्तोपि कैलासानंदीशाश्च गजाननात् ॥ स्कंदादिकात तश्चापि भक्त
एव प्रियो मम ॥१४॥ अकिंचनस्य दांतस्य शांतस्य समचेतसः ॥ सर्वभूतात्मभूतस्य निरपेक्षम
हात्मनः ॥१५॥ निरस्तं गमहानंद पारहारल पार्षिणर्षु ॥ नाशां शामपि जानाति कामितस्य मम
प्रिये ॥१६॥ सुगंधी शीतलं स्वस्थं वस्त्रपूतं पयो बहुः ॥ चूलकं वा यथाशक्ति तदृक्षप्य मदर्पितं ॥१
७॥ करवीरैर्बिल्वपत्रैर्दूर्वाभिस्तुलसीदलैः ॥ द्रोणैर्मामर्चयेन्नित्यं पंचभिः कुसुमैः शिवे ॥१८॥ अ
शक्तस्तु यथाशक्ति स्तोत्रपूजाजपादिकं ॥ स्मरणं कीर्तनं ध्यानं नर्तनं चाप्यमायया ॥१९॥ कर्मणा ॥१॥

मनसावाचा सर्वशक्तस्यसुंदरी ॥ नामानुस्मरणंचैवलह्यकोबोममामये ॥ २० ॥ तत्रामिप्यशक्तोयो-
नित्यंयदास्नातिपिबत्यपि ॥ ममतीर्थप्रसादाल्लाम ह्युक्तो मामुपेष्यति ॥ २१ ॥ अनुष्ठेनासमर्थस्य
शक्तस्यतत्तुदंडने ॥ सद्भक्तिपरमोलाभोदारिद्रस्यनिधिर्यथा ॥ २२ ॥ औषधंभवरोगस्यपापदा-
वानलंबुधः ॥ मद्भक्तिवडवाग्नौतुतृणायंतेनसंशयः ॥ २३ ॥ महांधतमसोघोरेदुःखवैभवकानने ॥
संविधानसमाविष्टसन्मार्गभक्तिरेवमे ॥ २४ ॥ आलस्येनापिकार्येण परिहास्येनमायया ॥ मद्भ-
क्तः संततेदुःखंव्याजेनाप्यखिलासना ॥ २५ ॥ सुखिछुरभ्यसेद्भक्तिंरोगीवौषधमादरात् ॥ ममान-
पेक्षामव्यग्रः पाथेयमिवमार्गगः ॥ २६ ॥ भक्तोभक्त्याभजेन्मांवैनिःसंगमितिमाश्रितः ॥ विज्ञाया-
खिलवर्षाणांयोषाभारमिवप्रियं ॥ २७ ॥ स्त्रीपुमानपुमाधीशाभक्तिमेवाश्रयंतुमे ॥ नरकोवाधि-
कारोस्तिरितेमद्भक्तिमुत्तमं ॥ २८ ॥ बहुनात्रकिमुक्तेनवक्तव्यंकोटिग्रंथकोटिभिः ॥ वक्ष्येश्रृण्वेकवाक्ये

॥पार॰तं॰॥ नमद्भक्तिः परमा गतिः ॥ १९ ॥ देव्युवाच ॥ धीर्नतेननरणा लोके चतुरं ते प्रवर्त्तनं ॥ धाम यं धा गतिं देव ॥अध्या॥
॥२॥ धामहीशानमीश्वरं ॥ २० ॥ देवदेवोत्तमः स्वामिन् दीप्यद्वादशकोटये ॥ शशिकोटिसुशीताय त्वं ते ॥२२॥
जः स्वनये नमः ॥ २१ ॥ वदात्र परमेशान भक्तिलक्षणमीश्वर ॥ यया ज्ञात भवद्रूपः परामेष्यति निर्वृ
तिः ॥ २२ ॥ ईश्वर उवाच ॥ कर्मणा मनसा वाचा जाग्रत्स्वप्नसुषुप्तिषु ॥ मदनुस्मरणं ध्यानं स्तुतिपूजारतिः
सदा ॥ २३ ॥ मल्लिंगधारणं भक्त पूजनं लिंगधारणं ॥ अहिंसा सर्वभूतेषु दयामदनुवीक्षणं ॥ २४
॥ मल्लिंगं लिंगचिन्हानां दर्शनं मयि भक्तितः ॥ अम्मायानपेक्षात् साष्टांगमभिवादनं ॥ २५ ॥ गतिं प्र
दक्षिणं सर्वा मम सर्वत्र सर्वदा ॥ भावयेच्चावनं सुभ्रु प्रमाणं मम सर्वशः ॥ २६ ॥ उच्चारणं चाक्षराणां म
न्नाम स्मरणात्त्विति ॥ भक्तपीतादिकं सर्वं मत्स्मसाहधियाश्रुते ॥ २७ ॥ सर्वामैंद्रियकीवृत्तिमत्सेवा ॥२॥
येनियोजयेत् ॥ साप्रासमखिलं भोगं मदर्थमपि चार्पयेत् ॥ २८ ॥ कृच्छ्रेपि मनसि क्लेशं न संप्राप्तम

नुस्मरेत्॥ अति मानुषसंपत्ता वप्युत्सर्वेतनक्कचित्॥३९॥ पुत्रदाराधनादीनां संगमः काम संगमः॥ अनु
देहं नियंते ते स्वप्नो निद्रालगो यथा॥४०॥ निहामुत्र फलं किंचिद्दिछेद्दत्कोममप्रिये॥ अपि केवलस्य मीश्वा
निमप्यादत्तमपिक्कचित्॥४१॥ क्रियत्स्यात्सार्वभौमादि संपत्तीरणिमादिका॥ तृणीकृतानि माद्यष्टासि
ध्धेर्भक्तिरंहसा॥४२॥ दृष्टश्रुतमनुध्यातं यद्बुध्यावाकुलेश्वरी॥ सर्वं महालनापश्ये दोषाचारमिवप्रि
यं॥४३॥ दरिद्रस्य निधि प्राप्तो यथास्यात्तन्मतिः शिवे॥ कामुकस्य यथा काम उभे साप्रीति लक्षणा॥
॥४४॥ कार्यापदार्थसंप्रीति भक्तेर्मोहमयी मतिः॥ मय्यकायेन साशुध्धा भक्तिर्वै सात्विकी मतिः॥
४५॥ भक्तिरं ति नमारुह्य भवश्वभ्यः कदाचन॥ नबिभेति क्कचिध्धामानू भक्तिमान्मयि निस्पृहः॥४६॥
॥जात्यंधस्य यथा दृष्टिर्दरिद्रस्य यथा निधिः॥ मूकस्य वचनं रोगी पीडितस्यौषधं यथा॥४७॥ प्राणस्य
जीवनजल मधीरस्य स्वतंत्रता॥ तथा दुःखतितिर्षोर्मे भक्तिलाभः परः शिवे॥४८॥ व्यवहारस्त्रिरूपो·

॥पार॰तं॰॥ पि मयि भक्तिमतः सुखं॥अभक्तस्य परं दुःखमेष सर्वत्र निश्चयः॥४९॥देव्युवाच॥इदं तावन्न वेतुम्य ॥अध्या॥
॥३॥ महताधररूपिणे॥नमस्तु जयरूपाय शंभवे चेतनात्मने॥५०॥संतर्पयेद्दा परं भक्त्या निरूपितमितः प्र॰ ॥२॥
भो॥कथमुत्पद्यते सास्य यामाश्रित्य भवांस्त्रियः॥५१॥ईश्वर उवाच॥अपेक्ष्य कामनः कामी कुर्यात्काम
पदाकृतिं॥नायेथमुत्पद्यते सास्य यामाश्रित्य भवांस्त्रियः॥५२॥पुराकृतेन पुण्येन निर्वणः सुखसंगमे॰
॥गुरुसमाक्रमेद्भक्त्या दुःखोत्तरणहेतवे॥५३॥प्राणार्थमानवसुभिः आदराथमत्तुक्रमैः॥उपासयित्वा
संतोष्य चानीयान्मामशेषतः॥५४॥प्रसाद सेवया भक्त्या गुरुशुश्रूषया प्रिये॥सल्लैकेषयामसम्यत्तः
श्रयेद्भक्तं परामपि॥५५॥आशाक्तकामनात्यागेन स्पृहीतु मपीछति॥मध्यस्थश्री सुखाश्लात्वा मामेवसं
श्रयेत्तु॥५६॥भक्त्या मयि दृढयितुंत्त्वा सम्यक् समाश्रिवे॥शिवोहमिति संभाव्य शिव एव भवेद्ध्रु॰
वं॥५७॥दयावज्ञायते भक्तिर्ज्ञानीयान्मामशेषतः॥गुरुपरिचरैस्तावनीचवृत्त्यादिदासवत्॥५८॥तदु ॥३॥

क्तमपरंमंत्रतत्त्वोहितस्तुरुक्रिया॥करणत्रयभावेनविश्वसेद्गुरुमीश्वरं॥५९॥भक्त्याभ्यासात्समुत्पन्नज्ञा-
नंचसुदृढंभवेत्॥ज्ञानेनयोगमाप्नोतिनाभ्यासिध्योविमुच्यते॥६०॥अभक्तस्योदितासंविद्दुर्लभानर्थ
कारिणी॥तुषापघातिनइवविशेषस्तस्यवैक्रमः॥६१॥त्यक्त्वाभक्तिमयीतावमुत्तर्तुममरापगां॥पार-
द्दिएवबाहुभ्यामतरिभ्यांमहाल्पधीः॥६२॥विशेषमत्रवक्ष्यामिशृणुदेविसमाहिता॥कर्मभक्तिवि
दांलानस्त्वधिकारास्त्रयास्फुटः॥६३॥अलंबः कामिनः कर्मज्ञानंतिष्ठामिनः पर॥विरक्तस्यविशक्त
स्यभक्तियोगेशिवेमयि॥६४॥नेहेतोत्तरसंभोगमाद्दिप्रासेनसज्जते॥भुंजन्प्रारब्धतान्प्रासान्म
यिभक्तोभवेध्रुवं॥६५॥सस्फुरवंज्ञानमुत्पन्नभक्तस्यसुदृढंभवेत्॥निरस्ताज्ञानतिमिरस्तेनमुक्तोनसं
शयः॥६६॥नकिंचिज्ज्ञानिनःकर्मनिषेधोविधिरेववा॥विधियोज्ञानविच्छेयेवयंयंनिःसंगितात्मनः॥
६७॥भक्तस्यतुयथाशक्तिनिषिध्धंयत्नतस्यचेत्॥कुर्याद्विधीयंप्राबल्येभक्तिमेवाश्रयेत्सुखी॥६८॥

अन्यथाकरणेकार्यंप्रायश्चित्तंहिकामिनः॥ज्ञानेनज्ञानिनेभक्त्याभक्तस्यमयिशुध्धये॥६९॥नक
र्माधिनताबंधोभक्तस्यज्ञानिनोमम॥नविरक्तिर्नचासक्तिःप्रायश्चेयोभवेत्प्रिये॥७०॥देवदानवगं
धर्वयक्षराक्षसमानुषाः॥मद्भक्त्यैवतरंत्युग्रंस्त्रीशूद्रपशुपक्षिणः॥७१॥नमृत्युनजरारोगअधि
क्लेशोपिनकश्चित्॥भयंपीतामृतस्यैवभक्तस्यसुखमेधते॥७२॥तपस्विभ्योधिकोज्ञानिज्ञानिभ्य
श्चमतोधिकः॥कर्मिभ्यश्चापिगिरिजेतन्मेभक्तःसुखीभवेत्॥७३॥दुर्वासनानुबंधेनविषयस्या
गकातराः॥मन्मायामोहितधियःपुरुषाःपूर्वकर्मतः॥७४॥राजसाघोरसंकल्पाकामिकाअहिमन्य
वः॥अग्निमध्यात्तुधूमोतास्वलोकंनविंदंतिते॥७५॥नैवतेमांविजानंतेहृदिस्थंयदहंयथा॥अक्षरा(?)ः
स्त्रायसुतृपोयथानीहारचक्षुषा॥७६॥आहेताअतुराघाचापरंपुष्पितयाखिलाः॥बध्यतेसंकटेघोरे
मांसलुब्धाइवांडजाः॥७७॥नरुचिःकर्मबंधानांज्ञानंभक्तिर्ममप्रिये॥चर्मांभःस्त्वसकृक्षीणांसुना·

मिवघृतंश्रुभं॥७८॥अनुपास्यगुरुंभक्त्यात्वनभ्यासागमान्विति॥अभक्तज्ञानिनःश्रेयःकुतईशुपरं
मम॥७९॥भक्तिःसुसाधनंसाध्यंज्ञानंयोगादिमुक्तये॥तस्सिध्धस्यवृथाकर्मनिरोगिणइवौषधं॥
८०॥देव्युवाच॥नकर्मसाधनंमुक्तेरभक्तिज्ञानमप्युत॥एवंयदिमतेभेदास्तवशंभोकथंवद॥८१॥प्राब
ल्येनविभोभक्तिःसाध्यतेमुक्तिरीश्वर॥लिंगधारणतःपुंस्यादभक्तस्योथभक्तितः॥८२॥इदंनिरूपय
विभोकरुणाकरशंकर॥ममबंधोदयासिंधोगंधेनेभाजिभूषणः॥८३॥ईश्वरउवाच॥सत्यमुक्तंत्वया
रा॰ली॰ देविश्रृण्वत्रपरमंवचः॥मतभेदेषुसंसोचविशेषंलिंगधारणं॥८४॥कर्मादिकारिणःकामकामिनः
कमलानने॥कर्मबंधविमोक्षायकल्पितोमार्गईदृशः॥८५॥लिंगधारणसन्नावितरेत्संसृतिसागरं॥
तत्केनजीयैतेदेविगहनाकर्मणोगतिः॥८६॥नित्यकंशक्यतेयावदेकदेवतनूभृता॥तत्सोपानप्रसिद्ध्या
र्थंमतभेदानिरूपितः॥८७॥निर्विघ्नेनफलावाप्त्यैलाभदाद्यादिसिध्धये॥विघ्नभिन्नविरोकाय

॥पा॰ तं॥ कर्त्तव्यंलिंगधारणं॥८८॥पूजनार्चनादिकंभेदबुद्ध्यायेवशांकरी॥भक्तेर्ज्ञानस्यदातृत्वाद्यकेवलत्वात्म· ॥अध्या॰
॥५॥ येस्फुटं॥८९॥परिज्ञानंगुरोःशास्त्रायत्स्वरूपस्यमामपि॥पुरुषार्थपरोदेहेविबंधनायाखिलेपरं॥९०॥ ॥२२॥
आब्रह्मकीटपर्यंतंभूतंजातंमयिक्षिप्येतु॥ममात्मनिद्वितत्वमेकंचखंडमव्ययं॥९१॥एतज्ज्ञानंपरंगुह्य मं
मन्यदज्ञानमेवतत्॥एतदंगानिसर्वाणिगुरुशास्त्राधिकानिहि॥९२॥विविक्तदेशःसंतोषस्त्वभिराचा
र्यसेवनं॥अनिहाचार्यमौनानिस्वाध्यायस्तपआर्जवं॥९३॥अहिंसास्तेयसत्यानिदयासमताखि
ले॥तितिक्षाचप्रमादश्चब्रह्मचर्यव्रतंप्रिये॥९४॥आसन्निताखलातेक्षाहीरहंमतिवर्जनं॥ज्ञात्वाक्रम·
विभेदाश्चसुखित्यागोश्वसंमतिः॥९५॥यदृच्छालाभतोजित्वामनपेक्षापिहस्तगे॥स्तुतिरीश्वरचिंता
चतुष्टिःपरहितक्रिया॥९६॥असक्तिनिरभिष्वंगःपुत्रदारगृहादिषु॥सुखदुःखात्मसमतापरेषांच· ॥५॥
द्विषामपि॥९७॥साक्षात्वच्छात्रयेचापिपरोपकृतिचेतनं॥आत्महितार्थनिर्बंधप्रतिकारानपेक्षता॥

९८॥ गुरुशास्त्रेसु सद्भक्तिरादरोभक्तिभक्तिषु॥ ध्यानंममभिधानानाममनुस्मरणमन्वहं॥९९॥ तेजस्विता
पिवाज्ञित्वमप्रगल्भप्रदर्शनं॥ असंगआत्मचित्तानांशिष्योद्दरतषाक्कचित्॥१००॥ अहेरिवगुणाद्भीति
संगमानूमरणादिव॥ कुणपादिवयोषिद्भ्यो धैर्यपुत्रीसुतेष्वपि॥१॥ सांगस्यैवात्रसंपूर्तिर्निरंगिस्यां
गिताकुतः॥ सहप्लवगतेभामेप्रवाहेभववारिधेः॥२॥ सर्वथाशृणु विश्वेशि परमार्थविनिर्णये॥ सर्व
यत्नेनमनसास्थिरीकुर्यान्मनोमयि॥३॥ एषवैपरमोयोगोमनसः संग्रहः शिवे॥ हन्यस्यैवार्त्ततोयः ह
लात् उपलब्ध्या मनोज्ञया॥४॥ एतन्निरूपितंदेवि गुणत्रयविकारकं॥ जगन्मिथ्यामयंबुध्वाममा
श्रित्य भवेद्दृहं॥१०५॥ इतिश्री पारमेश्वरतंत्रे द्वाविंशतिपटलः समाप्तः॥ श्रीसांबसदाशिवार्पणमस्तु॥
॥१२॥२२॥ ७॥ ७॥ ७॥ ७॥ ७॥ ७॥ ७॥ ७॥ ७॥ ७॥ ७॥ ७॥ ७॥ ७॥ ७॥

श्रीगणेशायनमः ॥ श्रीशंवंदे ॥ त्रिलोचनाखिलाधारश्रीकंठपरमेश्वर ॥ त्रिनाभित्रिगुणालोका
त्रितलपरिवर्त्तक ॥ १ ॥ गुरुप्रियोसिभर्त्तामेदत्तदेहात्वयास्म्यहं ॥ वदात्रविस्तरादीशप्रष्टंमत्सप्रश्नगर्भि
तं ॥ २ ॥ निर्लेपानंगसूक्ष्मस्यजगदाधारताविभो ॥ स्थूलस्यमविकारस्यकार्यकारणताकथं ॥ ३ ॥ संग
दसंगिनःसंगीजीवद्वन्यविकारिणः ॥ समापद्येततादात्म्यमनित्यत्वादिलक्षणं ॥ ४ ॥ संगिनःसंगि
नःस्थातुमुपपद्येतस्थितिःकथं ॥ परिपूर्णात्मकामस्यवचसापिप्रयोजिता ॥ ५ ॥ ईश्वरउवाच ॥ सम्यगा
पृष्ठिभगवत्सतिगुह्यमिदंत्वया ॥ यद्विज्ञेयस्यजेत्संगमात्मन्यत्मनात्मना ॥ ६ ॥ अनंतोहमनाधारआ
धारोजगतामहं ॥ असंगश्चापिनिर्लेपस्तथातिश्रृणुपार्वति ॥ ७ ॥ अस्पृशोन्नेवभूतानिधारयाम्यः
खिलान्यपि ॥ गंधवाहमिवाकाशएवमाधारताभम ॥ ८ ॥ वस्तुनःसर्वबीजस्यपूर्णस्यस्वविकारिणः
॥ क्वत्सुविधिमात्रेणप्रयोजत्वंकुतोमम ॥ ९ ॥ गिराविवल्गणादीनिजायंतेयादिवैलयं ॥ मेघागति

॥पा॰तं॰॥ रिवार्कस्यतत्संबंधंकुतोगिरेः॥१०॥अधिष्ठातृत्वकर्तृत्वकारणत्वादिकान्यपि॥कल्पितानिमयमा ॥अध्या॥
॥१॥ त्रात्मया भवत्येवमदीयया॥११॥देव्युवाच॥अनाधारसदाधार धातरीश्वरवल्लभ॥निरंतरनिरं॰ ॥२३॥
तंकपरिपूर्णाद्वयप्रभो॥१२॥नित्यसत्यसुखज्योतिः केवलस्यचिदात्मनः॥सद्भावेन्यस्यकार्यं
स्यात् द्वितीयंत्वकुतस्तव॥१३॥उक्तानिलक्षणान्येतानिखिलानिसुरीश्वर॥तथापित्वयिवि॰
श्वेशाछिंद्येतत्संशयंमम॥१४॥ईश्वरउवाच॥घटाद्यामृत्तद्वत्सन्नाम्नैवव्यवहारतः॥नामरूपक्रि
यावत्त्वंकनकात्कुंडलादिवत्॥१५॥कार्यस्यकारणात्मत्वंलोकसिद्धमपिश्रुतिः॥स्मृतिःकेव
लससंवेत्याहबीजांकुरस्फुटं॥१६॥व्यवहर्ताव्यवहृतिःव्यवहार्यमिदंत्रयं॥एकएवासुमिहय
त्सुवर्णत्वंहिकांचनं॥१७॥यावन्नात्मपरिज्ञानंहिंभोहरकुवादिनां॥तावद्भेदवदाभासोज्ञा
तेमयिकुतोभिधा॥१८॥रज्जौसर्पत्वमारोप्यस्वभ्रात्याकुमनाअहिः॥बिभेतिकिंयातस्येयं॰ ॥१॥

करोतिनकरोतिवा॥१९॥संस्थितेमप्यधिष्ठाने निस्तरंगसुखांबुधौ॥संजायतेविलीयंतेना
मरूपास्सुबुध्धदा॥२०॥देस्युवाच॥प्रकृतेपरतंत्रायायद्वास्वातंत्र्यवर्त्मनः॥जात्याधृतिरियंनेष्टा
भवतोस्तिप्रयोजनं॥२१॥इतिश्री पारमेश्वरतंत्रे त्रयविंशातिपटलः समाप्तं॥२३॥श्रीसांबस
दाशिवार्पणमस्तु॥श्रीरस्तु॥शुभंभवतु॥७॥दत्तात्रयश्री पादवल्लभस्यइदमर्पणमस्तु॥७॥
वेदर्षिरसभूशाकेविभवाब्देयमायने॥शारदतावश्विनेमासेकृष्णपक्षेचहरिदिनि॥१॥इंदुवारे
चमघाऋक्षे॥शुभेबालवमेवच॥घोटकरोपनाम्नेवैसदाशीवस्यसूनुना॥२॥ नारायणेनलिखि
तंतंत्रंच पारमेश्वरं॥भग्नपृष्टिकटिग्रीवस्तब्धदृष्टिरधोमुखं॥कष्टेनलिखितग्रंथंयत्नेनपरिपा
लयेत्॥४॥तैलाद्रक्षजलाद्रक्षरक्षेछेथिलबंधनात्॥मूर्खहस्तेनदातव्यंएवंवदतिपुस्तकं॥५॥
॥७॥७॥७॥७॥७॥७॥७॥७॥७॥७॥७॥७॥७॥७॥७॥७॥७॥७॥७॥

॥ इति पारमेश्वरतंत्र समासं ॥ श्रीमद्गौरीशाय अर्पणमस्तु ॥ श्रीशैल्यजेशं वंदे ॥